3. ॰स्रतशा॰ T. Cf. KS. XXII: 6: 61. 11.

4 ॰सस्सं॰ T. Caland.

5 सावित्र्यैषां T.

6 प्रति॰ Brl. प्रतिपद् T.

7 No accent in Brl. and T.

8 ब्रूयादूर्ध्वं॰ T. ॰न्नोर्ध्वं॰ Brl.

9 आह T. Brl. Cf. पश्चादग्नेर्दर्भेषु प्राङासीनः प्रत्यङ्ङासीनाय तत्सवितुरिति सावित्रीं त्रिरन्वाह KGS. 41. 20; अथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपसन्नाय समीक्षमाणाय समीक्षिताय PGS. 2. 3: 206. See also GGS. 2. 10. 35; BGS. 2. 5. 38–9; AGS. 1. 20. 2–3; APGS. IV. 11. 8; HGS: 1. 6. 9.

10 अन्वायन्त T. Brl. For आ...तिः cf. KGSMB. p. 11. P. U. L. Ms. 5971.

11 कल्पयेदित्य॰ T.

12 अथाहु॰ Brl. For अथैक······न्वाह cf. PGS. दक्षिणतस्तिष्ठत आसीनाय वैके 2. 3: 206. See PGS. (गदाधरटीका) pp. 208. 226. 30–35. दक्षिणतः कुमार उपविश्य HGS. 1. 6. 10.

For another meaning of प्रत्यङ् cf. य उ एनत् प्रत्यग् वेद ये प्रत्यञ्चो लोकास्तान् जयति JUB. 1. 36. 5; KāṭhU. 1. 5. 3. ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति; ChU. 30. III. 13. 3. योऽस्य प्रत्यङ् सुषिः सोऽपानः । योस्योर्ध्वः सुषिः स उदानः । It corresponds to आवृत्त in ChU. II. 2. 2. लोका ऊर्ध्वाश्चावृत्ताश्च. See Burnell's note on JUB. 1. 06. 5. For अङ्=अक्, आङ्=आक् cf. KāṭhU. II. 4. 1. (कश्चिद्धीरः प्रत्यगात्मानमैक्षत.), KāṭhU. II. 1.

श्चतं आसीनायान्वाह स यदेवैनं तदनुव्याहरेत् तिर्यङ् तेनं गर्भं आगच्छे-द्धिंसिष्यतीति[2] तस्मात् प्राङासीनः प्रतीचीनायैवासीनायान्वाह[3] प्राङ् वै प्राणः प्राणमेवास्मिन् दधाति तां त्रिरेवं[4] कृत्वोऽनुब्रूयात् त्रयः[5] प्राणाः प्राणो व्यानोऽपानस्तानेवास्मिन् दधाति तां[6] द्विरेवं[7] कृत्वोऽनुब्रूयाद् द्वौ हि प्राणश्चापानश्च प्राणापानौ एवास्मिन् दधाति तां सकृत् समस्योत्तमतो-ऽन्वाहैको हि प्राणः प्राणमेवास्मिन् दधाति ॥

॥ इत्युपनयनब्राह्मणम् ॥

(पराञ्चि खानि व्यतृणत् स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्); AitU. III. 3 (तदेतदभिसृष्टं पराङत्यजिघांसत्), and Burnell's note on JUB. 1. 2. 4.

1 केन Brl. तेन T.

2 ०सिष्यतीति Brl.

3 आह Brl.

4 on त्रिरेव see Schroeder's note. T. p. 23. एवां Brl. Cp. ०तत्सवितुरिति सावित्रीं त्रिरन्वाह KGS. 41. 20; TA. 2. 11. 247; पच्छोऽर्धर्चशः सर्वां च तृतीयेन सहानुवर्तयन् PGS. 2. 3. 206; ओं भूर्भुवः स्वरित्युक्त्वा तत्सवितुरिति सावित्रीं त्रिरन्वाह पच्छोऽर्धर्चशः सर्वामन्तत इति । लौगाक्षि quoted by गदाधर in PGS. p. 209. सावित्रीं पच्छोऽर्धर्चशो व्यस्तां समस्तामध्यापयेत् VGS. p. 2. 6. See also GGS. 2/ 10. 39; BGS. 2. 5. 40; JGS. 1. 12. 13; HGS. 1. 6. 11. 1. 8. 4; अथैनं बद्धमेखलमाहितसमित्कं सावित्रीं वाचयति । पच्छः प्रथमम् । ततो-ऽर्धर्चशः । ततः संहिताम् । KauS. 56. 8—11; AGS. 1. 22. 5; APGS. IV. 11. 10.

5 Cf. KS. XIX. 11: 14. 3; XXXVII. 1: 45. 12; PVB. 1. 22. 3. 3. Śāṅkh Br. XIII. 9. For the meaning of प्राण and अपान see Deussen, Philosophie der Upanishaden, pp. 249. 251; pp. 276. 279. For व्यान see Eggling, SBE. XIII, 263, n. I; Kieth, AA. p. 217. For the list of ten prāṇas see JUB. 2. 2. 3.

6 Accent mine. ता० Caland.

7 द्विरेवनु T. द्विरेवर्गत्वो० Brl.

श्राद्धब्राह्मणम्* ॥ ८ ॥

असुराणां वा इमे लोका आसंस्ते[1] देवा[2] अब्रुवन् यो वै[3] यं[4] लोकमुज्जे-[5]ष्यति स तस्मै भविष्यतीति ते वसव[6] इमं लोकमजयन्नन्तरिक्षं रुद्रा दिवमादित्यास्ते वसव इमं लोकं जित्वान्तरिक्षं परापतंस्ते[7] रुद्रानब्रुवन् यन्नो जयेम

* See Caland, Versl. en. Meded. etc. pp. 493–495; V. Schroeder, Die Tubingen Katha Handschriften p. 26; Lp. 133–35; U. pp. 112–116. The marginal note of U does not seem faithful to the text, because it gives श्राद्धब्रा०, where in reality there are pitṛsūktāni of RV. U. and Lp. do not mark accent.

1 आसांस्ते Lp. U. For the insertion of *s* see Macdonell, Vedic Gr. 69; Whitney Skt. Gr. 70; Wackernagel, Altind. Gr. 330. Lengthening of Vowel seems after the analogy of वृकान् where वृकान्=vulfrans is one word.

2 देवानब्रुवन् Lp. U.

3 व U.

4 यल्लोक० U.

5 ०मुज्जेष्यति T.

6 व सर्वे Lp. वसवा U. For lengthening of Vowel cf. पशवा उपतिष्ठन्ते MS. 1, 6, 5: 13. 14; पशवा उपतिष्ठेयुः MS. 1, 10, 7: 147, 4; पशवा ओषधीषु MS. 1, 10, 7: 147, 20 For Vasu (वसवो रुद्रा आदित्यास्तेषामेतज्ज्योतिरग्रं यदसावादित्यः JB. 2. 240.) JAOS 18 p. 34.) see कतमे वसव इति । अग्निश्च पृथिवी च वायुश्च etc. ŚB. 11. 6. 3. 6; JB. 2. 77. (JAOS. 15. p. 239): ŚB. 14. 6. 9. 4 (=Bāu. 3. 9. 4 Mādhy.=3 Kāṇva.). Oertel, Synt. of Cases etc. p. 14. See also अष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशद् इन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशादिति. ŚB. 11. 6. 3. 5; 14. 6. 9. 3. (=Bau. 3. 9. 3 Mādhy.=2 Kaṇv.)

7 परापतांस्ते U.

तन्नः सहासदिति ते वसवो रुद्राश्चान्तरिक्षं जित्वा दिवं परापतंस्ते[1] आदि-
त्यानब्रुवन् यन्नो जयेम तन्नः सहासदिति[2] ते वसवो रुद्राश्चादित्याश्चामुं लोकं
जित्वैमानेव लोकानसुरानभ्यभवं[3]स्ततो देवा अभवन् परासुरा अभवन् वसवः
पितरो रुद्राः पितामहा आदित्याः प्रपितामहा[4]स्तस्मादाहुर्देवाः[5] पितरः पितरो
देवा इति ये[6] वै देवानां सोमपाः[7] पितरस्तानुदपात्रैस्तर्पयन्ति तस्मात्त्रि[8]रेक-
स्यापः प्रदीयन्ते द्विरेकस्य सकृदेकस्य तत् षट् संपद्यते यथाजितमेवोपल-
भन्ते[9] यदन्नान्तमुदकं संपिबन्ति तत् सप्तमं[10] यदुभयतोमूलै[11]स्तिलमिश्रं तदष्टमं
यत्पात्र्या पिण्डपरिषेकस्तन्नवमं यदुदकुम्भं दक्षिणां[12] प्रोहन्ति तद्दशमं तेन
दशोदकं[13] श्राद्धमुच्यते तद्दश दशाक्षरा विराडन्नं विराड् विराज्येवान्नाद्ये प्रति-
तिष्ठति ॥ १ ॥

1 परापतां त U.

2 'ásat' subjunctive sing. from √as = to be. Cf. Macdonell, Vedic. Gr. for Students p. 37.

3 ०भ्यभूवां० U.

4 तथा च श्रुतिः वसवः पितरो रुद्राः पितामहा आदित्याः प्रपितामहा इति Śrāddhavidhi, a MS. work in the Lalchand Library, Lahore p. 4.

5 Cf. KS. 4. 14: 39. 5; MS. 1. 4. 11: 60. 6; TB. 3. 46. 4; देवाः पितरः पितरो देवा योऽहमस्मि स सन्यजे । यस्यास्मि न तमन्तरेमि इति Adhvaramīmāmsā Kutūhalavṛtti on Jaiminīyasūtra 1. 2. 73. p. 24; त एते पितरो देवा देवाश्च पितरस्तथा Skandap. 5. 58. 10; See also Vāyup. Vol. II. 13. 51; BrMp. 3. 11. 90.

6 So T. and U. यो Lp. and Caland.

7 सोमपः Lp. U.

8 तस्य त्रि० T. Cf. केचिद्ब्राह्मणदर्शनात् तस्मात्त्रिरेकस्यापः प्रदीयन्त इति यथा कुर्वन्ति. KGS. 63. 5. Ādityadarśana.

9 Broken in T. जितोमेवोपालभन्ते Lp. जितमेवोपालम्भन्ते U. ०पालभन्ति St.

10 सप्तमो U.

11 ०मूलै० T.

12 दक्षिणं T.

13 Cf. तथा च स्मृतिः—

अद्य शब्दे त्रयः पाद्ये माता पितामही तथा ।
प्रपितामह एतानि त्रयः पाद्येऽर्घ्यंषड्विधिः ॥
वसुरुद्रादित्याश्चैव श्रुत्येतिवचनाद् ध्रुवम् ।
इत्युक्ते परिभाषार्थे ब्राह्मणाद्विधिरिष्यते ॥
पितृपात्रे सकृन्मन्त्रं द्विकावन्तं पितामहे ।
प्रपितामहे त्रिकावन्तं एतदर्घ्यं च भेदकम् ॥
अर्घ्यान्तं सप्तमं ज्ञेयमष्टममवनेजनम् ।
ऊर्जोदकं च नवमं दशमं दक्षिणोदकम् ॥
एतद्दशोदकं श्राद्धं कुर्याद्यत्नेन मानवः ॥"

Śrāddhavidhi a MS. work in the Lalchand Library, Lahore, p. 9. Cp. also न च तथा दशोदकं भवति. KGS. 63. 5. Ādityadarśana. Between

पितरो वै पुत्रं जायमानमन्वायन्नस्माकं श्राद्धं कुर्यादिति सोऽब्रवीत् कदाहं श्राद्धं करवाणीति तेऽब्रुवन् हस्तिछायायां श्राद्धं दद्याद्यः* कामयेत न

श्राद्धमु······प्राचीनप्रवणे देयं the text is hopelessly broken in T.

1 Hasta, a nakṣatra. Performing of śrāddha under the *hasta* nakṣatra.

For हस्तिच्छाया cf:—

ऋदये पित्र्ये यदा चन्द्रो हंसश्चापि करे व्रजेत्।
त्रयोदशी तु सा छाया विज्ञेया कुंजरोद्भवा ॥
पित्र्ये यदा स्थितश्चेन्दुर्हंसश्चापि करे स्थितः।
तिथिर्वैश्रवणी या च सा छाया कुंजरस्य च ॥
सैंहिकेयो यदा चन्द्रं ग्रसते पर्वसन्धिषु ।
हस्तिच्छाया तु सा ज्ञेया तस्यां श्राद्धं समाचरेत् ॥
वनस्पतिगते सोमे या छाया पूर्वतोमुखी ।
गजच्छाया तु सा ज्ञेया पितृणां दत्तमक्षयम् ॥

Skandap. Nāgarakhaṇḍa 220, 42-46. See also Skandap p. 6. 220, 45, 65 and 76. The above ślokas are quoted in PGSP. p. 533.

अपि नः स्वकुले भूयाद्यो नो दद्यात्त्रयोदशीम् ।
पायसं मधुसर्पिर्भ्यां प्राक्छाये कुंजरस्य च ॥

Manu. 3. 274. Last pāda = वर्षासु च मघासु च in Skandap. 6. 218. 17 and Brp. 220. 31.

घृतेन भोजयेद्विप्रान् घृतं भूमौ समुत्सृजेत् ।
छायायां हस्तिनश्चैव दद्याच्छ्राद्धं न शोचति ॥

Vāyup. Vol. II. 18. 45; VMp. 3. 17. 44. So quoted in Caturvargacintāmaṇi 5. 246, but the printed text of the Purāṇa reads गयायां हस्तिनश्चैव.

योगो मघात्रयोदश्योः कुंजरच्छायसंज्ञकः ।
भवेन्मघायां संस्थे च शशिन्यर्के करः स्थितः ॥
हंसे हंसस्थिते या तु अमावास्या करान्विता ।
सा ज्ञेया कुंजरच्छाया इति बौधायनोऽब्रवीत् ॥

सैंहिकेयो यदा सूर्यं ग्रसते पर्वसन्धिषु ।
गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ॥

Quoted from Brahmapurāṇa in Caturvargacintāmaṇi 5. 246, but are not found in the printed text.

वनस्पतिगते सोमे छाया तु प्राङ्मुखी भवेत् ।
गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ॥

Quoted from Brahmapurāṇa in Caturvargacintamāṇi, but is not found in the printed text.

यदेन्दुः पितृदेवत्ये हंसश्चैव करे स्थितः ।
तिथिर्वैश्रवणी या च गजच्छायेति सा स्मृता ॥

Quoted from Skandap. in CVC. 5. 246, but is not found in it. This shows that either (a) scholars relied more on memory than on books, and their quotations when uncorroborated are untrustworthy (b) or the current editions of the Purāṇas are unreliable. For the practice of quoting from memory cp. M. Müller, Preface to the 1 Vol. of the 1st edition of RV. P. XXVI.

अपि नः स्वकुले जायाद्यो नो दद्यात्त्रयोदशीम् ।
मघासु सर्पिःसंयुक्तं पायसं दक्षिणायने ॥
आजेन वापि लौहेन मघास्वेव यतव्रतः ।
हस्तिच्छायासु विधिवत् कर्णव्यजनवीजितम् ॥

MBh. Anu. 89. 12-13.

व्यतीपातो गजच्छाया ग्रहणं चन्द्रसूर्ययोः ।
श्राद्धं प्रतिरुचिश्चैव श्राद्धकालाः प्रकीर्तिताः ॥

Yājñavalkyasmṛti 1. 218

सूर्ये हस्तस्थिते या तु मघायुक्ता त्रयोदशी ।

पुनर्दद्यादिति हस्ती वै भूत्वा स्वर्भानुरमुमादित्यं[2] छाययाभ्यभवत् तं देवपितर आप्याययन्नेतद्वै[3] देवपितॄणामायतनं यद्धस्तिच्छाया[4] तस्माद्धस्तिच्छायायां श्राद्धं[5] दद्याद्यः कामयेताक्षय्यमपरिमितमनन्तं भूयः स्यादित्यक्षय्यमेवा[6]परिमितमनन्तं भूयो भवति य एवं विद्वान्[7] हस्तिच्छायायां श्राद्धं ददाति पितॄणामक्षय्यत्वाय[8] ॥ २ ॥

द्वौ[9] वै पन्थानौ देवयानश्च पितृयानश्चाग्निहोत्रेण वै देवाः स्वर्गं लोकमायन् पितृयज्ञेन पितृलोकं तस्मादुभौ यष्टव्यौ देवयानश्च पितृयानश्चोभाभ्यां वा एतत्स्वर्गं[10] लोकमेत्याहुरन्यस्मिंल्लोके समिधा[11] प्रत्यतिष्ठन्नाद्यं च

तिथिर्वैश्रवणी या तु सा छाया कुंजरस्य च ॥
हंसे करस्थिते या तु अमावास्या करान्विता ।
सा ज्ञेया कुंजरच्छाया इति बौधायनी श्रुतिः ॥
PGSP. p. 533

See also Gobhilapariśiṣṭa Vol. I. 7. 8: 191.

आर्द्रामघारोहिणीषु द्रव्यब्राह्मणसङ्गमे ।
गजच्छाया व्यतीपाते विष्टिवैधृतिवासरे ॥
Matsyap. 17. 2

छायायां कुंजरस्यापि नदीकूलद्रुमे तथा ।
चाण्डालादिप्रहीणे तु प्रेतकार्यं समाचरेत् ॥
MVarāhap. 188. 22.

गह्वरेषु नितम्बेषु छायायां कुंजरस्य च ।
महीगतान्तरन्यस्तगजच्छायासु पार्थिव ॥
Viṣṇudharmottarapurāṇa. 145. 19.

2* दद्याद्यत्काम॰ Lp.

1 दद्यामिति U.

2 मादित्यां छायया॰ U. Cf. तथा च कठब्राह्मणम् "हस्ती वै भूत्वा स्वर्भानुरंशुमिरादित्यं तमसा पिदधाति" इति। Govindānanda, Śuddhikaumudī, Asiatic Society of Bengal ed. p. 279 (मलमासनिषिद्धानि). Mark the great difference between this and the text. Perhaps the quotation is from some upaśākhā of the Kāṭhakas.

3 ॰न्नेतद्वै व U.

4 ॰च्छायया U.

5 श्राद्धान्द॰ U.

6 ॰क्षयमेवा॰ U. Cf. तदस्याक्षय्यमपरिमितं भवति KS. 31. 15; 18. 8; MS. 1. 8. 6: 124. 5.

7 vidvāṇ Caland. Obviously a misprint.

8 ॰मक्षयत्वाय U.

9 Cf. द्वे वाव स्रुती इत्याहुर्देवानां चैव पितॄणां चेति ŚB 12. 8. 1. 21; द्वे स्रुती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम् । Bṛu. 6. 2. 2. See ChU. 3. 4. 15. 5; Śaṅkara on Vedānta S. III. 1. 17. For the relation of कर्म and ज्ञान in Śaṅkara's view see his comm. on TU. 1. 12.

10 ॰मेतं स्वर्गं U. Cf. देवता वा एतत्स्वर्गं लोकम् MS. 1. 4; 43. 12; KS. 32. 3; 21. 13 and 17.

11 समिध U. Lp.

ब्राह्मणेभ्यो ऽपासर्ँस्तेभ्योऽब्रुवन्नग्नौ कुर्माग्नौ[1] करिष्याम्यग्नौ करवाणीति[2] तेऽब्रु[3]-
वन् कुरुत कुरुष्व क्रियतामिति यं[4] कामयेत प्रजावान् स्यादिति तस्य यज्ञे
कुरुतेति ब्रूयाद्यं कामयेत पशुमान् स्यादिति तस्य यज्ञे कुरुष्वेति ब्रूयाद्यं
कामयेत वसीयान् स्यादिति तस्य यज्ञे क्रियतामिति ब्रूयादग्नीषोमीयं वा
एतद्धविर्यदग्नौ करणमग्नीषोमीयेनैवैतद्धव्येनास्मिँल्लोके[5] यजमानो वसीयान्
भवति ॥ ३ ॥

मनो वा एष युङ्क्ते यो यक्ष्यमाणो युक्तेन[6] हि मनसा यज्ञस्तायते[7] स
यज्ञो भवत्यथ श्रद्धत्ते श्रद्दधानं वै पितरोऽन्वायन्ति वृद्धिं[8] श्रुत्वा यद्वृद्धि-

1 कुर्वं॰ U. कुर्वा॰ Lp.

2 Cf. ĀśGS. IV. 7. 18-19. See अहमग्नौ करिष्यामि होमं etc. Skadap 6. 224. 26; अग्नौ करिष्य इति तैः कुरुष्वेति च चोदितः । Brp. 219. 62; Mārp. 28. 46; Vāyup. Vol II. 13, 69; BrMp. 3. 11. 108; Yājñavalkya 1. 236. etc.

3 तेभ्योऽब्रु. U.

4 The scribe of U does not know whether it is यः or यं. He puts both jihvāmūlīya and ङ् on क्.

5 Accent mine. ॰नास्मिं Caland. Cf. अमृतमेवास्मिंस्तद्.

6 So U. युङ्क्ते Caland. यक्ष्यमाणो युक्तेन seems better. Cf. युक्तेन मनसा वयम्. KS. XV. 11. 217. 6; युञ्जानः प्रथमं मनः KS. XV. 11. 217. 4; युक्तेन मनसा वयमिति मन एवैतदस्मै कर्मणे युङ्क्ते न ह्ययुक्तेन मनसा किञ्चन सं प्रतिशक्नोति कर्तुम् ŚB. 6. 31. 12-14; 3. 5. 3. 11; 6. 3. 14; See also ŚB. 4. 6. 9, 31; मनसा यज्ञं तत्त्वा. KS. XXXII. 7: 26. 3 and 5; MS. 1. 4. 10. 48: 14; युङ्क्ते न हि Lp.

7 तायति U. Lp.

8 वृद्धिं Lp. For वृद्धिश्राद्ध see तृतीयमाभ्युदयिकं वृद्धिश्राद्धं तदुच्यते । उत्सवानन्दसंभारे यज्ञोद्वाहादिमङ्गले ॥ Mal. p. 17. 65. वृद्धौ समर्चयेद्विद्वान् नित्यं नान्दीमुखान् पितॄन् । वृद्धिश्राद्धेषु कर्तव्यास्तिलस्थाने यवास्तथा ॥ VDUP. 142. 15. Besides the regular offerings which are prescribed for the fathers, there are others which are to be performed on special occasions, such as the birth of a son, a marriage, and the giving of the name to the child. In this case the offering or श्राद्ध, which bears its name of that which is connected with 'श्रद्धा' (=faith) from the fact that the presents to the Brahmaṇas which accompany the offerings to the dead reveal the faith of the offered in the Brahmaṇas, is to be performed on the waxing half of the month and before midday: the number of

श्राद्धं कुर्वन्ति तेनास्य ते ऽभीष्टाः प्रीता भवन्तीन्द्रो वै प्रजाकामः पितृयज्ञे-
नायजत् तस्यासुरा यज्ञमजिघांसं[1]स्तान् विश्वेदेवा[2] उपाघ्नन् यद्वैश्वदेवं पुर-
स्तात् कुर्वन्त्यसुराणामपहत्यै[3] प्राचीनप्रवणे[4] दैयं[4] प्राचीनप्रवणो वै वज्रो
वज्रेणैवं यज्ञाद्रक्षांस्यपाहन्ति दक्षिणाग्राश्चो[5]दगग्राश्च दर्भा भवन्ति दक्षिणा-
ग्रेभिर्वा अस्य पितरः[6] समुपसरन्त्युदगग्रेभिर्देवास्तस्माद् ब्राह्मणेभ्य आवृत्ता
दर्भाः[7] प्रदीयन्ते पितृणामुप[8]सरत्वायैवमस्य पितरः समुप[9]सरन्त्यन्तर्हिता

Brahmaṇas is even, not as usually odd. The performers are from left to right not vice versa; barley replaces sesame; the milkmeal lumps are mixed with sour milk and roasted grains, and the Fathers are addressed as नान्दीमुख joyful in countenance' in place of 'with tearful countenance which is elsewhere not rarely used. These rank as Vṛddhiśrāddhas. Similar to these are Pūrtaśrāddhas at the dedication of wells, pools and so on. Cp. Keith, Rel. and Phil. 427.

1 ०जिघांसां० U.

2 वैश्वदेवा Lp.

3 ०मुपहत्यै Lp.

4 प्राचीनप्रवणो देवः Lp. दीयं U.

5 दक्षिणाग्राचोदगग्राच. T.

6 द्वौ वाव लोकावित्याहुर्देवलोकश्चैव पितृलोकश्चेत्युत्तरान्या भवति दक्षिणान्योत्तरो वै देवलोको दक्षिणः पितृलोक उत्तरयैव देवलोकमवरुन्द्धे दक्षिणया पितृलोकम् । ŚB. 12. 7. 3. 7. 3. 1. 1. 2. 1. 2. 3. 17. AŚS. 9. 11. 9. दक्षिणाप्लवणे देशे दक्षिणाभिमुखस्य च । दक्षिणाग्रेषु दर्भेषु एषोऽन्यत्र विधिः स्मृतः ॥ Karmapradipa 1. 4. 66. See HKGS. p. 73; GGS. 4. 2. 24; ApGS. 1. 1. 14. Vāyup. Vol. II. 14. 34.

7 For दर्भ see Eggling, SBE. XII. 84. Zimmer. Altind. Leben p. 70. बर्हिः is the same what later on came to be termed as कुश or दर्भ. At the most no difference in Gobhila Gs 1. 5. 16 विशाखानि प्रतिलूनाः कुशा बर्हिः, but 1, 8. 27 shows that a handful of बर्हि is named कुशा. With all the three we find the verb √स्तृ बर्हिरास्तीर्य AśGS. 4. 2. 15; दर्भमुष्टिं स्तृणोति GobhGS. 4. 2. 20; दर्भानास्तीर्य GobhGS. 1. 6. 13; 7 1; दर्भान् संस्तीर्य ApGS. 1. 16; स्तरणशेषकुशेषु PārGS. 2. 17. 13; कुशानास्तीर्य PārGS. 3. 5. 2; AśGS. 2. 8. 15. GobhGS. 4. 2. 24. etc. Cp. Geldner. Ved. Stud. I. p. 153. आवृत्त=turned (=brought hither). Cf. आवर्वृततीरधनु द्विधारा (RV. 10. 30. 10) इत्यावृत्तासु (अवृत्तासु Aufrecht wrong) एकधनासु. AB. 2. 20. 3; KB. 12. 1. The comm. to AB. glosses आवृत्तासु एकधनासु by यदा जलसमीपादावर्तन्ते. Cf. Oertel, Synt. of Cases etc, I. p. 236.

8 ०मुपास० U. Lp. T.

9 ०मुपा० U. Lp. T. Last four lines

ह्यमुष्मादादित्यात्पितरोऽथो अन्तर्हिता हि देवेभ्यश्च मनुष्येभ्यश्च पितर उपमूलं बर्हिर्दाति[1] तेन पितॄणां यद्दतमूलं तेन देवानामुभये हीज्यन्ते[2]ऽन्तर्हिता हि वीक्षया[3] मनुष्यस्यैवमिव[4] हि तेऽन्तर्हिता[5] भवन्ति[6] ॥ ४ ॥

॥ इति श्राद्धब्राह्मणम् ॥

---

are broken in T. अन्तर्हितो हि पितृलोको मनुष्यलोकात् । TB. 1. 6. 8. 57.

1 ददाति U. Lp. काठके च उपमूललूनं बर्हिरिति KŚS. Comm. 8. 20: 511. 9; समूलं बर्हिर्दाति उपमूललूनं वा AŚS 8. 13. 11. 12; उपमूलं बर्हिर्दाति KS. XXXVI. 12: 78; 19; cf. TB. 1. 6. 8. 58; KauS. 1. 22; ŚB. 2. 4. 2. 17; अथोपमूले दितानि सकृदाच्छिन्नानि भवन्ति अग्रमिव वै देवानां मध्यमिव मनुष्याणां मूलमिव पितॄणां तस्मादुपमूले दितानि भवन्ति ŚB. Kaṇva 1. 3. 3. 14; 1. 6. 1. 11. उपमूलं सकृदाच्छिन्नानि etc. KŚS. 4. 1. 11: 291. उपमूले तथा लूना (नीलाः which is perhaps wrong) Vāyup. Vol. II. 13. 39. उपमूलादधो लूनैः etc. VDUP. 92. 25. दक्षिणाग्रांस्ततो दर्भांल्लूनाँश्चैवोपमूलतः VDUP. 140. 27. 5. KP. Comm. 1. 2. 33; PGP. p. 449. GGS. 4. 2. 20; AśGS. 2. 5. 2. JGS. 2. 1: 25. अन्तर्हितो हि पितृलोको मनुष्यलोकात् । यत्परुषि दिनं तद्देवानाम् । यदन्तरा तन्मनुष्याणाम् । यत्समूलं तत् पितृणाम् । समूलं बर्हिर्भवति व्यावृत्त्यै । TB. 1. 44. 7.

2 हेज्यन्ते. U. Lp. स्वारत is marked in U. दक्षिणतो निरुप्यं दक्षिणा हि पितॄणामुभयतो निरुप्यमुभये हीज्यन्ते KS. 36. 11, 78. 6, and 9; उभये हि देवाश्च पितरश्चेज्यन्ते AśŚS. 8. 13. 5; TB. 1. 6. 8. 5; 1. 6. 9. 1.

3 वीक्षया U. Lp.

4 मानुष्यस्येव. U. मानुष्यै T. मनुष्यस्यै० Lp. Here also स्वरित is marked in U.

5 ०न्तर्हिता हि Lp.

6 अन्तर्हिता ह्यमुष्मा......हीज्यन्ते KS. 36. 12: 78. 17-19.

अशीतिभद्रम्* ॥ १ ॥

भद्रो नो अग्निः सुहवो विभावसुर्भद्र[1] इन्द्रः पुरुहूतः[2] पुरुष्टुतः ।
भद्रः सूर्य उरुचक्षा उरुव्यचा भद्रश्चन्द्रमाः समिथेषु[3] जागृविः ॥
भद्रः प्रजा अजनयन्नः[4] प्रजापतिर्भद्रः सोमः[5] पवमानो वृषा हरिः ।
भद्रस्त्वष्टा विदधद्रूपाण्यद्भुतो भद्रो[6] धाता वरिवस्यतु प्रजाः ॥
भद्रस्तार्क्ष्यः[7] सुप्रजास्त्वाय[8] नो महानरिष्टनेमिः[9] पृतना युधा जयन् ।
भद्रो वायुर्मातरिश्वा नियुत्पतिर्वेनो गयस्फान उशन् संदास्तु नः ॥
भद्रो मित्रो वरुणो रुद्र इद् वृधा भद्रोऽहिर्बुध्न्यो भुवनस्य रक्षिता ।
भद्रो नो वास्तोष्पतिरस्त्वमीवहा[10] भद्रः[11] क्षेत्रस्य पतिर्विचर्षणिः[12] ॥
भद्रो विभुर्विश्वकर्मा बृहस्पतिर्भद्रो द्विषस्तपनो[13] ब्रह्मणस्पतिः ।
भद्रः सुपर्णो अरुणो[14] मरुत्सखा भद्रो[15] नो वातो अभिवातु भेषजी[16] ॥१॥

* (1) See Caland, Versl. en. Meded etc. p. 496–98 where it is accented. (2) U. p. 10–14. (3) H. 5–6. (4) Lp. 9–10 U. H. and Lp. do not mark accent.
Cf. KS. 39. 15: 133. 14.

1 भद्रा U.
2 पुरो॰ U. उपध्मानीय before प in H.
3 समितिषु U.
4 उपध्मानीय before प in U.
5 See 4.
6 So Caland. भद्र नो U. भद्रो नो H. and Lp.
7 तार्क्ष्यो U.
8 ॰जस्त्वाय U. Lp.
9 See 4.
10 वास्तुष्पति U. Lp.
11 भद्रा क्षत्रस्य U.
12 ॰तिविच॰ H. Lp.
13 ॰षस्ताप॰ U.
14 ॰णोत्मरुत्सखा U. ॰सखा Lp.
15 भद्रा U.
16 भेषजे. U.

भद्रो दधिक्रा वृषभः[1] कनिक्रदद् भद्रः पर्जन्यो बहुधा विराजति ।
भद्रः सरस्वाँ उत नः सरस्वती भद्रोर्वशी[2] भद्र[3] इन्द्रः[3] पुरूरवः ॥
भद्रो नः पूषा सविता यमो भगो भद्रोऽज एकपादर्यमा मनुः ।
भद्रो विष्णुरुरुगायो वृषा हरिर्भद्रो विवस्वाँ अभिवातु नस्त्मना[4] ॥
भद्रा गायत्री ककुबुष्णिहा विराड् भद्रानुष्टुब् बृहती पङ्क्तिरस्तु नः ॥
भद्रा नस्त्रिष्टुब् जगती पुरुप्रिया भद्रातिच्छन्दा बहुधा विभ्वरी[5] ॥
भद्रा नो[6] राकानुमतिः कुहूः सुहृद् भद्रा सिनीवाल्यदितिर्मही ध्रुवा ।
भद्रा नो द्यौरन्तरिक्षं[7] मयस्करं[7] भद्रोऽशो[8] दक्षस्तनयाय[9] नस्तुजे[10] ॥
भद्रो नः प्राणः सुमनाः[11] सुवागमद्[12] भद्रो अपानः सतनोः[13] सहात्मना ।
भद्रं चक्षुर्भद्रमित्[14] श्रोत्रमस्तु नो भद्रं न आयुः शरदो असच्छतम्[14] ॥ २ ॥
भद्रेन्द्राग्नी नो भवतामृतावृधा भद्रा नो मित्रावरुणा धृतव्रता ।
भद्राश्विना नो भवतां[15] नवेदसा भद्रा[16] द्यावापृथिवी विश्वशम्भुवा ॥
भद्रा न इन्द्रावरुणा रिषादसा भद्रा न इन्द्रा भवतां[17] बृहस्पती[18] ।
भद्रेन्द्राविष्णू सवनेषु[19] या[19] वृधा भद्रेन्द्रासोमा युधि दस्युहन्तमा ॥
भद्राग्नाविष्णू विदथस्य प्रसाधना भद्रा नोऽग्नीन्द्रा वृषभा दिवस्पती ।
भद्रा नो अग्नीवरुणा प्रचेतसा भद्राग्नीषोमा भवतां[20] नवेदसा[20] ॥
भद्रा सूर्याचन्द्रमसा कविक्रतू[21] भद्रा सोमा भवतां पूषणा नः ।

1 ०भा U.
2 So U. H. भद्रो वशी Caland. and Lp. U. and H. seem correct.
3 भद्रा इन्द्रा U.
4 So Caland and Lp. नात्मना U. and H.
5 So all the Mss.
6 नु Lp.
7 ०क्षमयस्करद् U.
8 ०दंशो U.
9 ०क्षस्तुन० Lp.
10 नस्तुजी U.
11 ०मनः U.
12 सवा० Lp.
13 ०तनुः U.
14 No accent on इत् ०च्छताम् H. असशकृतम् Lp.
15 ०तानुवे० U.
16 So all the Mss. भाद्रा Caland. Apparently a misprint.
17 भवतम् U.
18 ०स्पति H.
19 ०नेष्वया० Lp.
20 ०वनानुवे० U.
21 So Caland, U and Lp. भद्रस्सूर्यश्चन्द्रमसा कविक्रतुर् H.

भद्रेन्द्रवायू[१] पृतनासु सासही[२] भद्रा[३] सूर्याग्नी अजिता धनञ्जया ॥
भद्रा नः सन्तु वसवो वसुप्रदा[४] भद्रा रुद्रा वृत्रहणा पुरन्दरा ।
भद्रा आदित्याः स्वपसः सुनीतयो भद्रा राजानो मरुतो विरप्शिनः ॥३॥
भद्रा न ऊमाः सुहवाः[६] शतश्रियो विश्वेदेवा मनवश्चर्षणीधृतः[८] ।
भद्राः[९] साध्या अभिभवः स्वरचक्षसो भद्रा नः सन्त्वृभवो[१०] रत्नधातमाः[११] ॥
भद्राः सर्वे वाजिनो वाजसातयो भद्रा ऋषयः पितरो गभस्तयः ।
भद्रा भृगवोऽङ्गिरसः सुदानवो भद्रा गन्धर्वा[१२] अप्सरसः सुदंससः ॥
भद्रा आपः शुचयो[१३] विश्वभृत्तमा भद्राः[१३] शिवा यक्ष्मन्नुदो[१४] न ओषधीः ।
भद्रा गावः सुरभयो वयोवृधो भद्रा[१५] योषा[१५] उषतीर्देवपत्नयः[१६] ॥
भद्राणि सामानि सदा भवन्तु नो भद्रा अथर्वाण[१७] ऋचो यजूंषि नः[१८] ।
भद्रा नक्षत्राणि शिवानि विश्वा भद्रा आशा अहुताः सन्तु नो हृदि ॥
संवत्सरा न[१९] ऋतवो मयोभुवो यवा[२०]* आयवाः *[२१]स्वसराण्युत क्षपाः ।

1 ०न्द्रवायु U. न्द्रावायू Lp.
This does not occur in KS.

2 सासहि U. ०नास्वसासही Lp. ०नासु सासहिर् H.

3 भद्रस्सू० No accent on सू. H.

4 वसुप्रजा U, H and Lp.

5 स्वनी० H.

6 सुहवा. विसर्जनीय is wanting in U.

7 मनवाश्च० U. मनवश्चार्ष० Lp.

8 चर्षणिधृतः Caland. चर्षणिधृतः does not occur in KS.

9 भद्रा साध्या Caland.

10 सन्त्यृभवो U.

11 ०धातमा U. ०धातमः H.

12 गन्धर्वाप्सरसः Lp. In U. अ is given below the Line.—

13 Accent on शु Caland. So Lp. भद्रा शिवा Caland.

14 यक्ष्मंनुदः Caland. यक्ष्मन्नोदो U. यक्ष्मानुदो H.

15 यद्र योष उशती० H. भद्रायुषा ओषती U.

16 No accent on उशती in any Ms. Cf. देवपत्नय Agnyādheyabr. p. 14.

17 अथर्वानो U.

18 णः H.

19 ण U. Cf. बर्हिर्णिदधाति PVB. XVII. 12. 2; Oertel, Disjunct use of cases p. 311.

For the change of dental *n* to lingual ṇ after the *r* of a preceding word cf. RV. 3. 36. 7. समुद्रे ण (समुद्रेण is wrong) Bloomfield, JAOS. 27, p. 77, and see the references quoted by Oldenberg, Ṛgveda Noten, to this passage; JB. 1. 208. 6 पुनर्हण्यात्; KS. 28. 8: 163. 1, where Caland and Schroeder emend the Ms. reading र्णिवीर्य and अणिवीर्य to निवीर्य and अनिवीर्य, probably because KS.

मुहूर्ता काष्ठाः[1] प्रदिशो दिशश्च सदा भद्राः[2] सन्तु द्विपदे चतुष्पदे ॥

elsewhere (10. 7: 133. 17: 12. 3; 164. 21; 24. 6: 95. 16; 29. 2: 170. 2) reads निर्वीर्य without any variant: MS. 1. 8. 7: 125. 1. where अग्निहोत्रेण of Schroeder is emended by Caland (WZKM. 23. p. 53) to अग्निहोत्रे ण=KS. 6. 6: 64. 15. See also MS. 1. 6. 10: 102. 8. PW. Nächtrage 5 p. 244. col. 3 assumes an amṇah by the side of amnaḥ, which is unnecessary. Cf. also MS. 1. 10. 10: 150. 12; KS. 8-8: 92. 11. See Wackernagel, Altind. Gr. I. p. 191. Oertel, Synt of Cases etc. I. p. 311.

20* So Caland and U. युवा आयुवा० H. Lp.

(a) Cf. TS. 4. 4. 7. 2. यावा अयावा एवा ऊमा सब्दः सगरः सुमेकः (यावायाः षट्शब्दा वसन्ताद्यृतुवाचिनः सुमेकशब्दः संवत्सरवाची Comm.) KS. 12. 5; MS. 2 8. 13. 18 both agree in inverting एवाः and ऊमाः. KS. has यवाः आयवाः, MS. यवा अयवाः both have अब्द For the mysterious सब्द. It is found in ŚB. 1. 7. 2. 26. as शब्दम् in the Kāṇva recension and as सब्दम् in the माध्यन्दिन; ŚB. has सगरा for a feminine as 'night' see Eggling SBE. XII. 199. Keith. The Veda of Black Yajus School p. 347.

(b) TS. IV. 3. 9. 9. यावानां भागोस्यायावानामाधिपत्यम्. KS. MS. and VS. agree in अयव and यव and the two halves of the month, the dark and the light half are said to be meant by महीधर, but according to TS. V. 3. 4. the months are the यावाः the half months the अयावाः. Cf. Veda. Index II. 162. 187; Keith, Veda of Black Yajus. p. 333.

(c) TS. IV. 3. 10. 17. यावानामयावानामाधिपत्यमासीत्. All the other texts have यवाः and अयवाः. As usual the Comm. here explains as 'months' and 'half months' which is the view of TS. as opposed to the distinction of the light and dark halves of the month. Cp. Keith, Veda of Black Yajus. p. 333.

(d) The यावाः are the months, the अयावाः are the half months. The same account of the यावाः and अयावाः is taken in KS. XX. 12, XXI. 2. In VS. and ŚB. VIII. 4. 2. 11. the sense is that of the two halves of the month. See Vedic Index II. 162; Keith. 422. See also य एव देवानामासीत् सोऽयवा नहि तमसुरा अयुवत योऽसुराणां स यवा युवत हि तं देवाः ŚB. V. 5. 26. See Sāyaṇa upon it.

21* =day. Cf. Geldner, Ved. Stud III. 110.

1 काष्ठा U. H.

2 भद्रा U. भद्रस्. H.

भद्रं पश्येम प्र चरेम भद्रं भद्रं वदेम शृणुयाम भद्रम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः[1] ॥ ४ ॥

॥ इत्यशीतिभद्रम्[2] ॥

---

1 This expression occurs 21 times in RV. Cf. MS. 4. 12. 4: 187. 6-8. AB. 1. 21. 19; TB. 2. 8. 7. 2. TA. 4. 42. 3.

2 इत्यशीतभद्रम् H. इतिशीतिभद्रम् Lp.

मेखलाब्राह्मणम्* ॥ १० ॥

इयं दुरुक्तात् परिबाधमानं[1] इति दुरुक्तां[2] वर्जयित्वा परिबाधन्ते । वर्णं पवित्रं[3] पुनती[4] नं[5] आगादित्यपो[6] वै वर्णमेव पवित्रमलं[7] करोति । प्राणापानाभ्यां बलमाभजन्तीति प्राणो[8] वैपानाभ्यां[8] बलं दधाति । सुखा देवी सुभगा मेखलेयमित्याशिषमेवाशास्ते । सौभाग्यं वै[9] सुखा देवी दधाति । सहस्रमावि[10] प्रतिरन्तं[11] आयुः ॥

॥ इति मेखलाब्राह्मणम् ॥

---

* For मेखला cf. BGS. II. 5. 13; ApGS. IV. 10. 11; JGS. 1. 12: 12; HKGS. 14. 4; KGS. 4. 1. 11; KS. 22. 4: 78.
इयं दुरुक्तात् (PG. दुरुक्तं) परिबाधमाना ŚG. 2. 2. 1; SMB 1. 6. 27; GG. 2. 10. 37; PG. 2. 2. 8; ApMB. 2. 2. 9; ApG. 4. 10. 11; MG. 1. 22. 10;
वर्णं पवित्रं (MG. पुराणं) पुनती म (ŚG. न) आगात् ŚG. 2. 2. 1; SMB. 1. 6. 27; PG. 2. 2. 8; MG. 1. 22. 10.

1 So GP. and Caland. परिबाधमानेति ?

2 GP. दुरिक्ता

3 GP. पुत्रं

4 GP. पुनत

5 GP. म

6 GP. आपो

7 GP. अहं करोति

8 So GP. Caland reads प्राण वैपानाभ्याम्. May be प्राणापानाभ्यां वै.

9 GP. मे

10 सहस्रसावे ?

11 GP. प्रतरन्त

अथ मलिम्लुचब्राह्मणम् ॥ ११ ॥

ओं साध्या[1] वै नाम ऋषयः प्रजापतिमपृच्छन्[2] किंवायमग्निः सम्भवति किमिष्ट्वा किं यजेत केन प्रीणाति तान् प्रजापतिरब्रवीद्यच्छड्तून्[3] यजेत द्वादश पौर्णमासीरिष्ट्वा दक्षिणाग्निः[4] प्रीणाति तेन स्वर्गं लोकं गमयति यद् द्वादश ऋतून् यजते चतुर्विंशति पौर्णमासीरिष्ट्वाहवनीयं प्रीणाति तेनामृतत्वं गच्छति यत्पुरोडाशार्थं[5] यजते द्वात्रिंशत् पौर्णमासीरिष्ट्वा गार्ह-स्पत्यः[6] प्रीणाति तेन त्रयोदशमासः संपद्यते तेन पितरः[7] प्रीणाति । तस्मात् त्रयोदशमासः संवत्सरः संवत्सरस्याप्त्यै त्रिष्वयनं नेत्रं भवति त्रय इमे लोकाः इष्टेषु[8] लोकेष्वृष्ध्नुवन्ति[9] ॥

॥ इति मलिम्लुचब्राह्मणम्[10] ॥

---

1 So Lp. U. reads सख्या

2 U. ०ममपृ०

3 U. यच्छद्दतून्. Mark the Sandhi of त् with ष् on the analogy of श्.

4 दक्षिणाग्निं seems correct.

5 U. ०डाशार्थन् यजते

6 So Ms. apparently on the analogy of बार्हस्पत्यः. गार्हपत्यं ?

7 पितॄन् ?

8 एष्वेव or त्रिष्वेव

9 Ms. ऋध्न्यन्ति

10 Cf. चतुर्वर्गचिन्तामणि (p. 222) on मलिम्लुच०

मलिम्लुच=moving about in the dark, a kind of demon. (म्लुच् = म्रुच = setting of the sun).

अथ पिण्डपितृब्राह्मणम्[1] ॥ १२ ॥

ओं देवाश्चैव पितरश्चासुरैस्संयत्ता आसंस्ते देवाश्च पितरश्च वृत्रमघ्नन्न-सुरानजयन् पूर्णमासैर्न्नमावास्यायामागच्छन् पूर्वेद्युः पितरो देवाः पितॄन्[2] वै यज्ञोऽगच्छत्तं देवाः पुनरयाचन्त तमेभ्यो न पुनर्ददुस्तेऽब्रुवन् वार्यं वृणीमहा[3] अस्मभ्यमेव पूर्वेद्युः क्रियाता अथ पुनर्दास्याम इति तस्मात् पूर्वेद्युः पितृभ्यः क्रियते द्वे[4] देवेभ्यो वार्यं वृत्तरहृषान्ते[5] देवा यज्ञं पुनर्व्रत्यालभन्त[6] यज्ञस्यैवैषा पुनर्व्रति[7] र्यज्ञस्यालम्भोऽथो पुनर्व्रतो[8]ऽस्य यज्ञो भवति पितृभ्यः पूर्वेद्युः क्रियते देवाः पितरो मनुष्या ऊर्जं व्यभजन्त यां[9] वैतद्देवा ऊर्जं व्यभजन्त तयार्धमासमुदगन् यं[10] पितरो व्यभजन्त तयार्धमासमुदगन् यां मनुष्या व्यभजन्त तयाहरुदगन् यान्तया रात्री[11] सा[12] मासिकां वैतद्देवा ऊर्जमुप-

1 Cf. U. Pp. 126-130.

2 इन्द्रो वृत्रं हत्वा । असुरान् पराभाव्य । सोऽमावास्यां प्रत्यागच्छत् । ते पितरः पूर्वेद्युरागच्छन् । पितॄन् यज्ञोऽगच्छत् । तं देवाः पुनरयाचन्त । तमेभ्यो न पुनरददुः । तेऽब्रुवन् वरं वृणामहै । अथ वः पुनर्दास्यामः । अस्मभ्यमेव पूर्वेद्युः क्रियत इति । ॥१॥ तमेभ्यः पुनरददुः । तस्मात् पितृभ्यः पूर्वेद्युः क्रियते । This is quoted in BauŚS. 2. 7 with the variant क्रियाता इति ।

3 वार्यं वृणामहै KaṭhaKap. XLV. 2

4 So U. क्रियतेऽथ देवेभ्यो seems correct. Cf. Kaṭha Kap. VII. 6: 77. 14.

5 So U. वार्यं वृतहृषन् ?

6 So U. पुनर्वृत्या ?

7 So U. पुनर्वृतिः !

8 So U. पुनर्वृतो ?

9 So U.

10 So U. यां ?

11 So U. यान्त्या रात्री or या अन्तया

12 So U.

जीवन्ति मासिकीं पितरस्सायं प्रातस्तनो[1] मनुष्या य एवमेतेभ्यः सर्वेभ्यः[2] सर्वे हेनैमिमे[3] विदुर्देवाः पितरो मनुष्या यदि बन्धु[4] नानुविदीतें[5] स्वधा पितृभ्यः पृथिवीषद्भ्य इति प्रथमपिण्डं निदध्यात् स्वधा पितृभ्योऽन्तरिक्षसद्भ्य इति द्वितीयं स्वधा पितृभ्यो दिविषद्भ्य इति तृतीयं य एवास्यैषु लोकेषु पितरस्तेऽस्याभीष्टाः प्रीता भवन्त्यप्यनाहिताग्निना[6] कार्यमिदं चिन्मे कृतमस्तु पितरश्चेन्माँ[7] विदन्निति पक्तव्या २ न पक्तव्या २ मिति[8] मीमांसन्ते पक्तव्यमेव पचन्तं हि पितरो विदुर्यजमानं देवा यस्य पितृमिन्द्रियं[9] प्रमीयते सोऽस्मिल्लोके पापीयान् भवत्यथ पिता सोमं पिबति यस्य वै स प्रमीयते तस्य पित्र्यमिन्द्रियं प्रमीयते सोमं तस्य पितृमन्तमिन्द्रियं गच्छत्यग्नि[10] कव्यवाहनं यमस्सोमायं[11] पितृमते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नमं इति द्विर्जुहोति तत् पञ्च संपद्यते पञ्च वाँट् तयो देवाः[12] पितरस्तेऽस्याभीष्टाः प्रीता भवन्ति मेक्षणं षष्ठमादधात्यस्ति हि षष्ठ ऋतु एतस्मै[13] न दधाति न जुहोत्यनालम्बं[14] इव हिम ऋतूनां न हिमस्वतुरिवं[15] ॥ १ ॥

एतत्ते[16] तत ये चत्वान्वेतत्ते पितामहा ये च त्वान्वेतत्ते प्रपितामहा ये च त्वाँन्विति त्रिर्निदधाति द्वयो[17] परयोर्नाम गृह्णाति याभ्यां हतंत्तयोः[18]

1 So U. सायंप्रातस्तनीं ?

2 So U. करोति may be supplied.

3 So U. हैनमिमे ?

4 So U. यदि बन्धु नाम व विदितं ? May be बन्धुं नानुविन्दीत. Cf. यदि बन्धुनाम न विदितम् MŚS. 1. 1. 2. 22; यदि बन्धुनामानि न विद्यात् GGS. 4. 3. 10; अथ यदि नामधेयानि न विन्द्यात् HKGS. 1. 4.

5 Cf. MŚS. 1. 1. 2. 22; GGS. 4. 3. 10; HKGS 1. 4; KauS 89. 8; JGS. 2. 2. 27.

6 Cf. अप्यनाहिताग्निना कार्यः MŚS; 1. 1. 2. 42; तथा च श्रुत्यन्तरम् "अप्यनाहिताग्निना कार्यः ŚŚS. 4. 5. 13.

Cf. पितरश्चिन्मा वेदन्निति KausS. 89.17.

8 So U.

9 So U. पित्र्यमिन्द्रियं ?

10 So U. अग्निं or अग्निः कव्यवाहनः, यमः Cf. यमायाङ्गिरस्वते etc. ŚŚS. 4. 5. 1.

11 Cf. VS. 2. 29; ŚB. 24. 2. 13; ŚŚS. 4. 4. 1;

12 So U. पञ्च वा ऋतवो देवाः ?

13 So U. ऋतुरेतस्मै ?

14 So. U. अनालम्भ ?

15 So U. हिम ऋतुरिव ?

16 Cf. KS. 9. 6; TS. 1. 8. 5. 1; TB. 1. 6. 9. 7; lengthening (in पितामहा) is in vocative.

17 So U. द्वयोः ?

18 So U. ह्वेतत्तयोः ?

परशब्दस्तत् पञ्च संपद्यते पञ्च वा ऋतवा ऋतवो देवाः पितरस्तेऽस्यामीष्टाः प्रीता भवन्ति ये च त्वान्विति तान् हि ते सदेवान् पितॄन् मनुष्याः पितरस्तान् हि तेऽनुसंक्रमन्ति त एतेभ्यो लोकं कुर्वन्ति यद्वदन्ति यथा वेदिं कराण्वद्येवं तद्याचनूपसृजति यथा बर्हिराहरत्येवं तद्यत्[1] सर्पिः प्रत्यवसायेद्वासति[2] यथा हविरभिघार्योद्वासयत्येवमेव तत् प्राश्याँ[3] ३ न प्राश्या ३ इति मीमांसन्ते यत् प्राश्नीयात् प्राकारुकः स्याद्यन्न प्राश्नीयादहविदजिघ्रेदुभयमेव करोति योऽलमन्नाद्याय सन्नन्नं नाद्यात् स प्राश्नीयात्[3] कूष्मा भार्यागात्रे[4] पितर एनमुपावयन्ति नमस्कारादुपावर्तते यथा वीवधा यस्यैव भार्यस्यैवशास्येत्यर्थं[5] नमस्कुर्यान्न वै पितरः प्राणमुपावयन्ति पर्यावर्तेत पितॄन् वा एतस्य मनो गच्छति मनो[6] न्वाहवामहे[6] इति तदेव पुनराह्वयते ॥

॥ इति पिण्डपितृब्राह्मणं* समाप्तम् ॥

---

1 So U. Read करत्येवं तत्, यावनूपसृजति यथा बर्हिराहरत्येवं तत्.

2 So U. प्रत्यवसायोद्वासयति ?

3 Cf. KS. 29. 2. Kaṭha Kap. has प्राश्यो न प्राश्य Cf. XLV. 3. U ०दहविदजिघ्रेत् may be emended to अवजिघ्रेत्.

4 So U. ०भावे ?

5 So U. भार्यस्यैवमस्येत्यथ ?

6 Cf. KS. 9. 6; MS. 1. 10. 3: 143. 15; AB. 3. 11. 20; ŚB. 2. 6. 1. 39; ĀŚS. 2. 7. 8; ŚŚS. 3. 17. 3. 4; VaitŚS. 20. 9; KŚ. 5. 9. 22; ĀpŚS. 1. 10. 5; KauS 89.

* For पिण्डपितृयज्ञ cf. ĀpŚS. 1. 7-10; KŚS. IV. 1; ĀŚS. II. 6, 7; ŚŚS. IV. 3-5; Donner, पिण्डपितृयज्ञ (Berlin 1870); Caland, Todtenverehrung, pp. 3ff, Todtengebräuche, pp. 172-173; Keith, Rel. and Phil. of Veda. Vol. II, pp. 429-430.

अन्नप्राशब्राह्मणम्* ॥ १३ ॥

अथान्नप्राशनब्राह्मणम्[1] ॥ अन्नपतेरन्नस्य देहीत्यन्नपतिरन्नं ददात्यन्नमेव पशुषु प्रजनयत्यन्नमेवास्य[2] शुष्मिनं[3] इत्यक्लेशेन ह्यन्नमेव रुन्द्धे प्राणानादधाति धेनुर्दधाति[4] प्र प्र दातारं तारिष्यादित्यन्नं[5] वै प्रजापतिराददादन्नमिच्छत्यन्नं[6] जुह्वान्नमाद्यते[7] ऊर्जं नो देहि[8] द्विपदे चतुष्पदेत्यन्नमेव[9] प्रजया पशुषु प्रतितिष्ठत्यन्नेन ह्यात्मावसृजत्यन्नेन सर्वं प्रतितिष्ठत्यन्नं वै देवयोनिर्भवत्यन्नं वै प्राणानुपसृजति तस्मादन्नममृतं वदन्ति य एवं वेद ॥

॥ इत्यन्नप्राशनब्राह्मणम् ॥

---

* So Ms. प्राशनब्रा०? For this ceremony cf. AGS. 1. 16; ŚGS. 1. 27; PGS. 1. 19. 2; MGS. 1. 20; BGS. II. 3; BhGS. 1. 27.

1 This seems to be a brāhmaṇa of KS. XVI. 10; 231. 19-20 which reads—अन्नपते अन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्रप्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे॥ Cf. MS. 2. 10. 1; 131. 5-6 (with तारिषा=तारिषः); MŚS. 1. 6. 1. 52; MG. 1. 20. 2; VS. 11. 83; TS. 4. 22. 3. 1; ŚB. 6. 6. 4. 7. TB. 3. 11. 4. 1 however elides अ of अन्नस्य

2 MS. प्रजानुपसत्पत्य०

3 So Ms. Kāśmirian MSS. very often have न् in place of ण्

4 So MS. धेनूर्दधाति ?

5 So MS. तारिषं इत्यन्नं ? No other text gives तारिष्यत् or तारिषत्

6 MS. तिराददाद्वन्नमिष्ठ्ववत्यन्नं

7 So MS.

8 So MS. धेहि ?

9 चतुष्पदेत्यन्नं = चतुष्पदे इत्यन्नं. An instance of irregular sandhi.

चूडाकरणब्राह्मणम्* ॥ १४ ॥

अथ चूडाकरणब्राह्मणम् । आयमगात्[1] सविता क्षुरेणेति सविता क्षुरेणायुष्मन्तं प्रजावन्तं गोमन्तं करोत्युष्णेन वार्योदकेनेत्युष्णा[2] आपः[3] केशान्[4] क्लेदयति केशानेव कृण्वन्त्यादित्या रुद्रवसव[5] इति सूर्यवर्चसमेव ब्रह्मचारिणं देवमुपयान्त्यायुष्मान्तेन्तरिक्षं ब्रह्मवर्चसन्ददाति सोमस्य राज्ञो वपत इति सोमस्याप्यायतेऽमृतत्वं करोति राज्ञे[6] वाप्यावपति राजा ते च्छिन्नं करोति दक्षिणे केशान्ते[7] ओषधयस्त्रायन्तां[8] पूर्वे केशान्ते सविता सोमो वरुणस्त्रायन्तां पश्चिमे केशान्ते बृहस्पतीन्द्राग्नी त्रायतामुत्तरे केशान्ते पूषाग्नी प्रजापतिः सूर्यस्त्रायन्तामिति प्रदक्षिणं प्रतिदिशं प्रतिमन्त्रेण केशान् वपन्ति शुधि[9] शिरस्यायुर्मा ते केशाननुगांतेजः[10] सुहृत् परिग्राह्येति वप्त्र्या केशान् फलेन सहार्पयति पशुषु प्रतितिष्ठत्यायुष्मन्तं करोति य एवं वेद ॥

॥ इति चूडाकरणब्राह्मणम् ॥

---

* For this ceremony cf. GGS. II. 9; AGS. 1. 17; ŚGS. 1. 28; PGS. II. 1; APGS. XVI; BGS. II. 4; BhGS. 1. 28; HGS. II 6; MGS. 1. 21. The AV. (VI. 21, 136, 137) has spells to make hair grow.

1 आयमगात् सविता क्षुरेणोष्णेन वाय उदकेनेहि ।
आदित्या रुद्रा वसव उन्दन्तु सचेतसः
सोमस्य राज्ञो वपत प्रचेतसः ॥
AV. VI. 68. 1. Cf. KauS. 53. 7; SMB. 1. 6. 1; GG. 2. 9. 10; KhG. 2. 3. 20.

2 So Ms. वाय उदकेन ? But cf. वायोदकेन in the Vidhi. Mark irregular sandhi.

3 Ms. आप ।

4 Ms. कशान्

5 So Ms. रुद्रावसव ?

6 So Ms. राज्ञा ?

7 Ms. केशान्योषधस्कायंते

8 So Ms. त्रायेताम् ?

9 So Ms. शुन्धि. ? Cf. "शुन्धि शिरो मास्यायुः प्रमोषीः"

10 So Ms. अनुगा. ०गात्तजः or ०गास्तेजः ?

यज्ञोपवीतब्राह्मणम्* ॥ १५ ॥

ओं यज्ञोपवीतं परमं पवित्रमिति यज्ञो वै पवित्रः[1] पतिस्स्वयं[2] पवित्रमेवैनं[2] पवित्रपतिङ्करोति[3] । प्रजापतेर्यत्[4] सहजं[4] पुरस्तादिति प्रजापतिर्वै[5] देवेभ्यो ब्राह्मणेभ्यो देवयानैः प्रजापतिङ्करोति[7] आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रमिति ब्रह्म वै ब्रह्मा आयुष्मन्तङ्करोति[8] आयुर्वै परमः[9] काम आयुरेव तेन स्पृणोति । यज्ञोपवीतं[10] बलमस्तु तेज इति यज्ञो[11] वै[11] पवित्रमात्मा वै बलं तेजसा चैव वीर्यं सहस्रधा[12] प्रतिरन्तरायुः[13] ॥

॥ इति यज्ञोपवीतब्राह्मणम्* ॥

---

* Cf. Schroeder, Kaṭha H. p. 23.

1 So Lp. and GP. T. has पवित्र पतिः

2 T. स्वय पवित्रादेवैनं

3 GP. पवित्रश्रुति०

4 T. ०पतेर्ब्रह्मह्यणां

5 GP. omits it.

6 T. प्रजावती०

7 Lp. करोमि

8 T. आयुषङ्करोति.

9 Lp. ०कामायुरेव. GP. परमकामायु०

10 T. यज्ञोपवीत

11 T. यज्ञायैव

12 T. स—मा

13 So Lp. and GP. T प्रतिरन्तु. May be प्रतिरन्त आयुः

* For the initiation as a rebirth cf. Hauer, Die Anfange der Yoga-praxis in alten Indien, pp. 79. ff.

विश्वचक्षुर्ब्राह्मणम्* ॥ १६ ॥

ओं[1] यो विश्वचक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् । सं बाहुभ्यां नमते सं यजत्रैर्द्यावापृथिवी जनयन् देव एकः[1] ॥

ओं[2] यो विश्वचक्षुरुत इति विश्वचक्षुर्वै देवानां भवति । विश्वतोमुख इति विश्वमुखान् दर्शयाति । विश्वतोहस्त इति विश्वहस्त उत्तमा भवति । उत[3] विश्वतस्पादिति विश्वतस्पादाधार । सं बाहुभ्यामिति[4] सर्वबाहुर्वै नमते नमस्कुर्याङ्कुर्वन्ति[5] । सं ध्यंजत्रैरिति[6] सर्वस्य जित्यै । द्यावापृथिवी इति द्यावापृथिव्योर्धारयति[7] । जनयन् देव एक इति जनमिति जनानां जनपतिर्जन्तूमामात्मा वै सर्वे ध्यायन्ति[8] देव एको भवति स[9] देवेभ्यो रक्षांसि भवति[9] य एवं[10] वेद ॥

॥ इति (यो) विश्वचक्षुर्ब्राह्मणम् ॥

---

* Cf. Schroeder, T. p. 25 Lp. has no accent.

1 Lp. Does not give the stanza.

2 T omits ओं॰

3 T omits उत

4 T omits इति

5 H. and VMK. नमस्कुर्याः कुर्वन्ते

6 T. omits इति

7 T. द्यावापृथिव्योर्वारयति, with a variant वारयते

8 सर्वान्ध्यायन्ते U and VMK. सर्वन्ध्यायन्ते H.

9 स देवः सर्वेभ्यो रक्षांसि U. सदेव सर्वेभ्यो रक्षांसि H.

10 T. एव

आब्रह्मन्ब्राह्मणम्* ॥ १७ ॥

ओं आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामित्याह ब्राह्मण[1] एव ब्रह्मवर्चसन्दधाति[2] तस्मात् पुरा ब्राह्मणो ब्रह्मवर्चस्यजायत[3] आस्मिन्[4] राष्ट्रे राजन्य इषव्यश्शूरो महारथो जायतामित्याह[3] राजन्य एव शौर्यम्[5]महिमानन्दधाति तस्मात् पुरा राजन्य इषव्यश्शूरो[6] महारथोऽजायत[6] । दोग्ध्री धेनुरित्याह[7] धेन्वामेव पयो दधाति तस्मात् पुरा दोग्ध्री धेनुरजायत[8] । वोढानड्वानित्याह अनडुह्येव[9] वीर्यन्[10]दधाति तस्मात् पुरा वोढानड्वानजायत[11] । आशुः सप्तिरित्याह[12] अश्व एव जवन्[13]दधाति तस्मात् पुराशुरश्वो ऽजायत[14] । पुरन्धिर्योषेत्याह[15]

* Cf. KS. 5. 14: 170: 4-8; TB. 3. 8. 13. This brāhmaṇa varies much in Lp, U, VMK and Schroeder p. 46. This may be due to the Śākhābheda among the followers of the Kāṭhaka school. The heading is omitted in Lp. and VMK. VMK includes this in the Gāyatrībrāhmaṇa. Schroeder's text is corrupt.

1 ब्रह्मण H.

2 T and H ददाति; but cf. later portion.

3 T. ०वर्चसी जायतामस्मिन् राष्ट्रे राजन्यश्शूर ईशव्यो भिन्नते महारथो जायतामिति with which H materially agrees, except ईशव्यो भिन्नते for which it reads इशव्योऽतिव्योती.

4 T. अस्मिन्.

5 Lp. सौर्यं

6 T. ईशव्यो भिन्नते महारथो जज्ञे; इषव्यो तिव्यते० VMK.

7 आह omitted in T and VMK.

8 धेनुर्दोग्ध्री जज्ञे T and VMK.

9 अनडुहे एव H.

10 T जवं, VMK. बलं. Here T. ends.

11 ०ड्वान् वोढा जज्ञे VMK. ०नड्वा वोढा जज्ञे H.

12 VMK. omits आह

13 VMK. and H. बलं for जवं.

14 Lp. पुराश्वो०

15 VMK. omits आह.

योषित्येव[1] रूपन्दधाति तस्मात् स्त्री[2] युवतिः[3] प्रिया भावुका[3]। जिष्णू रथेष्ठा इत्याह[4] ह वै[5] तत्र जिष्णू रथेष्ठा जायते यत्रैतेन यज्ञेन यजन्ते[6]। सभेयो युवेत्याह[7] यो वै पूर्ववयसी स सभेयो युवा[8] तस्माद्युवा पुमान् प्रियो भावुकः। आस्य[9] यजमानस्य वीरो जायतामित्याह ह वै तत्र यजमानस्य[9] वीरा जायते यत्रैतेन यज्ञेन यजन्ते[10]। निकामे निकामे नः पर्जन्यो वर्षत्वित्याह[11] निकामे निकामे ह[12] वै तत्र पर्जन्यो वर्षति यत्रैतेन यज्ञेन यजन्ते। फलवतीर्न ओषधयः पच्यन्तामित्याह[13] फलिन्यो[14] ह वै[14] तत्रौषधयः पच्यन्ते यत्रैतेन यज्ञेन यजन्ते। योगक्षेमो नः कल्पतामित्याह कल्पते ह वै तत्र प्रजाभ्यो योगक्षेमः यत्रैतेन यज्ञेन यजन्ते। तस्माद्यत्रैतेन यज्ञेन यजन्ते क्लृप्तः प्रजानां योगक्षेमो भवति य एवं वेद ॥

॥ इति आब्रह्मन्ब्राह्मणम् ॥

---

1 ज्योतिरेव H.

2 VMK रूपिणी.

3 रूपाणी ज्योति प्रियाभावे H.

4 VMK Omits आह.

5 Lp. वै, but cf. later portion, where ह वै is used.

6 VMK reads राजन्य एव जैत्रं महिमानन्दधाति तस्मात् पुरा राजन्यो जिष्णुर्जज्ञे.

7 एष वै सभेयो युवा यः प्रथमवयसी VMK

8 तस्मात् प्रथमवयसी स्त्रीणां प्रियो युवा भावुकः VMK.

9 Lp. अस्य

10 VMK and H. have ०स्यैव प्रजायां वीर्यंन्दधाति तस्मात् पुरा राजन्यस्य वीरो जज्ञे.

11 H omits आह.

12 VMK and H omit ह.

13 VMK omits आह.

14 VMK and H have फलवत्यो वै.

स्वाध्यायब्राह्मणम्* ॥ १८ ॥

ओं स्वस्ति प्रजाभ्यः । श्रीगणेशाय नमो नमः[1] ।

ओं सह वै देवानां चासुराणां च यज्ञौ प्रततावास्तां वयं स्वर्गंल्लोकञ्जेष्यामो[2] वयं जेष्याम[2] इति ते सुरास्संनह्यैव सहसा[3]चरन् ब्रह्मचर्येण तपसैवै[4] देवास्ते[5]ऽसुरा अमुह्यंस्ते न प्राजा[6]नंस्ते पराभवन् प्रसूतेन यज्ञेन देवास्स्वर्गंल्लोकमायन्नप्रसूतेनासुराः पराभवन् प्रसूतो वै यज्ञ उपवीतिनोऽप्रसूतोऽनुपवीतिनो[7] यद्वै किञ्च[8] ब्राह्मणो यज्ञोपवीत्यधीते यजते[9] एव तं[10]त्तसाद् ब्राह्मणो यज्ञोपवीत्येवाधीयीत[11] यजेत

Tâitt. Âr. 2. 1.

सह वै देवानाञ्चासुराणाञ्च यज्ञौ प्रततावास्तां वयं स्वर्गं लोकमेष्यामो वयमेष्याम इति तेऽसुराः सन्नह्य सहसैवाचरन्ब्रह्मचर्येण तपसैव देवास्तेऽसुरा अमुह्यंस्ते न प्राजानंस्ते पराभवन्तेन स्वर्गं लोकमायन् प्रसूतेन वै यज्ञेन देवाः स्वर्गं लोकमायन्नप्रसूतेनासुरान् पराभावयन् प्रसूतो ह वै यज्ञोपवीतिनो यज्ञोऽप्रसूतोऽनुपवीतिनो यत्किञ्च ब्राह्मणो यज्ञोपवीत्यधीते यजत एव तत्तस्माद्यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा

* Cf. T. 55-65

1 T omits it.

2 T एष्यामो, एष्यामः

3 SB. सिहसा°

4 SB. उपमैवा

5 SB. देवा ते

6 SB. प्रजानं

7 SB. प्रसृतिनोपवीतिनो

8 SB. किञ्चिद्

9 SB. यजेत एव

10 Omitted in S

11 SB. °पवीती वा यीत

याजयेद्वा दद्यात् प्रतिगृह्णीयाद्यज्ञस्य प्रसृत्या अजिनं वासो वा दक्षिणत उपवीय दक्षिणम्पाणिमुद्धरत्यवधत्ते सव्यमिति यज्ञोपवीतमेतदेव विपरीतं प्राचीनावीतम्पितृदैवत्यं संवीतम्मानुषन्निवीतमासुरम्[1] ॥

ओं अजान् ह वै पृश्नींस्तपस्यमानान्[2] ब्रह्म स्वयम्भ्वभ्यानर्षत्त[3] ऋषयोऽभवंस्तदृषीणामृषित्वन्तान् देवा उपातिष्ठन्त यज्ञकामास्तेभ्य एतद्[4] ब्रह्मयज्ञमपश्यन् स्वाध्यायन्तेनायजन्त यदृचोऽध्यगीषत[5] ताः[6] पयआहुतयो देवानामभवन् यद्यजूंषि ता[7] घृताहुतयो यत् सामानि तास्सोमाहुतयो यदथर्वाङ्गिरसस्ता मध्वाहुतयो यद्ब्राह्मणीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीस्ता[8] मेद[9] आहुतयो देवानामभवंस्ताभिः क्षुधं[10] पाप्मान[11]मपाघ्नतापहतपाप्मानो देवास्स्वर्गं

यज्ञस्य प्रसृत्या अजिनं वासो वा दक्षिणत उपवीय दक्षिणं बाहुमुद्धरतेऽवधत्ते[1] सव्यमिति यज्ञोपवीतमेतदेव विपरीतं प्राचीनावीतं संवीतं मानुषम् ॥ १ ॥

अजान् ह वै पृश्नीँस्तपस्यमानान्ब्रह्म स्वयम्भ्वभ्यानर्षत्त[2] ऋषयोऽभवन्तदृषीणामृषित्वन्तां देवतामुपातिष्ठन्त यज्ञकामास्त एतं ब्रह्मयज्ञमपश्यन्तमाहरन्तेनायजन्त यदृचोऽध्यगीषत ताः पयआहुतयो देवानामभवन्यद्यजूँषि घृताहुतयो यत्सामानि सोमाहुतयो यदथर्वाङ्गिरसो मध्वाहुतयो यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान् गाथा नाराशंसीर्मेदाहुतयो देवानामभवन्ताभिः क्षुधं पाप्मानमपाघ्नन्नपहतपाप्मानो देवाः स्वर्गं लोकमायन्ब्रह्मणः सायुज्यमृषयोऽगच्छन् ॥ ६ ॥

(1 So TA. R. वधते wrong. 2. So TA. R. तदृषयो)

1 SB. संवीतन्निवीतं मानुषम्
2 SB. तपस्यमानो
3 SB. °नर्षत Lp. °नर्षतो
4 T. एतं
5 Lp. °गैषत
6 Lp. तः
7 Lp. त
8 Lp. नाराशंस्या
9 SB. मधे
10 Lp. क्षुध
11 SB. °नं मपा°

ल्लोकमायन् ब्रह्मणः सायुज्यमृषयोऽ-
गच्छन् क्षुधमेव[1] पाप्मानमपहत्य[2] स्वर्गं[3]-
ल्लोकमेति ब्रह्मणस्सायुज्यङ्गच्छति
य एवं विद्वान् स्वाध्यायमधीते ॥

पञ्च वा एते यज्ञास्[4]सदधि[5] प्रता-
यन्ते सदधि[6] सन्तिष्ठन्ते देवयज्ञः
पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्म-
यज्ञ इति यदग्नौ जुहोत्यपि समिधं[7] त-
द्देवयज्ञस्सन्तिष्ठते[8] यत् पितृभ्य-
स्स्वधा करोत्यप्य[9]पस्तत्पितृयज्ञस्सन्ति-
ष्ठते[10] यद् भूतेभ्यो बलिं हरति
तद् भूतयज्ञस्सन्तिष्ठते[11] यद्ब्राह्मणे-
भ्योऽन्नन्ददाति तन्मनुष्ययज्ञस्स-
न्तिष्ठते[12] यत् स्वाध्यायमधीते[13] एका-
मप्यृचं[14] यजुस्साम वा तद् ब्रह्म-
यज्ञस्सन्तिष्ठते[15] [16]यदृचोऽधीते पयसः
कुल्या अस्य पितॄन् स्वधा अभिवह-
न्ति यद्यजूंषि घृतकुल्या यत् सामा-

पञ्च वा एते महायज्ञाः संतति
प्रतायन्ते सतति सन्तिष्ठन्ते देवयज्ञः
पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्म-
यज्ञ इति । यदग्नौ जुहोत्यपि समिधं
तद्देवयज्ञः सन्तिष्ठते । यत्पितृभ्यः
स्वधा करोत्यप्यपस्तत्पितृयज्ञः स-
न्तिष्ठते । यद्भूतेभ्यो बलिं हरति
तद्भूतयज्ञः सन्तिष्ठते । यद्ब्राह्मणेभ्यो-
ऽन्नं ददाति तन्मनुष्ययज्ञः सन्तिष्ठते ।
यत् स्वाध्यायमधीयीतैकामप्यृचं
यजुः साम वा तद्ब्रह्मयज्ञः सन्तिष्ठते ।
यदृचोऽधीते पयसः कूल्या अस्य
पितॄन्त्स्वधा अभिवहन्ति यद्यजूंषि
घृतस्य कूल्या यत्सामानि सोम एभ्यः
पवते यदथर्वाङ्गिरसो मधोः कूल्या
यद्ब्राह्मणानीतिहासान्पुराणानि क-
ल्पान् गाथा नाराशंसीर्मेदसः कू-
ल्या अस्य पितॄन्त्स्वधा अभिवहन्ति ।

1 Lp. क्रुध०
2 Lp. पाप्मापहत्य
3 SB. स्वर्गंल्लोकमायन् ब्रह्मणस्सायुज्यमृष-
योऽगच्छन् क्षुधमेव पाप्मान मपहत्य स्वर्गं-
ल्लोकमेति
4 Lp. यज्ञः
5 Lp. सदति; T. सददि
6 T. सददि
7 SB. समिधस्
8 T. सन्तिष्ठति
9 Lp. अपि प०
10 T. सन्तिष्ठति
11 See 14
12 See 14
13 T. अधीत
14 Lp. °मप्य च° SB. मप्यच
15 See 14
16 SB. adds ओं

नि सोम एभ्यः पवते यदथर्वाङ्गिरसो मधोः[1] कुल्या यद्ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीर्मेदसः[2] कुल्या[3] अस्य पितॄन् स्वधा अभिवहन्ति । यदृचोऽधीते पयआहुतिभिरेव[4] देवांस्तर्पयति[5] यद्यजूंषि घृताहुतिभिर्यत् सामानि सोमाहुतिभिर्यदथर्वाङ्गिरसो मध्वाहुतिभिर्यद्ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीर्मेद[6]आहुतिभिरेव देवांस्तर्पयति[7] त[8] एनं तृप्ताः प्रीतास्तेजसा वर्चसा द्रविणेन[9] चान्नाद्येन वर्धयन्ति[10] ॥

ओं ब्रह्मयज्ञेन यक्ष्यमाणः[11] प्राच्यान्दिशि ग्रामादच्छदिर्दर्श[12] उदीच्यां प्रागुदीच्यां वोदिते[13] आदित्ये दक्षिणत उपवीयोपविश्य त्रिरप आचामेद्[14] द्विष्परिमृजेद् दर्भाणां[15] महदुपस्तीयदृचोऽधीते पयआहुतिभिरेव तद्देवांस्तर्पयति यद्यजूंषि घृताहुतिभिर्यत्सामानि सोमाहुतिभिर्यदथर्वाङ्गिरसो मध्वाहुतिभिर्यद्ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीर्मेदाहुतिभिरेव तद्देवांस्तर्पयति त एनं तृप्ता आयुषा तेजसा वर्चसा श्रिया यशसा ब्रह्मवर्चसेनान्नाद्येन च तर्पयन्ति ॥ १० ॥

ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामादच्छदिर्दर्श उदीच्यां प्रागुदीच्यां वोदित आदित्ये दक्षिणत उपवीयोपविश्य हस्ताववनिज्य त्रिराचामेद् द्विः परिमृज्य सकृदुपस्पृश्य शिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्य यत्त्रिराचामति तेन ऋचः प्रीणाति यद् द्विः परिमृजति तेन यजूंषि यत्सकृदुपस्पृशति तेन सामा-

1 Lp. मध्वा
2 Lp. नाराशंसीन्मेदसः; SB. °शंसीर्वेधसः.
3 SB. कुल्यास्य
4 Lp. रेवैदेवं
5 SB. तर्पयन्ति
6 Lp. °शंसीन्मेद° SB. शंसीर्मेध
7 see 2
8 Lp. ता
9 Lp. द्रविनेन
10 Lp. तर्पयन्ति
11 Lp. यक्षमाणः
12 SB. °दच्छन्दिर्न्दर्श°
13 Lp. °मुदित. SB. वेदित
14 SB. omits द्
15 Lp. दर्भाणामह°

योंपस्थङ्कृत्वा प्राङासीन[1]स्स्वाध्यायमधीयीतापां[2] वा एष ओषधीनां रसो यद्दर्भास्सरसमेव तं[3]ब्रह्म कुरुते दक्षिणोत्तरौ[4] पाणी कृत्वा सपवित्रा ओ३मिति प्रतिपद्यत एतद्वै तद्यजुस्त्रयीं[5] विद्यां प्रत्येषां[6] वागेतत् परममक्षरं तदेतदृचाभ्युक्तम् ॥

ऋचो अक्षरे परमे व्योमन् यस्मिन्
देवा अधि विश्वे निषेदुः ।

यस्तन्न वेद किमृचा करिष्यति
य इत्तद्विदुस्ते इमे समासते ।

इति त्रयमेव प्रयुङ्क्त्वाथासीत सावित्रीङ्गायत्रीन्त्रिरन्वाह पच्छोऽर्धर्चशोऽनवानं सविता श्रियः प्रसविता श्रियमेवाप्नोत्यथो प्रज्ञातयैव प्रतिपदा च्छन्दांसि प्रतिपद्यते ॥

तस्य वा एतस्य[7] यज्ञस्य मेघो हविर्धानं वर्षं हविर्विद्युदग्निस्तनयित्नुर्वषट्कारो यदवस्फूर्जति[8] सोऽनुवषट्कारो वायुरात्मामावस्या स्विष्टकृद् य एवं

नि यत्सव्यं पाणिं पादौ प्रोक्षति यच्छिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभते तेनाथर्वाङ्गिरसौ ब्राह्मणानीतिहासान्पुराणानि कल्पान् गाथा नाराशंसीः प्रीणाति दर्भाणां महदुपस्तीर्योपस्थं कृत्वा प्राङासीनः स्वाध्यायमधीयीतापां वा एष ओषधीनां रसो यद्दर्भाः सरसमेव ब्रह्म कुरुते दक्षिणोत्तरौ पाणी[१] पादौ कृत्वा स पवित्रावोमिति प्रतिपद्यत एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत्परममक्षरं तदेतदृचाभ्युक्तम् ।

ऋचो अक्षरे परमे व्योमन्यस्मिन् देवा अधि विश्वे निषेदुर्यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥

इति त्रीनेव प्रायुङ्क्त भूर्भुवः स्वरित्याहैतद्वै वाचः सत्यं यदेव वाचः सत्यं यदेतत्प्रायुङ्क्ताथ[२] सावित्रीं गायत्रीं त्रिरन्वाह पच्छो ऽर्धर्चशो-

१ (TA. पाणिः; २ R. तत्प्रायुंक्त्वाथ)

1 Lp. प्राङ्गासीनः SB. प्राजासीनः

2 Lp. ०मधीतापां SB. मधीयेतायां

3 Omitted in SB.

4 SB. दक्षिणोत्तरो

5 Lp. त्रयी विद्या

6 Lp. प्रत्येषां

7 Lp. जातस्य

8 Lp. ०स्फूर्जते

विद्वान् मेघे वर्षति विद्योतमाने[1] स्तनयत्यवस्फूर्जति[2] पवमाने वाया अमावास्यायां स्वाध्यायमधीत उत्तमं नाकं रोहत्युत्तमः[3] समानानाम्भवति यावद्वा इमां पृथिवीं वित्तस्य पूर्णां[4] न्ददत्[5] स्वर्गंल्लोकञ्जयति त्रिस्तावन्त[6]ञ्जयति भूयांसञ्चाक्षय्यमपः[7] पुनर्मृत्युञ्जयति य एवं विद्वान् स्वाध्यायमधीते ॥

तस्य वा एतस्य यज्ञस्य द्वा अनध्यायौ[8] यदात्मा शुचिर्यद्देशो[9] य एवं विद्वान् महारात्र उषस्युदित आसीनस्तिष्ठन् व्रजञ्शयानोऽरण्ये ग्रामे वा यावत्तरसं[10] स्वाध्यायमधीते सर्वांल्लोकानभिजयति सर्वाँल्लोकाननृणोऽनुसञ्चरति । तदेषाभ्यनूक्ता[11] ।

ओं अनृणा अस्मिन्ननृणाः परस्मिंस्तृतीये
लोके अनृणास्स्याम ।
ये देवयानाः पितृयानाश्च लोकास्सर्वां-
ल्लोकाननृणास्सञ्चरेम ॥

ऽनवानं सविता श्रियः प्रसविता श्रियमेवाप्नोत्यथो प्रज्ञातयैव प्रतिपदा छन्दांसि प्रतिपद्यते ॥ ११ ॥

तस्य वा एतस्य यज्ञस्य मेघो हविर्द्धानं विद्युदग्निर्वर्षं हविस्तनयित्नुर्वषट्कारो यदवस्फूर्जति सोऽनुवषट्कारो वायुरात्मा ऽमावास्या स्विष्टकृद्य एवं विद्वान्मेघे वर्षति विद्योतमाने स्तनयत्यवस्फूर्जति पवमाने वायावमावास्यायां स्वाध्यायमधीते तप एव तत् तप्यते तपो हि स्वाध्याय इत्युत्तमं नाकं रोहत्युत्तमः समानानां भवति यावन्तं ह वा इमां वित्तस्य पूर्णां ददत् स्वर्गं लोकं जयति तावन्तं लोकं जयति भूयांसं चाक्षय्यं चाप पुनर्मृत्युञ्जयति ब्रह्मणः सायुज्यं गच्छति ॥ १४ ॥

तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माऽशुचिर्यद्देशः समृद्धिर्दैवतानि य एवं विद्वान्महारात्र

1 SB. ०मान
2 Lp. ०त्यावस्फूर्जते
3 SB. त्योत्तमः
4 Lp. पूर्णं
5 Lp. दद्यात्
6 Lp. ०स्थावन्ते०
7 SB. ०चाक्षयमयः
8 Lp. अनध्यायो
9 Lp. शुचियदेषो
10 SB. यवत्तरसं
11 SB. ०भ्यनुक्ता

इत्यग्निं वै सृष्टं पाप्मा जग्राह तस्य प्रजापतिराहुतिभिः पाप्मानमपाहत्ताहुतीनां[1] यज्ञेन यज्ञस्य दक्षिणाभिर्दक्षिणानां ब्राह्मणेन[2] ब्राह्मणस्य छन्दोभिश्छन्दसां स्वाध्यायेनापहतपाप्मा स्वाध्यायो देवपवित्रं वा एतद्धविस्तं यो विसृजत्यभागो वाचि भवत्यभागो[3] नाके। तदेषाभ्यनूक्ता[4]।
ओं यस्तित्याज सचिविदं[5] सखायं
न तस्य वाच्यपि भागो अस्ति।
यदीं शृणोत्यलकं शृणोति
न हि प्रवेद सुकृतस्य पन्थाम्॥
इति। तस्मात् स्वाध्यायोऽध्येतव्यो[6] यं यङ्क्रतुमधीते तेन तेनास्येष्टम्भवत्यग्नेर्वायोरादित्यस्य सायुज्यङ्गच्छति। तदेषाभ्यनूक्ता[7]।
ओं ये अर्वाञ्च उत वा पुराणा
वेदं विद्वांसमभितो वदन्ति।
आदित्यमेव परि ते विशन्ति सर्वे[8]-
ऽग्निन्द्वितीयं त्रिवृतञ्च हंसम्॥

उपस्युर्दिते व्रजंस्तिष्ठन्नासीनः शयानोऽरण्ये ग्रामे वा यावत्तरसं[9] स्वाध्यायमधीते सर्वान् लोकान् जयति सर्वान् लोकाननृणोऽनु सञ्चरति। तदेषाभ्युक्ता।

अनृणा अस्मिन्ननृणाः परस्मिंस्तृतीये[10] लोके अनृणाः स्याम। ये देवयाना उत पितृयाणाः सर्वान्पथो अनृणा आक्षीयेम—

त्यग्निं वै जातं पाप्मा जग्राह तं देवा आहुतिभिः पाप्मानमपाघ्नन्नाहुतीनां यज्ञेन यज्ञस्य दक्षिणाभिर्दक्षिणानां ब्राह्मणेन ब्राह्मणस्य छन्दोभिश्छन्दसां स्वाध्यायेनापहतपाप्मा स्वाध्यायो देवपवित्रं वा एतत्तं योऽनूत्सृजत्यभागो वाचि भवत्यभागो नाके तदेषाभ्युक्ता।

यस्तित्याज सखिविदं सखायं न तस्य वाच्यपि[1] भागो अस्ति। यदीं[1] शृणोत्यलकं शृणोति न हि प्रवेद

1 Lp. ०मपहत्याहु०
2 Lp. ब्रह्मनानां
3 SB. भाके. Lp. भागे
4 SB. ०भ्यनुक्ता
5 Lp. SB. साचि०
6 SB. ०धीतव्यो
7 SB. ०भ्यनुक्ता
8 So, SB. and T. Lp. ते परिविशन्ति
9 SB. omits it.
10 SB. omits it.

इति । यावतीर्वै देवतास्तास्सर्वा वेदविदि[1] ब्राह्मणे वसन्ति तस्माद् ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलङ्कीर्तयेदेता एव देवताः प्रीणाति ॥

मध्यन्दिने प्रबलमधीयीताग्निर्वै ब्राह्मणोऽसौ[2] आदित्योऽग्निस्तस्मादेष तेजिष्ठन्तपति । तदेषाभ्यनूक्ता[3] ।

चित्रं देवानामुदगादनीकं

चक्षुर्मित्रस्य वरुणस्याग्नेः ।

आप्रा द्यावापृथिवी अन्तरिक्षं

सूर्य आत्मा जगतस्तस्थुषश्च ॥

इति । स वा एष ब्रह्मयज्ञस्सद्यः प्रजायते सद्यस्सन्तिष्ठते[4] तस्य प्राक्सायमवभृथो नमो ब्राह्मण इति परिधानीयान्त्रिरन्वाहाप उपस्पृश्य गृहान् परेत्य[5] तत्र यत्किञ्च ददाति तद्दक्षिणा ॥

ओं दुहे[6] ह वा एष च्छन्दांसि यो याजयति स एनं यज्ञक्रतुना याजयेत्तमरण्यम्परेत्य[7] शुचौ भूम्य-

सुकृतस्य पन्थामिति

तस्मात्स्वाध्यायोऽध्येतव्यो यं यं क्रतुमधीते तेन तेनास्येष्टं भवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छति तदेषाभ्युक्ता ।

ये अर्वाङुत वा पुराणे वेदं विद्वांसमभितो वदन्त्यादित्यमेव ते परि वदन्ति सर्वे अग्निं द्वितीयं तृतीयं च हंसमिति

यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलङ्कीर्तयेदेता एव देवताः प्रीणाति ॥ १५ ॥

मध्यन्दिने प्रबलमधीयीतासौ खलु वावैष आदित्यो यद्ब्राह्मणास्तस्मात्तर्हि तेजिष्ठं तपति तदेषाभ्युक्ता । चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्चेति

1 SB. °विदे

2 Lp. and SB. स

3 SB. °नुक्ता

4 Lp. तिष्ठते. SB. सन्तिष्ठति

5 Lp. and SB. परीत्य

6 SB. दुहे

7 Lp. परेभ्य

वकाशे ग्रामादच्छदिर्दर्शे[1] स्वाध्यायमेवैनमधीयन्नासीत[2] तथा ह्यस्य पुनराप्यायन्ते दीक्षितो वा एष भवति यस्स्वाध्यायमधीते तस्यानशनन्दीक्षा स्थानमुपसद आसनं सत्या वाग् जुहूर्मन उपभृत् प्राणो हविस्स वा एष ब्रह्मयज्ञः प्राणदक्षिणस्सद्यस्समृद्धतमो भवति ॥

ग्रामे मनसा स्वाध्यायमधीते दिवा[4] नक्तं वेति ह स्माह शौच आग्नेय उतारण्ये बलवदुत[5] वा नोत तिष्ठन्नुत व्रजन्नुतासीन उत शयानोऽधीयीतैवं[6] स्वाध्यायमानखाद्वा एवं[7] तपस्तप्यते यस्स्वाध्यायमधीते तपस्वी पुण्यो भवति तदेषाभ्यनूक्ता[8]

ओं नमो ब्रह्मणे नमो अस्त्वग्नये नमः
पृथिव्यै नम ओषधीभ्यः ।
नमो वाचे नमो वाचस्पतये नमो
विष्णवे बृहते कृणोमि ॥

इत्येतासामेव देवतानां सार्ष्टितां[9]

स वा एष यज्ञः सद्यः प्रतायते सद्यः सन्तिष्ठते तस्य प्राक्सायमवभृथो नमो ब्रह्मण इति परिधानीयां त्रिरन्वाहाप उपस्पृश्य गृहानेति ततो यत्किञ्च ददाति सा दक्षिणा ॥ १३ ॥

दुहे ह वा एष छन्दांसि यो याजयति स येन यज्ञक्रतुना याजयेत्सोऽरण्यं परीत्य शुचौ देशे स्वाध्यायमेवैनमधीयन्नासीत तस्यानशनं दीक्षा स्थानमुपसद आसनं सुत्या वाग्जुहूर्मन उपभृद्धृतिर्ध्रुवा प्राणो हविः सामाध्वर्युः स वा एष यज्ञः प्राणदक्षिणोऽनन्तदक्षिणः समृद्धतरः ॥ १७ ॥

ग्रामे मनसा स्वाध्यायमधीयीत दिवानक्तं वेति ह स्माह शौच आह्नेय उतारण्येऽबल उत वाचोत तिष्ठन्नुत व्रजन्नुतासीन उत शयानोऽधीयीतैव स्वाध्यायं तपस्वी पुण्यो भवति य एवं विद्वान्स्वाध्यायमधीते ॥

1 Lp. °दिदर्शे. SB. दिदर्श°
2 SB. °न्नासति
3 SB. प्राणोद. Lp. प्राणन्दक्षिण°
4 SB. दिवां
5 SB. बलवादुत
6 SB. °धीयेतैव
7 SB. एषस्तप°
8 SB. °भ्यनुक्ता
9 T सार्ष्टिता. Lp सार्ष्टितं

सायुज्य सलोकतामाप्नोति य एवं विद्वान् स्वाध्यायमधीते ॥

नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ॥ १२ ॥

॥ इति स्वाध्यायब्राह्मणम् ॥

In the Āraṇyaka portion I have followed the MS. TA. in the Lālchand Library, D. A. V. College, Lahore.

अथ पूर्णाहुतिब्राह्मणम्* ॥ १९ ॥

ओं सप्त ते अग्ने समिध इति पूर्णां स्रुचं जुहोति[1] प्रजापतिर्वै पुराग्निं सृष्ट्वा सप्तकृतमकुरुत स सप्तधा भूत्वातिष्ठत्तस्य ये सप्त शीर्षण्याः प्राणा आसंस्ते सप्तर्षयोऽभवन् स प्रजापतिस्सप्त यज्ञान् सृष्ट्वाग्नये प्रावोचत सोऽग्निर्देवेभ्यः प्रथमया ब्रह्मणो द्वितीयया वसूनां तृतीयया रुद्राणां चतुर्थ्यादित्यानां पञ्चम्या मरुतां षष्ठ्या विश्वेषान्देवानां सप्तम्या पितॄणान्तेऽस्य तुष्टास्सप्त समिधः प्रायच्छन् सप्त जिह्वाः प्रायच्छन् सप्तर्षीन् प्रायच्छन् सप्त धाम प्रियाणि[3] प्रायच्छन् सप्त होत्रान् प्रायच्छन् सप्त योनीन्प्रायच्छँस्तस्मादग्निरन्ययान्यया देवानां हव्यानि प्रावहताज्यमन्यया हव्यमन्यया कव्यमन्यया सोममन्यया स्वाहान्यया पाथांस्यन्यया स सर्वत्रापि भागोऽभवदार्द्रास्सपलाशास्तिभेन्यो भवन्त्येतद्वै वनस्पतीनां वीर्यं यत्स्तिभिस्सवीर्या[4] एवैना अवरुन्द्धे शुष्का आददात्यभाद्यस्यावरुद्ध्यै तत्पूर्णाहुत्याः[5] पूर्णाहुतित्वम् ॥

॥ इति पूर्णाहुतिब्राह्मणम्[6] ॥

---

* For this brāhmaṇa cf. T. p. 24 where it is accented, Lp does not mark accent.

1 T. जुहति

2 Omitted in T.

3 So T. Lp, प्रियानि

4 T. सवीर्ये

5 T. पूर्णाहुत्या

6 So T, Lp इति पूर्णाहुतिः

अथ कूष्माण्डब्राह्मणं (लिख्यते) ॥ २० ॥

व्रतानां विविधानां तु प्रायश्चित्तविशुद्धये ।
कूष्माण्डानां जपो होमः सर्वपापापनुत्तये ॥

ओं अथ कूष्माण्डैर्जुहुयाद्योऽपूत इव मन्येत यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्येयमित्ययोनौ[1] वा रेतः सिक्त्वान्यत्र स्वप्नादरेपा[2] वा पवित्रकामः पौर्णमास्यमावस्यायां[3] वा शुद्धपक्षस्य रोहिण्यां वा स्नातः शुचिः शुचिवासाः कृष्णाजिनवासा[4] वा ब्रह्मचारिकल्पेन व्रतमुपैति संवत्सरमासं[5] द्वादशरात्रं षड्रात्रं वा न मांसमश्नीयान्न स्त्रियमुपेयान्नोपर्यासीत जुगुप्से-

TA. 2. 7.

वातरशना ह वा ऋषयः श्रमणा ऊर्ध्वमन्थिनो बभूवुस्तानृषयोऽर्थमायंस्तेऽनिलायमचरंस्तेनु[1] प्रविशुः कूष्माण्डानि तांस्तेष्वन्वविन्दञ्छ्रद्धया च तपसा च तानृषयोऽब्रुवन् कथा[2] निलायं चरथेति त ऋषीनब्रुवन्नमो वोऽस्तु भगवन्तोऽस्मिन् धाम्नि केन वः सपर्यामेति तानृषयोऽब्रुवन् पवित्रं नो ब्रूत येनारेपसः

(1 TA. अनुः. 2 Rl. कथा)

1 Lp. त्रिति योनौ
2 KB. °दरेवा
3 Lp. पूर्णमास्यमावस्ययोः VMK °ममावस्यां वा
4 Lp. कृष्णाजिनं वासा
5 Lp. संवत्सरं द्वादशरात्रं VMK, संवत्सरं मासं द्वा°

तानृतात्पयो भक्षयति[1] प्रधानकल्पो यावकं वोपभुञ्जानः[2] कृच्छ्रं[3] द्वादशाहं[4] वा भैक्ष्यं[5] वा तद्विधेषु पयो ब्राह्मणस्य व्रतं यवागू राजन्यस्यामिक्षा वैश्यस्य सौम्येप्यध्वर इत्येतं[6] ब्रूयाद्यदि मन्येतोपदस्यामीति[7] ओदनं[8] न्धाना सक्तून् घृतमित्यनुव्रतयेदिति पूर्वाह्णेऽग्निमुपसमाधाय चरुं श्रपयेद्यद्देवा देवहेळनं यददीव्यन्नृणमहमायुस्ते विश्वतो दधदित्येतैस्सूक्तैः प्रत्यृचमाज्यं जुहुयात् यद्देवा देवहेळनमिति तिसृभिर्भद्रङ्कर्णेभिरिति चतसृभिः पुनन्तु मा पितर इति नवभिः पुनर्मामैत्विन्द्रियमिति तिसृभिः रथे अक्षेष्विति चतसृभिर्हिरण्यवर्णा इति तिसृभिः अग्नये वायवे सूर्याय ब्रह्मणे प्रजापतये कूष्मर्षिभ्य इति व्रतहोमः अग्ने त्वं पारया नव्येति[10] स्विष्टकृतं वैश्वानर्येण[11] सूक्तेन प्राङ्मुखः प्राञ्जलिस्यामेति त एतानि सूक्तान्यपश्यन् यद्देवा देव हेडनं यददीव्यन्नृणमहं बभूवायुष्टे विश्वतो दधदित्येतैराज्यं जुहुत वैश्वानराय प्रतिवेदयाम इत्युपतिष्ठत यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान् मोदयध्व इति त एतैरजुहवुस्तेऽरेपसोऽभवन् कर्मादिष्वेतैर्जुहुयात् पूतो देवलोकान्त्समश्नुते ॥ ७ ॥

2–8

कूष्माण्डैर्जुहुयाद्योऽपूत इव मन्येत यथा स्तेनो यथा भ्रूणहैवमेष भवति योऽयोनौ रेतः सिञ्चति यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यते यावदेनो दीक्षामुपैति दीक्षित एतैः संतति जुहोति संवत्सरं दीक्षितो भवति संवत्सरादेवात्मानं पुनीते मासं दीक्षितो भवति यो मासः स संवत्सरः संवत्सरादेवात्मानं पुनीते चतुर्विंशतिं रात्री-

(1 TA. अजुहवुः)

1 VMK पयोभक्ष इति
2 Lp. यावकमुपयुञ्जानः
3 Lp. कृत्स्नं. VMK कृच्छ्रं
4 Lp. द्वादशं. VMK द्वादशाहो भैक्ष्यं वा.
5 Lp. भक्षं
6 Lp. and VMK इत्येतद्व्रतं ब्रूया०
7 Lp. मीत्येवमोदनं
8 Lp. VMK श्रपयित्वा
9 KB. ०व्यन्नृण०
10 So KB. Omitted in Lp. and VMK.
11 Lp. वैश्वानरेयेन

रुपतिष्ठते जपेत्सूक्तानि पराञ्चि वैश्वानर्यं[1] चैवेमोदनमासाद्याग्न्याधेये[3] दशहोता[4] दर्शपूर्णमासयोश्चतुर्होता चतुर्मास्येषु[6] पञ्चहोता सँ षड्ढोता सोमे[8] सप्तहोतेति[9] ह विज्ञायते कर्मादिष्वेतैर्जुहुयात् पूतो देवलोकान् समश्नुते इत्येतत्[10] ॥

ओं वातरशना ह वा ऋषयः श्रमिर्णा[11] ऊर्ध्वमन्थिनो[12] बभूवुस्तानृषयोऽर्थमायंस्ते निलायमचरंस्तान्[13][14] प्रददृशुः कूष्माण्डानि तांस्तेन्वपश्यंश्छ्रद्धया[15] च तपसा च तानृषयोऽपृच्छन् कथा निलायं चरथेति त ऋषीनब्रुवन्नमोऽस्तु भगवन्तोऽस्मिन् धाम्नि केन वः सपर्यामेति तान्नृषयोऽब्रुवन्[16] पवित्रं दीक्षितो भवति चतुर्विंशातरधमर्सिाः संवत्सरः संवत्सरादेवात्मानं पुनीते द्वादश रात्रीर्दीक्षितो भवति द्वादश मासाः संवत्सरः संवत्सरादेवात्मानं पुनीते षड्रात्रीर्दीक्षितो भवति षड् वा ऋतवः संवत्सरः संवत्सरादेवात्मानं पुनीते तिस्रो रात्रीर्दीक्षितो भवति त्रिपदा गायत्री गायत्रिया एवात्मानं पुनीते न मांसमश्नीयान्न स्त्रियमुपेयान्नोपर्यासीत जुगुप्सेतानृतात् पयो ब्राह्मणस्य व्रतं यवागू राजन्यस्यामिक्षा वैश्यस्याथो सौम्येप्यध्वर एतद् व्रतं ब्रूयाद्यदि मन्येतोपदस्यामीत्योदनं धानाः सक्तून् घृतमित्यनुव्रतयेदात्मनोनुपदासाय॥८॥

(1 Rl. गायत्र्या)

1 Lp. and VMK पराञ्चि यानि वैश्वानर्यं वैश्वानरीयं

2 Lp. चेव०

3 Lp. ग्न्यादेये. VMK मासाध्याग्न्या०

4 So Lp. and VMK. Kb. दर्शहोता

5 So Kb. Lp. दर्शपौर्णमासयोः

6 So Kb. and VMK. Lp. चातु०

7 Lp. पशोः षड्ढोता. VMK. पशौ

8 VMK. सौम्ये

9 Lp and VMK. सप्तहोतार इति

10 This much is not included in the Brāhmaṇa by Lp. and VMK. इत्येतत् is repeated in VMK.

11 VMK. श्रमिन

12 So Lp. and VMK. Kb. ऊर्ध्वमन्थिनो

13 VMK ०मचरं०

14 So VMK and Kb. Lp. तान

15 So VMK. KB. हांस्ते Lp. ०नितस्ते.

16 So Lp. VMK and Kb त

नो ब्रूत येनारेपसो भविष्याम इति[1] तेनारेपसो भविष्यथेति आज्यमजुहुस्त[2] एतैः सूक्तान्यपश्यद्यद्देवा देवहेळनं यददीव्यन्नृणमहमायुस्ते विश्वतो दद[3]दित्ये-तैराज्यं जुहोति तेनारेपसो भविष्यथेति त एतैराज्यमजुहवुस्तेऽरेपसोऽभवन् कर्मादिष्वेतैर्जुहुयात्पूतो देवलोकान् समश्नुते ॥

कूष्मा ह वै नाम ऋषयो वातरशनास्ते हंसा हिरण्ययर्यो[4] ज्योतिष्पक्षा अजिरा[5] भूत्वाचरंस्तेऽकामयन्ताण्डेषु नः[6] प्रजा ब्रह्मावादिषुस्त आण्डस्था[7] अवदंस्तस्मात् कूष्माण्डैर्जुहुयाद्योऽपूत इव मन्येत यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान् मुच्येयमित्ययोनौ वा रेतः सिक्त्वा जुहुयाद्यथा वै स्तेनो यथा भ्रूणहैवमेष[8] भवति योऽयोनौ रेतः सिञ्चति यदेतैराज्यं जुहोति तैरेवात्मानं पुनीते[9] दीक्षामुपैति दीक्षितः[10] सददि जुहोति[10] संवत्सरं दीक्षितो भवति संवत्सरादेवात्मानं पुनीते[11] मासं[12] दीक्षितो भवति यो वै मासः स[13] संवत्सरः संवत्सरादेवात्मानं पुनीते द्वादशरात्रीर्दीक्षितो[14] भवति द्वादशमासः[15] संवत्सरः संवत्सरादेवात्मानं पुनीते षड्रात्रीर्दीक्षितो भवति षड् वा ऋतवः संवत्सरः संवत्सरादेवात्मानं पुनीते तस्य[16] व्रतं न मांस[16]मश्नीयान्न स्त्रियमुपेयान्नोपर्यासीत जुगुप्सेतानृतात् पयो ब्राह्मणस्य व्रतं यवागू[17] राजन्यस्यामिक्षा वैश्यस्य सौम्येप्यध्वर इत्येतद् व्रतं ब्रूयादोदनं[18] धानाः सक्तून् घृतमिव[19] व्रतये[19]दात्म-नोऽनुपदासाय ॥

1 So Kb. Lp. and VMK read इति त एतानि सूक्तान्यपश्यन् यद्देवा देवहेळवं यददीव्यन्नृणमहमायुस्ते विश्वतो दधदित्येतैराज्यं जुहुत.

2 So Lp. VMK अजुहुवु॰

3 So Ms. may be दधत्

4 So Kb and Lp. VMK. हिरण्मया

5 So Lp. Kb. अजिरभूत्वा

6 Lp श्वेव. Kb श्वेन

7 Lp. आण्डस्ता

8 Lp. एषो

9 Kb. पुनीति

10 Lp. दीक्षित एतैः सददि जुहोति. VMK दीक्षित एतैः सदधि

11 Cp. 1

12 Lp. मासान्

13 Omitted in Lp.

14 Lp. रात्री दीक्षितो

15 Lp. and VMK. द्वादशमासाः संवत्सरः

16 Lp. तस्य तन मांस॰

17 So Lp and VMK. Kb. यवागूं

18 VMK. ब्रूयाद्यदि मन्येतोपदस्यामीत्योदनं

19 VMK. घृतमित्यनुव्रतयेदा॰

[महापापापनुत्त्यर्थं[1] कूष्माण्डानि यजेद् द्विजः ।
कृतव्रतः पौर्णमास्यां दर्शे वा प्रातरेव हि ॥
पयो यवागूमामिक्षां द्विजातीनां व्रतं क्रमात् ।
नवां स्थालीं समाहृत्य तस्यां पायसमाश्रयेत् ॥
देवतास्तेन यष्टव्या ऋचो होम्या जपेत च ।
कूष्माण्डानि जपेन्नित्यं जुहुयाद्दर्शपूर्णयोः ॥
सकृज्जप्त्वा शिवं शश्च शिवसंकल्पमेव च ।
पापी पापाद्विनिर्मुक्तः शुद्धात्मा स्वर्गमाप्नुयात् ।
प्रायश्चित्तानि हुत्वाथ द्विजाञ्छक्त्या प्रपूजयेत् ॥]

॥ इति कूष्माण्डब्राह्मणम् ॥

---

1 Ślokas omitted in Lp.

पावमान्यब्राह्मणम्* ॥ २१ ॥

ओं त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे ।
पवस्व मंहयद्रयिः[1] ॥ १ ॥
त्वं सुतो नृमादनो[2] दधन्वान् मत्सरिन्तमः ।
इन्द्राय सूरिरन्धसा ॥ २ ॥
त्वं सुष्वाणो[3] अद्रिभिरभ्यर्ष कनिक्रदत् ।
द्युमन्तं शुष्ममुत्तमम् ॥ ३ ॥
इन्दुर्हिन्वानो[4] अर्षति तिरोवाराण्यव्यया ।
हरिर्वाजमचिक्रदत्[5] ॥ ४ ॥
इन्दो व्यव्यमर्षसि विश्रवांसि[6] वि सौभगा ।
वि वाजान्त्सोम गोमतः ॥ ५ ॥
आ न इन्दो शतग्विनं रयिं गोमन्तमश्विनम् ।
भरा सोम सहस्रिणम् ॥ ६ ॥

* Lp. begins ओं त्वं सोमासि द्वात्रिंशद् भारद्वाजः कश्यपो गोतमोऽत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठः पवित्रो वसिष्ठो वोभौ वा । वितानास्तिस्रः । पौष्णो यत्ते पवित्रमाग्नेयी सावित्र्यग्निसावित्री वैश्वदेवी । पवस्व सोमेति षोडशाक्षरा । तिस्रो द्विपदास्त्रिंशी पुर उष्णिक् सप्तविंशमनुष्टुबन्त्ये च । पवमान्यध्येतृस्तुतिः जगतीमूर्ध्वं प्रागुशनसः । For this cf.

RV. 9. 67.

1 Lp. पवसोमंहयिद्रविः
2 Lp. नृपादनो
3 H. सुषाणो
4 Lp. हिन्दु हिन्वानो
5 Lp. हरिर्वाणम०
6 Lp. विश्रयांस

पवमानास[1] इन्दवस्तिरः[2] पवित्रमाशवः ।
इन्द्रं यामेभिराशत ॥ ७ ॥
ककुहस्सोभ्यो[3] रस इन्दुरिन्द्राय पूर्व्यः ।
आयुः[4] पवत[5] आयवे ॥ ८ ॥
हिन्वन्ति[6] सूरमुस्रयः[7] पवमानं[8] मधुश्चुतम्[9] ।
अभि गिरा समस्वरन्[10] ॥ ९ ॥
अविता नो अजाश्वः पूषा यामनि[11] यामनि[11] ।
आभक्षत् कन्यासु[12] नः ॥ १० ॥
अयं सोमः[13] कपर्दिने घृतं न[14] पवते मधु ।
आभक्षत् कन्यासु[15] नः ॥ ११ ॥
वाचो जन्तुः कवीनां पवस्व सोम धारया ।
देवेषु रत्नधा असि ॥ १२ ॥
आ कलशेषु[16] धावति श्येनो वर्म वि गाहते ।
अभि द्रोणा कनिक्रदत् ॥ १३ ॥
परि प्र सोम ते रसो[17]ऽसर्जि कलशे सुतः ।
श्येनो न तक्तो[18] अर्षति[19] ॥ १४ ॥
पवस्व[4] सोम मन्दयन्निन्द्राय मधुमत्तमः ॥ १५ ॥
असृग्रन् देववीतये वाजयन्तो रथा इव ॥ १६ ॥
ते सुतासो मदिन्तमाः शुक्रा वायुमसृक्षत[20] ॥ १७ ॥

1 Lp. पवमानः स. H पवमानस.
2 Lp. स्थिरः
3 Lp. ककूहः
4 Lp. आयु
5 Lp. पवन
6 Lp. हिरण्वन्ति
7 H. उश्रयः
8 Lp. पवमानः
9 H. मधुःचुतम्
10 Lp. सुमस्वरम्
11 Lp. यामुनि यामुनि
12 Lp. ०स्वनः
13 Lp. and H. सोम कपर्दिने
14 Lp. घृतन्नः
15 Cp. 18
16 Lp. कर्णेषु H. कालशेषु
17 Lp. omits रसो
18 Lp. उक्तो
19 Lp. आर्षति
20 Lp. reads पवस्व सोम मन्दयन्निन्द्राय

ग्राव्णा तुन्नो[1] अभिष्टुतः पवित्रं सोम गच्छसि ।
दधत् स्तोत्रे सुवीर्यम् ॥ १८ ॥
एष तुन्नो अभिष्टुतः पवित्रमति गाहते ।
रक्षोहा वारमव्ययम् ॥ १९ ॥
यदन्ति[2] यच्च[3] दूरके भयं विन्दति मामिह ।
पवमान वि तज्जहि ॥ २० ॥
पवमानः सो[4] अद्य नः पवित्रेण विचर्षणिः ।
यः पोता[5] स[6] पुनातु नः ॥ २१ ॥
यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा[7] ।
ब्रह्म तेन[8] पुनीहि नः ॥ २२ ॥
यत्ते पवित्रमर्चिवदग्ने तेन पुनीहि नः ।
ब्रह्मसवैः[9] पुनीहि नः[9] ॥ २३ ॥
उभाभ्यां देव सवितः पवित्रेण सवेन च ।
मां पुनीहि विश्वतः ॥ २४ ॥

ओं अस्य पावमानीसूक्तस्य गायत्रीच्छन्दः । सप्तर्षयो देवताः । पाठे विनियोगः । पाठकस्तु श्रयः[10] ।

ओं त्रिभिष्ट्वं देवसवितर्वर्षिष्ठैस्सोम धातृभिः[11] ।
अग्ने दक्षै[12] पुनीहि मा[13] ॥ १ ॥
अनुष्टुप् छन्दः ।

मधुमत्तमः । असुरधन्देववीतये ॥ १६ ॥ वाजयन्तो रथा इव । ते स्वतासो मदिन्तमा शुक्रा वायुमसृक्षत ॥१७॥ H. materially agrees with this.

1 Lp. तुर्नो

2 Lp. यदन्ते

3 Lp. and H. यश्च

4 H. पवमानोःसो.

5 Lp. या पूता

6 H. सः

7 Lp. °मन्तरः

8 Lp. तेनः

9 Lp. omits this stanza.

10 So the Mss. May be पाठकस्य श्रेयः

11 So Lp. and H. RV has धामभिः

12 So Lp. and H. RV. 9. 67. 26 reads दक्षैः

13 So Lp. and H. RV. 9. 67. 26 has नः

पुनन्तु मा देवजनाः पुनन्तु वसवो धिया ।
विश्वे देवाः पुनीत मा जातवेदः[1] पुनीहि मा[2] ॥ २ ॥
द्वे गायत्रीच्छन्दः ।
प्र प्यायस्व[3] प्रस्यन्दस्व सोम विश्वेभिरंशुभिः ।
देवेभ्य उत्तमं हविः ॥ ३ ॥
उपप्रियं परिपूतं[4] युवानमाहुतीवृधम् ।
अगन्म बिभ्रतो नमः ॥ ४ ॥
उष्णिक्छन्दः ।
अलाय्यस्य[5] परशुर्ननाश[6] तमा पवस्व देव सोम ।
आखुश्चिदेव देव सोम ॥ ५ ॥
द्वे अनुष्टुप् छन्दः ।
यः पावमानीरध्येत्यृषिभिस्संभृतं रसम्[7] ।
सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ॥ ६ ॥
पावमानीर्यो अध्येत्यृषिभिस्संभृतं रसम् ।
तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥ ७ ॥

ओं सप्तर्षयो वसिष्ठ ऋषिर्वानुष्टुप् छन्दः । त्रिष्टुब् वा । देवाः सोमो देवता वा । पाठे विनियोगः ।

पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्च्युतः[10] ।
ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितम् ॥ ८ ॥
पावमानीर्दिशन्तु[11] न इमं लोकमथो अमुम् ।

1 Lp. जातवेदाः H. जातवेद
2 H. मः. Cf. KS. XXXIII. 2 : 102. 4-5.
3 Lp. प्राप्या०
4 So Lp. RV. 9.67. 29 has पनिप्रतं
5 Lp. and H. अलायस्य
6 Lp. and H. परशुननाश
7 Lp. ०रध्येत् ऋषिभिः
8 Cp. (for 6-10) SV. II. 1-5. Benfey's ed. p. 110. For 8-12 cf. TB. 1. 4. 8. 4-6. From 8 to the las of. RV. khila
9 Cf. 5
10 RVKh. श्चुत.
11 H. दधन्तु

कामान्त्समर्धयन्तु नो देवैर्देवीः[१] समाहृताः[२] ॥ ९ ॥
येन देवाः पवित्रेणात्मानं पुनते सदा ।
तेन सहस्रधारेण पवमानः[३] पुनातु मा[३] ॥ १० ॥
प्राजापत्यं[४] पवित्रं शतोद्यामं[५] हिरण्ययम्[६] ।
तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे ॥ ११ ॥
इन्द्रस्सुनीत्याँ[७] सह माँ[८] पुनातु सोमस्स्वस्त्या[९] वरुणः समीच्या[१०] ।
यमो राजा प्रमृणाभिः[११] पुनातु जातवेदा ऊर्जयन्त्याँ[१२] पुनातु ॥१२॥
ओं ऋषयस्तु तपस्तेपुः[१३] सर्वे सर्वजिगीषवः[१४] ।
तपसस्तपसोग्रयन्तुं[१५] पावमानीर्ऋचोऽब्रवीत्[१५] ॥ १ ॥
यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किञ्चिदन्यत् ।
जातस्य च यच्चापि च वर्धतो मे तत्पावमानीभिरहं[१६] पुनामि ॥ २ ॥
मातापित्रोर्यन्न[१७] कृतं[१८] वचो मे यत्स्थावरं जङ्गममाबभूव ।
विश्वस्य तत् प्रहृषितं वचो मे तत्पावमानीभिरहं[१९] पुनामि ॥ ३ ॥
गोघ्नात्तस्कराद्वाँ[२०] स्त्रीवधाद्यच्च किल्बिषम् ।
पापकं च चरणेभ्यस्तत्पावमानीभिरहं[२१] पुनामि ॥ ४ ॥

1 Cf. SV. II. 5. 2-4; TB. 1. 4. 8. 5.
2 RVKh. समाहिताः. TB. 1. 4. 8. 5 समाभृताः
3 RVKh. पावमान्यः पुनन्तु माम् SV. II. 5. 2. 6 पावमानीः पुनन्तु नः; TB. 1. 4. 8. 5. पावमान्यः पुनन्तु मा.
4 Lp. प्रंजापत्यं; cf. TB. 1. 4. 8. 6.
5 Lp. शतोद्यमं H. शतोध्यामं
6 RVKh. हिरण्मयम् Cf. TB. 1. 4. 8. 6.
7 Lp. स्वनीत्या. Cf. RVKh. and TB. 1. 4. 8. 6.
8 Lp. सहसा
9 Lp. स्वस्त्यः
10 Lp. समीरया
11 Lp. प्रमृनाभिः
12 For variations, cf. RVKh. and TB. 1. 4. 8. 6
13 Lp. ऋषयस्तुदपस्तापे
14 RVKh. स्वर्गजि०
15 Lp. तपसस्तपसो ध्यायन्तु पवमाने ऋचो भवेत् ॥
16 Lp. पावमानेभि०
17 Lp. मंतापित्र्यो
18 Lp. त्वतं
19 Cf. 1
20 RVKh. तस्करत्वाद्
21 Cf. 1.

ब्रह्मवधात् सुरापानात् सुवर्णस्तेयाद् वृषलिगमनमैथुनसंभवात्[1] ।
गुरोर्दाराभिगमनाच्च तत्पावमानीभिरहं[2] पुनामि ॥ ५ ॥
बालघ्नान् मातृपितृवधाद्[4] भूमितस्करात्[5] सर्ववर्णगमनमैथुनसङ्गमात् ।
पापेभ्यश्च प्रतिग्रहात्[6] सद्यः प्रतिहरन्ति[7] सर्वदुष्कृतं तत्पावमानीभिरहं पुनामि ॥ ६ ॥
क्रयविक्रयाद् योनिदोषाद् भक्षाद्[8] भोज्याप्रतिग्रहात्[9] ।
असंभोजनाच्चापि नृशंसं तत्पावमानीभिरहं पुनामि ॥ ७ ॥
दुर्यष्टं दुरधीतं पापं यच्चाज्ञानतः[10] कृतम्[10] ।
अयाचिताश्चासंयाज्यास्[11]तत्पावमानीभिरहं पुनामि ॥ ८ ॥
ऋतस्य योनयोऽमृतस्य धाम विश्वा देवेभ्यः पुण्यगन्धाः ।
ता न आपः प्रहरन्ति[12] पापम् ।
शुद्धा गच्छामि सुकृतां लोके[13] तत्पावमानीभिरहं पुनामि ॥ ९ ॥
पावमानीः स्वस्त्ययनीर्याभिर्गच्छति नन्दनम्[14] ।
पुण्यांश्च भक्षान्[15] भक्षयत्यमृतत्वञ्च गच्छति ॥ १० ॥
पावमान्यं[16] परं ब्रह्म शुक्रं ज्योतिः सनातनम् ।
पितृंस्तस्योपतिष्ठन्ति[17] क्षीरं सर्पिर्मधूदकम् ॥ ११ ॥
पावमानीः[18] पितृन्देवान्ध्यायेद्यश्च सरस्वतीम् ।
पितृंस्तस्योपतिष्ठेत[19] क्षीरं सर्पिर्मधूदकम् ॥ १२ ॥

1 RVKh. स्वर्ण
2 RVKh. वृषलीगमनमैथुनसंगमात्
3 Cf. 1.
4 Lp. मातापित्र्योर्वधात्
5 Lp. भूमितस्सरात्
6 Lp. प्रतिग्रहं
7 Lp. प्रहरन्ति RVKh. प्रहरति
8 Lp. भक्ष्याद्
9 RVKh. भोज्यात् प्रति०
10 RVKh. ०ज्ञानतोऽकृतम्
11 Lp. अयाचितासंयाज्या
12 So Lp. RVKh and H. प्रवहन्तु
13 So Lp. लोकम् H. RVKh. सुकृतामु लोकं
14 So Lp. RVKh. नान्दनम्
15 Lp. भक्ष्यान्
16 So Lp. and H. RVKh. पावमाकं
17 RVKh. ०पतिष्ठेतत्
18 So Lp. and H. RVKh. पावमानं
19 So Lp. RVKh. ऋषींस्तस्योपवर्ते तत्

अमुकस्यामुकगोत्रस्य अनेन पावमानेन सूक्तेन परा तृप्तिरस्तु स्वर्गप्राप्तिरस्तु पुष्पवृद्धिरस्तु पराक्षयतृप्तिरस्तु । पावमानीमन्त्राः सपरिवाराः सानुचराः गाथा नारायणाः सोमास्तृप्यन्तु तृप्यन्तु तृप्यन्तु ॥

॥ इति पावमान्यब्राह्मणम् ॥

॥ पुरुषमेधः* ॥

॥ पुरुषस्य नारायणस्यार्षम् ॥

ओं नमो नारायणाय । अथ पुरुषसूक्तं लिख्यते ।

ओं ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम्
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम्
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

आनुष्टुभस्य सूक्तस्य त्रिष्टुबन्तस्य देवता ।
विश्वात्मा पुरुषः साक्षादृषिर्नारायणः स्मृतः ॥

सहस्रशीर्षा षोडश नारायणः पौरुषमिति शेषशायिनमत्यथर्वणस्य पुरुषमेधः पुरुषस्य नारायणस्यैकोनानुष्टुप् चतस्रोऽन्त्या वै दाहयज्ञेन । अद्भ्यस्त्रिष्टुप् प्रजापतिश्चरति षड्नां वासुदेवस्य त्रिष्टुबाद्या द्वे पञ्चम्यन्ताश्शेषमानुष्टुभं सरिताङ्काश्यपीनां सरितो यज्ञकीर्तिमिच्छमानानां हिरण्यगर्भेति पञ्चोना द्वादशी त्रिष्टुप् महान्त्या च त्रयोदशी जगती ।

* Cp. RV. 10. 90; VS. 31; ŚB 13. 6. 12; TA. 3. 13.

सहस्रशीर्षेति मन्त्रस्य षोडशर्चस्य सूक्तस्य प्रजापतिः षोडशर्चस्य चेत्तस्य नारायणः । सहस्रशीर्षेति विष्णुमन्त्रस्य नारायण ऋषिः पुरुषो देवता अनुष्टुप् छन्दः होमे विनियोगः ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥
पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम्[1] ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥
एतावानस्य महिमातो ज्यायांश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥
त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत्[2] पुनः ।
ततो विष्वङ् व्यक्रामत् साशनानशने अभि ॥ ४ ॥
तस्माद् विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः ॥ ५ ॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं[3] ग्रीष्म इध्मः शरद्धविः ॥ ६ ॥
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये[4] ॥ ७ ॥
तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यम् ।
पशूंस्तांश्चक्रिरे[5] वायव्यानारण्यान् ग्राम्याश्च ये ॥ ८ ॥
तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ९ ॥
तस्मादश्वा अजायन्त ये च के चोभयादतः[6] ।

1 VS. 31. 2 भाव्यम्

2 TA. 3. 12. 2. अभवात्

3 VS. 31. 14 वसन्तोऽस्यासी०

4 The order of stanzas differs in TA. from RV and VS.

5 Other texts have चक्रे

6 RV. 10. 90. 10 ये के चोभयादतः; VS. 31. 8 agrees with it. TA. 3. 12. 5. येके चौभयादतः

गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ १० ॥
यत्पुरुषं व्यदधुः कतिधैनमकल्पयन्[1] ।
मुखङ्किमस्यासीत् कौ बाहू का ऊरू पादा उच्येते[2] ॥ ११ ॥
ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ १२ ॥
चन्द्रमा मनसो जातश्चक्षुषोरधि सूर्यः[3] ।
नसोर्वायुश्च[4] प्राणश्च मुखादग्निरजायत ॥ १३ ॥
नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥ १४ ॥
सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥ १५ ॥
वेदाहमेतं पुरुषम्महान्तमादित्यवर्णं तमसः परस्तात् ।
सर्वाणि रूपाणि विभज्य धीरो नामानि कृत्वाभिवदन्यदास्ते[5] ॥ १६ ॥
धाता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्रः ।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था अयनाय विद्यते[6] ॥ १७ ॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
तेह नाकं महिमानः[7] सचन्त[7] यत्र पूर्वे साध्याः सन्ति देवाः ॥ १८ ॥

1 RV. VS. and TA. read कतिधा व्यकल्पयन्.

2 RV. has मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते; VS. has मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते, while TA reads मुखं किमस्य कौ बाहू कावूरू पादावुच्येते.

3 RV. 10. 90. 13 has चक्षोः सूर्यो अजायत with which VS. and TA. agree.

4 RV. 10. 90. 13 has मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत with which TA. agrees. VS. 31. 12 reads श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत.

5 TA. 3. 12. 7 runs:—
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचिन्त्य धीरो नामानि कृत्वाभिवदन् यदास्ते ॥

6 TA. 3. 12. 7 runs:—
तमेव विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते ॥

7 cf. RV. 10. 90. 16 तेह नाकं महिमानः सचन्त for which TA. 5. 12. 7 reads ते—सचन्ते; Ms. —मानाः ।

अद्भ्यः[1] सम्भृतः पृथिव्या रसाद्विश्वकर्मणः समवर्तताधि ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवमाजानमग्रे ॥ १६ ॥

॥ इति पूर्वनारायणम् ॥

---

1 Cp. ApŚ 16. 29. 2; VS. 31. 17; KS. 39. 2; MS. 2. 7. 15; KŚS. 21. 1. 17. 13, 1 runs:— अद्भ्यः सम्भूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति तत् पुरुषस्य विश्वमाजानमग्रे ॥

॥ अथोत्तरनारायणम् ॥

ओं प्रजापतिश्चरति[1] गर्भे अन्तरजायमानो बहुधा विजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिंस्तिष्ठन्ति भुवनानि विश्वा ॥ १ ॥
वेदाहमेतं[2] पुरुषं महान्तमादित्यवर्णन्तमसस्तु पारे ।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ २ ॥
यो देवेभ्य[3] आतपति यो देवानां पुरोहितः ।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ ३ ॥
रुचं[4] ब्राह्मयं जनयन्तो देवा अग्रे यदब्रवन्[4] ।
यस्त्वेवं[4] ब्राह्मणो विद्यात्तस्य देवा असन् वशे ॥ ४ ॥
श्रीश्च[5] ते लक्ष्मीश्च ते पत्न्या अहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णां म इषाणामुं म इषाण सर्वलोकं म इषाण ॥ ५ ॥

1 Cp. VS. 31. 19; AV. 10. 8. 13 ĀpŚS. 20. 20 9; MŚS 9. 2. 5. TA. 3. 13. 1 which runs:—
प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते । तस्य धीराः परिजानन्ति योनिं मरीचीनां पदमिच्छन्ति वेधसः ॥

2 Cp. VS. 31. 11; TA. 3. 12. 7; 13. 1; Śvet. Up. 3. 8.

3 Cp. VS. 31. 20; TA. 3. 12. 2. In the MS. आतपतिर्यो is evidently wrong.

4 VS. 31. 21. and TA. 3. 13. 1. read ब्राह्मं, अब्रुवन् and यस्त्वैवं.

5 Cp. VS. 31. 22. TA. 3. 13. 1 which runs:— ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् । इष्टं मनिषाण अमुं मनिषाण । सर्वं मनिषाण ॥ Hs. इष्णां may be इष्टं ।

तदेवाग्निस्तद् वायुस्तत्सूर्यस्तदु चन्द्रमाः ।
तदेव शुक्रं तद् ब्रह्म तदापस्तत् प्रजापतिः ॥ ६ ॥

सर्वे[2] निमेषा जज्ञिरे विद्युतः पुरुषादधि ।
कलाः काष्ठा मुहूर्ताश्चाहोरात्राणि सर्वशः ॥ ७ ॥

अर्धमासा[3] मासा ऋतवः परिवत्सराः ।
स आपस्सुदुघे उभे इमे अन्तरिक्षमथो स्वः ॥ ८ ॥

नैनमूर्ध्वं[4] न तिर्यञ्चन्न मध्ये परिजग्रभ ।
न तस्येशे कश्चन यस्य नाम महद्यशः ॥ ९ ॥

न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाभिगुप्तो य एतद्विदुरमृतास्ते भवन्ति[5] ॥ १० ॥

ऋतं च[6] सत्यं चाभीद्धात्तपसोऽध्यजायत ।
ततो रात्रिरजायत ततः समुद्रो अर्णवः ॥ ११ ॥

समुद्रादर्णवादधि संवत्सरो अजायत ।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ १२ ॥

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः[6] ॥ १३ ॥

अद्भ्यः[7] सम्भृतः पृथिव्या रसाद्विश्वकर्मणः समवर्तताधि ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवमाजानमग्रे[7] ॥ १४ ॥

1 For variations cf. VS. 32. 1; TA. 10. 1. 2.

2 For variations cf. VS. 32. 2; TA. 10. 1. 2.

3 TA. 13. 1. 2 runs;—
अर्द्धमासा मासा ऋतवः संवत्सरश्च कल्पन्ताम् । स आपः प्रदुघे उभे इमे अन्तरिक्षमथो सुवः ॥

4 For variations cf. VS. 32. 2; TA. 10. 1. 2.

5 For variations cf. TA. 10. 1, 3; MahānU. 1. 11; KU. 6. 9; Śvet U. 4. 20.

6 For variations cf. RV. 10. 190. 1; TA. 10. 1. 13

7 For variations cf. VS. 31. 17; KS. 39. 2; MS. 2. 7. 15: KŚS. 21. 1. 17; PG. 1. 14. 3;

ओं सरिताङ्काश्यपीनां सरितो यज्ञकीर्तिमिच्छमानानाम्[1] ।

* * * *

वेनस्तत्पश्यद्[2] भुवनस्य विद्वान् यत्र विश्वं भवत्येकनीडम् ।
यस्मिन्निदं सं च वि चैति सर्वं स ओतः प्रोतश्च विभुः प्रजासु[2] ॥ १५ ॥
प्र[3] तद्वोचेदमृतं नु विद्वान् गन्धर्वो नाम निहितं गुहा सत् ।
त्रीणि पदानि निहिता गुहासु यस्तानि वेद स पितुः पितासत्[3] ॥ १६ ॥
सतो[4] बन्धुर्जनिता स विधाता धामानि[4] वेद भुवनानि विश्वा ।
यत्र देवा अमृतमानशानास्तृतीये धामन्नभ्यैरयन्त[5] ॥ १७ ॥
परीत्य भूतानि परीत्य लोकान् परीत्य सर्वान्[5] प्रदिशो दिशश्च ।
प्रजापतिः प्रथमजा ऋतस्यात्मनात्मानमुपसंविवेश[5] ॥ १८ ॥
परि[6] द्यावापृथिवी विततं सद्य इत्वा परि लोकान् परि दिशः परि स्वः ।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत्[6] ॥ १९ ॥
सदसस्पतिमद्भुतं[7] प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषम् ॥ २० ॥
यस्मादन्यो[8] न पुरोऽस्ति जातो य आविवेश भुवनानि विश्वा ।
प्रजापतिः प्रजया संविदानः त्रीणि ज्योतींषि सचते स षोडशी[8] ॥ २१ ॥

॥ इति बृहत्पुरुषसूक्तं समाप्तम् ॥

---

1 After this follows KS. XL. 1

2 TA. 10. 1. 3 runs:—
वेनस्तत् पश्यन् विश्वा भुवनानि विद्वान् यत्र विश्वं भवत्येकनीडम् । यस्मिन्निदं सञ्च वि चैकं स ओतः प्रोतश्च विभुः प्रजासु ॥ Cp. also AV. 7. 1. 1; VS. 32. 8; Mahān U. 2. 3; ŚSS. 15. 3. 8.

3 For variations cf. VS. 32. 9; TA. 10. 1. 3. Mahān U. 2. 4.

4 Ms नामानि For स नो बन्धुर्जनिता cf. VS. 32. 10; TA. 10. 1. 4; MahānU. 2. 5. Our stanza seems to be a reminiscence of सतो बन्धुमसति RV. 10. 129. 4; TB. 2. 4. 1. 10; TA. 1. 23. 2.

5 For variations cf. VS. 32. 11; TA. 10. 1. 4: MahānU. 2. 7.

6 So Ms. For variations cf. RV. 1. 115. 3; MS. 4. 10. 2 : 147. 4; TB. 2. 8. 7. 1; TA. 10. 1. 4; MahānU. 2. 6.

7 Cp. RV. I. 18. 6; VS. 32. 13; TA. 10. 1. 4; Mahān U. 2. 8; ŚSS. 6. 13. 3.

8 Cf. PB. 12. 13. 32; JB. 1. 205; ŚSS. 9. 5. 1.

॥ लक्ष्मीसूक्तम्* ॥

यः[1] शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रियः पञ्चदशर्चन्तु श्रीकामः सततं जपेत्[1] ॥

हिरण्यवर्णामित्येतस्य पञ्चदशर्चस्य चिक्लीत कर्दम इन्दिरासुता ऋषयः । श्रीर्देवता । आद्यास्तिस्रोऽनुष्टुभः । एका प्रस्तारपंक्तिः । श्रीमहालक्ष्मीप्रीत्यर्थे होमे विनियोगः । ध्यानम् आसीनां सरसीरुहम् । ओं हिरण्यवर्णामेकोना श्रीर्भार्गवी श्रीरलक्ष्मीघ्नं श्रैय्यमानुष्टुभं वै शकर्यन्तं हि साम्रेयी चतुर्थी प्रस्तारपंक्तिस्त्रिष्टुभौ पञ्चदश्युपरिष्टाद् बृहती श्रीपुत्रा परे षट् ॥

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजम्[2] ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह[3] ॥ १ ॥
ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयङ्गामश्वं पुरुषानहम् ॥ २ ॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्[4] ।
श्रियन्देवीमुपह्वये श्रीर्मान्देवी जुषताम् ॥ ३ ॥
कांस्यस्मितां[6] हिरण्यप्राकारामार्द्रां ज्वलन्तीन्तृप्तान्तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णान्तामिहोपह्वये श्रियम् ॥ ४ ॥

* Cf. RVKh.

1 For this sūkta op. RVKhila.

2 RVKh. स्रजाम्.

3 RVKh. म आवह

4 RVKh. °प्रबोधिनीम्

5 RVKh. श्रीर्मादेवी

6 RVKh. कांसोस्मितां

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियंल्लोके देवजुष्टामुदाराम् ।
तां पद्मनेमिं[1] शरणं प्रपद्ये अलक्ष्मीर्मे नशतां त्वा वृणोमि[2] ॥ ५ ॥
आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु मामान्तरायश्च[3] बाह्या अलक्ष्मीः ॥ ६ ॥
उपैतु मान्देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि[4] राष्ट्रेऽस्मिन् कीर्तिं[5] वृद्धिं[5] दधातु[6] मे ॥ ७ ॥
क्षुत्पिपासामलाज्येष्ठामलक्ष्मीन्नाशयाम्यहम् ।
अभूतिमसमृद्धिञ्च सर्वां निर्णुद मे गृहात् ॥ ८ ॥
गन्धद्वारान्दुराधर्षां नित्यपुष्टाङ्करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ९ ॥
मनसः काममाकूतिं[7] वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ १० ॥
कर्दमेन प्रजा भूत्वा[8] मयि सम्भव कर्दम ।
श्रियं वासाय[9] मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥
आपः स्रवन्तु[10] स्निग्धानि चिक्लीत वस मे गृहे ।
निचदेवीम्मातरं श्रियं वासाय[11] मे कुले ॥ १२ ॥
आर्द्रां पुष्करिणीं पुष्टीं[12] पिङ्गलां पद्ममालिनीम् ।
सूर्यां[13] हिरण्मयीं लक्ष्मीञ्जातवेदो ममावह[14] ॥ १३ ॥
तस्मां[15] आवह[15] जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वां[16] विन्दये[16] पुरुषानहम् ॥ १४ ॥

1 RVKh. पद्मिनीमीं
2 RVKh. नश्यतां त्वां वृणे.
3 RVKh. ममान्तरायाश्च
4 Lp. प्रातर्भूतो॰; RVKh ॰र्भूतोसुराष्ट्रे
5 RVKh. कीर्तिमृद्धिं
6 RVKh. ददातु
7 RVKh. ॰माकूतं
8 RVKh. भूता
9 RVKh. वासय
10 RVKh. सृजन्तु
11 Cf. 9.
12 RVKh. पुष्टिं
13 RVKh. चन्द्रां
14 RVKh. म आवह
15 RVKh. तां म आवह
16 RVKh. ॰श्वान् विन्देयं. Lp. ॰श्व may be emended to ॰श्वा; ॰श्वं or ॰श्वान्.

य[1] आनन्दं समाविशदुपादावन्विभावस्व ।
श्रियः सर्वा उपासिष्व चिक्लेत[2] वस मे गृहे ॥ १५ ॥
कर्दमेन प्रजाः सृष्टाः[3] सम्भूतिङ्गमयामसि ।
अदधादुपगाद्येषाङ्कामान्त्संसृज्महे ॥ १६ ॥
जातवेदः[4] पुनीहि मा[4] रायस्पोषश्च[5] धारय[5] ।
अग्निर्मा[6] तस्मादेनसो विश्वान्मुञ्चत्वंहसः[6] ॥ १७ ॥
अच्छानमित्रमहो देवो देवानग्ने वोचः सुमतिं रोदस्योः ।
वीहि स्वस्तिं सुक्षितिं दिवो नॄन् द्विषो अंहांसि दुरिता तरेम ।
तातरेम तवावसा तरेम[7] ॥ १८ ॥

॥ इति लक्ष्मीसूक्तम् ॥

---

1 From this onwards is not found elsewhere.

2 May be चिक्लीत

3 Cf. above कर्दमेन प्रजा भूत्वा

4 For this pāda cf. RV. 9. 67. 27; VS. 19. 39; KS. 38. 2; MS. 3. 11. 10.

5 Cf. KS. 5. 1.

6 Cf. KS. 38. 5; 106. 7; VS. 20. 14; MS. 3. 11. 10; 157. 2; TS. 1. 8. 5. 3; AV. 7. 6. 7. 2; TA. 2. 3. 1;

7 Cf. RV. 6. 2. 11:—
अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः ।
वीहि...... तरेम ॥

॥ हिरण्यसूक्तम्* ॥

ओं आयुष्यं दश दाक्षायणायैकर्चाः सनकः सनातनः सनन्दनः सहसंज्ञस्स-मस्सुश्रीः सुवाक् सर्वे हिरण्यात्मस्तुतिः पञ्चम्यष्टमी नवम्यस्त्रिष्टुभः सप्तमी शाकरी आद्या चतुर्थी च ॥

आयुष्यं वर्चस्यं रायस्पोषमौद्भिदम् ।
इदं हिरण्यं वर्चस्वज्जैत्राय विशतादिमाम्[1] ॥ १ ॥
उच्चैर्वाजी[2] पृतनाषाट् सभासाहं धनञ्जयम् ।
सर्वास्समग्रा ऋद्धयो हिरण्येऽस्मिन्त्समाहिताः ॥ २ ॥
शुनमहँ[3] हिरण्यस्य पितुर्नामेव जग्रभ ।
तेन मां सूर्यत्वचमकरं पुरुषं[4] प्रियम्[4] ॥ ३ ॥
सम्राजं च विराजं चाभिष्टिर्या च मे ध्रुवा ।
लक्ष्मी राष्ट्रस्य या मुखे तया मामिन्द्र संसृज[5] ॥ ४ ॥
अग्नेः प्रजातं परि यद्धिरण्यममृतं जज्ञे[6] अधि मर्त्येषु ।
य एनँद्वेद[7] स इदेनमर्हति जरामृत्युर्भवति यो बिभर्ति ॥ ५ ॥
यद्वेद राजा वरुणो यदु देवी सरस्वती ।
इन्द्रो यद् वृत्रहा वेद तन्मे वर्चस आयुषे ॥ ६ ॥

* Lp. p. 21.

1 Lp. वर्चस्व may be emended to ०स्वि or ०स्वत्० RVKh. वर्चस्वजैत्रायाविशतादु मां.

2 So Lp. RVKh. ०र्वाजि

3 So Lp. RVKh. शुनमहं

4 So Lp. RVKh. पुरुषु प्रियम्.

5 Lp. संस्यज.

6 So Lp. RVKh. यज्ञे.

7 So Lp. RVKh. एतद्

न तद्रक्षांसि न पिशाचास्तरन्ति[1] देवानामोजः प्रथमजं ह्येतत्[2] ।
यो बिभर्ति दाक्षायणा हिरण्यं स देवेषु कृणुते दीर्घमायुः
स मनुष्येषु कृणुते दीर्घमायुः ॥ ७ ॥

यदाबध्नन् दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः ।
तन्म आबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासत् ॥ ८ ॥

घृताद्दुर्लुप्तं[3] मधुमत्सुपर्णं धनञ्जयं धरुणं[4] धारयिष्णु ।
पृणक्[5] सपत्नानधरांश्च[6] कृण्वदारोह मां महते सौभगाय ॥ ९ ॥

प्रियं मा कुरु देवेषु प्रियं राजसु मा[7] कुरु ।
प्रियं विश्वेषु गोत्रेषु मयि धेहि रुचा रुचम् ॥ १० ॥

॥ इति हिरण्यसूक्तम् ॥

---

1 RVKh. चरंति.
2 RVKh. प्रथमजं ह्ये३तत्
So Lp. RVKh. घृतादुल्लुप्तं
4 So Lp. RVKh. धरुणं
5 So Lp. RVKh. ऋणक्
6 So Lp. RVKh. सपत्नादधरांश्च
7 RVKh. मां

॥ आवाहनम् ॥

आ[1] त्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैरिह केतुमद्भिः ।
वाताजवेन बलवद्भिर्मनोजवा यातु शीघ्रं मम रुद्राय हव्यम् ॥ ११ ॥
देवानां च ऋषीणां चासुराणां च पूर्वजम् ।
सहस्राक्षं विरूपाक्षं विश्वरूपं महादेवं शिवमावाहयाम्यहम् ॥ १२ ॥
आवाहयाम्यहं देवमीश्वरं पार्वतीपतिम् ।
वृषभासनमारूढं नागाभरणभूषितम् ॥
प्रीयतां यजमानस्य तुष्टो भूयाज्जगत्पतिः ।
शुक्लवर्णो महातेजाः शुक्लस्रग्दामभूषितः ॥
बलिः पुष्पं चरुश्चैव धूपोऽयं प्रतिगृह्यताम् ॥

॥ इति आवाहनम् ॥

---

1 This occurs in Lp. on p. 30. Cf. for this MS. 2. 9. 1 : 119. 3-6 which run:—
आ त्वा वहन्तु हरयः सुचेतसः श्वेतैरश्वैरिह केतुमद्भिः ।
वातजवैर्बलवद्भिर्मनोजवैरस्मिन् यज्ञे मम हव्याय शर्व ॥
देवानां च ऋषीणां चासुराणां च पूर्वजम् ।
महादेवं सहस्राक्षं शिवमावाहयाम्यहम् ॥

॥ अथ यजुः* ॥

देवा देवेषु श्रयन्ताम्[1] ।

प्रथमा द्वितीयेषु श्रयन्ताम् । द्वितीयास्तृतीयेषु श्रयन्ताम् । तृतीयाश्चतुर्थेषु श्रयन्ताम् । चतुर्थाः पञ्चमेषु श्रयन्ताम् । पञ्चमाः षष्ठेषु श्रयन्ताम् । षष्ठाः सप्तमेषु श्रयन्ताम् । सप्तमा अष्टमेषु श्रयन्ताम् । अष्टमा नवमेषु श्रयन्ताम् । नवमा दशमेषु श्रयन्ताम् । दशमा एकादशेषु श्रयन्ताम् । देवास्त्रिरेकादशास्त्रयस्त्रिंशा उत्तरे भवथोत्तरसत्त्वान उत्तरवर्त्मान उत्तरलक्ष्माणो यत्काम इदञ्जुहोमि स मे कामः समृद्ध्यतां वयं स्याम पतयो रयीणाम् । ओं भूर्भुवः स्वः ॥

TB. 3. 11. 2. 1.

देवा देवेषु श्रयध्वम् । प्रथमा द्वितीयेषु श्रयध्वम् । द्वितीयास्तृतीयेषु श्रयध्वम् । तृतीयाश्चतुर्थेषु श्रयध्वम् । चतुर्थाः पञ्चमेषु श्रयध्वम् । पञ्चमाः षष्ठेषु श्रयध्वम् ॥ १ ॥

3. 11. 2. 2.

षष्ठाः सप्तमेषु श्रयध्वम् ।
सप्तमा अष्टमेषु श्रयध्वम् ।
अष्टमा नवमेषु श्रयध्वम् ।
नवमा दशमेषु श्रयध्वम् ।
दशमा एकादशेषु श्रयध्वम् ।

देवास्त्रिरेकादशास्त्रिस्त्रयस्त्रिंशाः उत्तरे भवत । उत्तरवर्त्मान उत्तरसत्त्वानः । यत्काम इदं जुहोमि । तन्मे समृध्यताम् । वयं स्याम पतयो रयीणाम् । भूर्भुवः स्वाहा ॥

* Lp. 10. 42.

1 Cf. KS. XXXV. 6; 55. 3-5:
देवा देवेषु श्रयन्तां प्रथमा द्वितीयेषु श्रयन्तां द्वितीयास्तृतीयेषु श्रयन्तां ये स्थ त्रय एकादशास्त्रयश्च त्रिंशच्च त्रयश्च त्री च शता च त्रयश्च त्री च सहस्रा त इमं यज्ञमवन्तु ते मामवन्त्वनु व आरभेनुमारभध्वम् ॥

॥ यजुः* ॥

शुच्च शुक् चोष्णा चोग्रा च भीमा च राष्ट्रा च बीभत्सा च वैशन्ता च शार्दूलाका चानिराका चामीवा चानाहुतिश्च निर्ऋतिरेतास्ते अग्ने वर्तिमती-स्तन्वस्ताभिस्तङ्गच्छ योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमर्पय ॥

* Cp. Lp. p. 43

॥ यजुः* ॥

भवा शर्वा मृळतं माभियातं[1] पशुपती भूतपती नमो वाम् ।
प्रतिहितामायतां मा[2] विस्राष्टं[3] मा नो हिंसिष्टं द्विपदो मा चतुष्पदः ॥१॥
शुने क्रोष्ट्रे मा शरीराणि कर्तमरिक्रवेभ्यो गृद्धेभ्यो ये च कृष्णा अविष्यवः ।
मक्षिकाः पशुपते वयाँसि विघसे मा विदन्त ॥ २ ॥
क्रन्दाय ते प्राणाय ते याश्च ते भवहेतवः ।
नमस्ते उग्रकर्म सहस्राक्षामर्त्य[4] ॥ ३ ॥
पुरस्तात्ते नमः कूर्मोऽधरागुत्तरादनु ।
अभिवर्गाद्दिवस्पर्यन्तरिक्षाय ते नमः ॥ ४ ॥

* Lp. pp. 43-44
1 Ms. ०तमाभि०
2 Ms. हितामायतामा
3 Ms. विस्रष्टं
4 Ms. ०क्ष मर्त्य.
5 So Ms.

Cf. AV. 11. 2.

भवाशर्वौ मृडतं माभि यातं भूतपती पशुपती नमो वाम् ।
प्रतिहितामायतां मा विस्राष्टं मा नो हिंसिष्टं द्विपदो मा चतुष्पदः ॥१॥
शुने क्रोष्ट्रे मा शरीराणि कर्तमलिक्लवेभ्यो गृध्रेभ्यो ये च कृष्णा अविष्यवः ।
मक्षिकास्ते पशुपते वयांसि ते विघसे मा विदन्त ॥२॥
क्रन्दाय ते प्राणाय याश्च ते भव रोपयः ।
नमस्ते रुद्र कृण्मः सहस्राक्षायामर्त्य ॥३॥
पुरस्तात्ते नमः कृण्मः उत्तरादधरादुत ।
अभीवर्गाद्दिवस्पर्यन्तरिक्षाय ते नमः ॥४॥
मुखाय ते पशुपते यानि चक्षूंषि ते भव ।
त्वचे रूपाय संदृशे प्रतीचीनाय ते नमः ॥५॥

मुखानि ते पशुपते यानि चक्षूँषि ते नमः ।
त्वचे रूपाय संदृशे प्रतीचीनाय ते नमः ॥ ५ ॥
अङ्गेभ्यस्त उदराय जिह्वायै दद्भ्यो गन्धाय घ्राणाय ते नमः ।
अहोरात्राणि विदधत् प्रतीचीनाय ते नमः ॥ ६ ॥
अस्त्रा नीलकपर्दिने सहस्राक्षेण वाजिना ।
शर्वेणाध्वगघातिना तेन मा समरामसि ॥ ७ ॥
भव ईशे द्विपदो भव ईशे चतुष्पदः ।
भवो विश्वस्य राजति ॥ ८ ॥
भवाय गाव ओषधीरजीगुर्भवाय द्यावापृथिवी नमेते ।
स नो रुद्रः परि णो वृणक्तु ॥ ९ ॥
मा नोभिर्मास्त नमो अस्त्वस्मै चतुर्नमोऽष्टकृत्वो भवाय ।
दशकृत्वः पशुपते नमस्ते ॥ १० ॥
योऽभियातो नि लयते त्वां रुद्र नि चिकीर्षति ।
यो नः पश्चादति प्रयुङ्क्ते तं विद्धयस्व पदवीरिव ॥ ११ ॥
नमः सायं नमः प्रातर्नमो रात्र्या नमो दिवा ।
भवाय च शर्वाय चोभाभ्यामकरं नमः ॥ १२ ॥

Cf. AV. 11. 2.

अङ्गेभ्यस्त उदराय जिह्वाया आस्याय ते ।
दद्भ्यो गन्धाय ते नमः ॥६॥
अस्त्रा नीलशिखण्डेन सहस्राक्षेण वाजिना ।
रुद्रेणार्धकघातिना तेन मा समरामहि ॥७॥
स नो भवः परि वृणक्तु विश्वत आप इवाग्निः परि वृणक्तु नो भवः ।
मा नोऽभि मांस्त नमो अस्त्वस्मै ॥८॥
चतुर्नमो अष्टकृत्वो भवाय दशकृत्वः पशुपते नमस्ते ।
तवेमे पञ्च पशवो विभक्ता गावो अश्वाः पुरुषा अजावयः ॥९॥
यो३भियातो नि. लयते त्वां रुद्र नि चिकीर्षति ।
पश्चादनु प्रयुङ्क्ते तं विद्धस्य पदनीरिव ॥१३॥
नमः सायं नमः प्रातर्नमो रात्र्या नमो दिवा ।
भवाय च शर्वाय चोभाभ्यामकरं नमः ॥१६॥

॥ यजुः* ॥

अथ वायोरेकादश पुरुषस्यैकादश स्त्रीकस्य ॥

ओं प्रभ्राजमानानां[1] रुद्राणां स्थाने
स्वतेजसा भानि ।

व्यवजातानां[2] रुद्राणां स्थाने स्वतेजसा भानि ।

वासुकिवैद्युतानां रुद्राणां स्था० ॥

रजतानां रुद्राणां स्था० ॥

परुषाणां[3] रुद्राणां स्था० ॥

श्यामानां रुद्राणां स्था० ॥

कपिलानां रुद्राणां स्था० ॥

अतिलोहितानां रुद्राणां स्था० ॥

ऊर्ध्वानां रुद्राणां स्था० ॥

अवपतन्तानां रुद्राणां स्था० ॥

वैद्युतानां रुद्राणां स्थाने
स्वतेजसा भानि ॥

ओं भूर्भुवस्स्वः[4] रूपाणि वो मिथुनं
मा वो मिथुनं रीढ्वम्[4] ॥

* Lp. 45.

1 Cf. TA. 1. 17. 1-2.

2 TA. व्यवदातानां

3 TA. परुषाणां. Ms. पुरु०

4 Omitted in TA.

ओं प्रभ्राजमानानां[1] रुद्राणीनां स्थाने
स्वतेजसा भानि ।
व्यवजातानां[2] रुद्राणीनां स्था० ॥
वासुकिवैद्युतीनां रुद्राणीनां स्था० ॥
रजतानां रुद्राणीनां स्था० ॥
परुषाणां[3] रुद्राणीनां स्था० ॥
श्यामानां रुद्राणीनां स्था० ॥
कपिलानां रुद्राणीनां स्था० ॥
अतिलोहितानां रुद्राणीनां स्था० ॥
ऊर्ध्वानां रुद्राणीनां स्था० ॥
अवपतन्तीनां रुद्राणीनां स्था० ॥
वैद्युतीनां रुद्राणीनां स्था० ॥
ओं भूर्भुवस्स्वः स्त्रियो[4] वो मिथुनं
मा वो[5] मिथुनं रीढ्वम् ॥

1 TA. प्रभ्राजमानीनां
2 TA. व्यवदातीनां
3 The Ms. पुरुषाणां. TA. परुषाणां
4 TA. रूपाणि
5 TA. नो.

॥ गायत्रीब्राह्मणम्* ॥

ओं श्रीगणेशाय नमः । अथ गायत्रीब्राह्मणम्[1] । ओं भूः स्वाहा । ओं भुवः । ओं स्वः । ओं भूर्भुवः स्वः स्वाहा । ओं भूः स्वाहा । ओं भुवः । ओं स्वः । ओं महः । ओं जनः । ओं तपः । ओं सत्यं स्वाहा । ओं तत्सवितुर्वरेण्यम् ।

ओं प्रातःकाले कुमारी कुमुदकलिकया जप्यमाला जपन्ती ।
मध्याह्ने प्रौढरूपा विकसितवदना चारुनेत्रा विशाला ॥
सन्ध्यायां वृद्धरूपा गलितकुचयुगा मुण्डमालां वहन्ती ।
सा सन्ध्या पातु नित्यं हरिहरवदना ब्रह्मणश्चादिमुद्रा ॥

ओं अग्नये स्वाहेत्यग्निः सर्वा देवता सौख्यं करोत्यसौ वा अग्निः प्रीणाति[2] । ओं भुवः स्वाहेति भुवनानां पतय इत्यद्भुतं[3] प्रीणाति । ओं स्वः स्वाहेत्याप एष इमं लोकं जयतु । तेन सोमपः प्रीणाति । ओं भूर्भुवः स्वाहेत्यग्निं सूर्यं[4] ज्योतिष्मन्तं करोति । यजमानो वृध्यते । ओं भूः स्वाहेति भूमिर्वै

* This is based on a Ms. named गायत्रीब्राह्मण, No 6564, Lālchand Library, D. A. V. College, Lahore.

1 U reads after this प्रातःकाले कुमारी etc. with variants जप्यमालां, गलितकुचयुगी, and सा देवी दिव्यदेहा हरिहरवदना पातु नो ह्यादिमुद्रा. It goes on ओं महाव्याहृतयः । प्रजापतेः । ओं भूः लोकस्यानुष्टुप् । ककुभः पृथ्वी ऋषिः ॥ विराट् ।......ब्रह्म देवता होमे । विनियोगः । ओं अग्नये स्वाहेत्यग्निः etc.

2 After this U reads ओं भूस्स्वाहेति भूमिं वै उर्वन्तरिक्षम् । उर्वादीन्तेन प्रीणाति ।

3 U अद्भुतं तेन प्रीणाति

4 So U. Gb. अग्निसूर्यं

द्विपदश्चैव चतुष्पदस्तेन[1] वृध्यते। ओं भुवः स्वाहेत्यन्तरिक्षं[2] वायुर्वै देवतास्तेन[2] वायवः प्रीणाति[3]। ओं स्वः स्वाहेति वाचो मे प्राणापानौ सम्राट् चक्षुर्स्तेन[4] प्रीणाति। ओं महः स्वाहेति महां[5] मनसां[5] महांल्लोकाञ्जयति। होतारं तेन प्रीणाति। ओं जनः स्वाहेति जनानां जनपतिर्जन्तूनामिमं[6] लोकं तेन प्रीणाति। ओं तपः स्वाहेति तपो वा असावादित्यो[7] द्वादशमासः। संवत्सरस्तेन प्रीणाति। ओं सत्यं स्वाहेति सत्यमिति वरुणाचन्द्रमसौ[8] नक्षत्राणि सप्तार्णवास्तेन प्रीणात्यथोत्तरस्मै सर्वा देवतास्तेन प्रीणाति[9][10]। तेन सौख्यं करोति। यजमानो वृध्यते। सन्तत्यै प्रजावत्या भवति। अविच्छिन्नं प्रदीयते य एवं वेद।

इति महाव्याहृतिब्राह्मणम्[11] ॥

ओं गायत्री वेदधात्री शतमखफलदां सर्ववेदैकवेद्याम्।
चिद्रूपां प्राणशक्तिपरमशिवपदं श्रीपदं नः करोतु।
सर्वश्रेष्ठं पदं तत्सवितुरनुपदं ते वरेण्यं शरण्यम्।
भर्गो देवस्य धीमह्यभिदधति धियो यो धियो वर्धते नः ॥

1 So U. Gb has द्विपदाश्चैव चतुष्पदास्तेन

2 So Gb. U reads ०त्यन्तरिक्षं वै वायुदेवतास्तेन

3 So Gb. U प्रीणन्ति.

4 So Gb. U चक्षुषोस्तेन

5 So Gb. U महामनसां

6 So Gb. U and Lp. जनपतेर्ज०. Upto this is broken in Lp.

7 So U and Lp. Gb. असा आदित्य

8 So U and Lp. Gb. वरुणो चन्द्रमसा

9 So Gb and U. Lp. सप्तार्णवास्तेन प्रीणन्ति तेन सौख्यं करोति.

10 So in Gb and U. Lp. प्रीणन्ति.

11 So Gb. U omits this and reads instead ओं अस्य मन्त्रस्य जमदग्निर्भारद्वाज ऋषयः प्रजापतिर्देवता देवी बृहतेच्छन्दः सर्वप्रायश्चित्तार्थहोमे विनियोगः। It omits ओं गायत्री वेदधात्री etc. Lp. reads इति व्याहृतिब्राह्मणम्। उत्तिष्ठाष्टौ ब्राह्मणस्पत्यम्। उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्ते महि उप प्रयन्तो महतस्सदानव इन्द्र प्राशूर्भवा सचा त्वामिद्धि सहसस्पुत्र मर्त्य उप ब्रूते धने हिते स्ववीर्यं मरुत आस्वश्व्यं दधीतयो व आचके। प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूर्य ता अच्छा वीरन्नर्यपंक्तिराधसं देवा यज्ञन्नयन्तु नः यो वाघते ददाति सुनरं स्वन्नं ते अक्षितिश्रवः तस्मा इळा स्वर्यी रामा यजामहे * * * * उरु ता महाधने नार्भे अस्ति वज्रिणः। ओं अथ गायत्रीब्राह्मणम्। वक्त्रैः पञ्चभिः भूषितां हरिहरब्रह्मादिभिः संस्तुतां

ओं तत्सवितुः। ओं तत्सवितुरिति तदादित्यः सविता प्रसविता प्रजया पशुषु प्रतितिष्ठति। वरेण्यमित्यग्निर्वै वरिवः[1] कृणोति। भर्गेति रश्मयः शतं सहस्रमयुतं च प्रतनोति। देवस्य द्योतना परमः[2] कामस्यं। धीमहीति धीमान् विश्वस्य व्याप्नोति। धियो यो न इति अह्वा[3] रात्रिः सन्ध्यामुपयन्ति। प्रचोदयादिति प्रजापतिर्वा प्रजामुपसृजति। पशुषु प्रतितिष्ठति। तस्माद् गायत्री चतुर्विंशत्यक्षरा भवति। सर्वस्याप्त्यै सर्वस्यावरुद्ध्यैनं ब्रह्मचारिणं शतं सहस्रमयुतं च प्रजावान् पशुमान् रयिमानायुष्मन्तं करोति। तस्माद् गायत्री आयुरिव परमकामं गायत्र्याभिप्रतितिष्ठति य एवं वेद।

॥ इति गायत्रीब्राह्मणम् ॥

ओं देवाश्च वा असुराश्च संयत्ता आसंस्तान् गायत्र्यन्तरतिष्ठदोजो[4] वै वीर्यमन्नाद्यं परिगृह्य संवत्सरो वा वैनं सोऽन्तरातिष्ठच्चतुर्विंशति गायत्र्या अक्षराणि चतुर्विंशति संवत्सरस्यार्धमासास्ते विदुर्यतरान्वा इयमुपावत्स्यति[5] त इदं भविष्यन्तीति तां[6] व्यह्वयन्तदां[7] भीत्या सुरा अह्वयन्[7] विश्वकर्मन्निति देवाः[8] सा नान्यतरंश्च[8] नोपावर्तत ते[9] देवा एतद्यजुरपश्यन्नोजोसि महोऽसि बलमसि भ्राजोऽसि देवानान्धाम नामासि विश्वमभि[10] विश्वायुः सर्वमसि सर्वायुरभिभूरिति। सा देवानुपावर्तत[11]। ततो देवा अभवन् परासुरा अभवन्नाग्नेय-

नानावर्णविभूषितां समुकुटां दोर्भिः समन्ताद् वृताम्।
हंसस्थां सुमनोरमां शुभफलां पापार्तिविध्वंसिनीम्
गायत्रीं परमाद्भुतामभयदां भेजे मुदा युक्तिदाम्।
विविधमणिमयूखस्फीतकेयूरहार–
प्रवरकनककाञ्चीकिंकिनीकंकनाढ्याम्।
सकलभुवनरक्षासृष्टिसंहारकर्त्रीम्
निगमपरमगुह्यामाश्रये वेददात्रीम्॥
अस्य मन्त्रस्य जमदग्निभारद्वाज ऋषयः विनियोगः॥

1 Lp. वरिवं
2 So Gb. U and Lp. परमकामस्य
3 Lp. अह्नः
4 So Gb. U and Lp. गायत्र्यान्तराति०
5 So VM. U and Lp. Gb. उपवत्स्यति
6 So Gb and Lp. U त
7 So U and Gb. Lp. तेदाभीत्यासुराह्वयन्
8 Gb. देवाः सा नान्यतरोश्च. U. VM. देवासा नान्यतरंश्व. Lp. देवा सानान्यतरंश्च
9 So U. VM. and Lp. Gb. तान्
10 So Gb. U and Lp. ०मसि ?
11 So U and Lp. Gb. देवानुपवर्तत.

मष्टाकपालं निर्वपेद् भ्रातृव्यवान्[1] स्पर्धमानो वा तमासाद्यैतैर्यजुर्भिरभिमृशेदोजो[3] वै वीर्यं संवत्सर ओज एव वीर्यं भ्रातृव्यस्य वृङ्क्ते । स निर्वीर्यः पराभवति । सैषा गायत्री नामेष्टिरथो[4] आहुः चैत्रस्य[5] संवर्ग[6] इति[7] ॥

यस्या[8] भूः पाददेशे वसति तदुपरि खं गुदे स्वर्गलोके
नाभौ मध्ये महाख्यो जन उरसि गतः कण्ठगामी तपश्च
सत्यं मूर्ध्नीश्वराख्या त्रिगुणविरहिता निष्कला सत्स्वरूपा ।
सा सन्ध्या पातु नित्यं हरिहरनमिता ब्रह्मणश्चादिमुद्रा ॥

ओं घोराणां ब्राह्मणानि । प्रजापतेर्घोराणामार्षम् । ओं द्रष्ट्रे नम इति ।

1 So GB. and Lp. U, VMK ०वान् वा

2 So U, VMK and Lp. Gb. तमासाद्य-स्तैर्य०

3 So Gb and VMK. U ०भिमृशेदो० Lp. रभिमृषेदो०

4 So U and Lp. Gb. and VMK नामिष्टेरथो

5 So Gb. VMK and Lp. U चत्रस्य

6 Lp. and VMK give here इति गायत्रीब्राह्मणम्.

7 After संवर्ग इति U reads:—
दात्री च ऋषिः । गायत्रीच्छन्दः । विष्णुर्देवता । होमे विनियोगः । ओं अथ घोराणामार्षब्राह्मणम् । ओं घोराणामार्षम् । ब्राह्मणानि प्रजापतिघोराणामार्षम् ।
Lp. runs ओं अथ द्रष्ट्रब्राह्मणं लिख्यते । ओं घोराणामार्षम् । ब्राह्मणानि यजुर्नमस्कारः प्रजापतिर्ब्रह्मणः । घोराणां यजुः । दधीच ऋषिः । गायत्रीच्छन्दः । विष्णुर्देवता । पूजने विनियोगः ।

8 This is not found in Lp at this place. U however gives this at the beginning of this brāhmaṇa. It runs :—

ओं यस्या भूः * * *
* * * * *
* * * * सुस्वरूपा
सा देवी विश्वरूपा वितरतु विभवं वेदमूला पराख्या ॥
ओं गायत्रीं त्रिजगन्नुतां दशभुजां केयूरहारान्विताम्
वक्त्रैः पञ्चविभूषितां त्रिनयनां सर्वायुधैस्संयुताम् ।
हंसस्थां वृषवाहनां खगपतावानन्दितां मुक्तिदाम्
ब्रह्माविष्णुमहेश्वरादिभिर्नुतां वन्दे त्रिरूपान्विताम् ॥
ओं पूर्वाह्णे भाति रक्ता हुतवहवदना हंसयानैकसंस्था
मध्याह्ने चापि शुक्ला वृषवरवहना नागयज्ञोत्तरीया ।
कृष्णा चैवापराह्णे खगवरवहना शंखचक्रादिहस्ता
सा सन्ध्या पातु नित्यं हरिहरवदना ब्रह्मरूपा त्रिकालम् ॥
ओजोऽसीति गायत्रीमावाहब्राह्मणम् ।
उत्तिष्ठ ब्रह्मण्यनिप्रजापतेः । ओजोऽसीति देवानामार्षम् । ओं देवाश्च वा असुराश्च

ओं द्रष्ट्रे नम उपद्रष्ट्रे नमोऽनुद्रष्ट्रे नम इत्यग्निर्वै द्रष्टा[1] ब्रह्मणं उपद्रष्टा[2] वायुरनुद्रष्टा[3] तेभ्य एव नमस्करोति। ख्यात्रे नम उपख्यात्रे[4] नमोऽनुख्यात्रे नम इति संवत्सरो वै ख्यातादित्यं[5] उपख्याता चन्द्रमा अनुख्याता तेभ्य एव नमस्करोति। शृण्वते नम उपशृण्वते नम इति द्यावापृथिवीभ्यामेव नमस्करोति। सते नमोऽसते[6] नम इति सदसद्भ्यामेव नमस्करोति। जाताय नमो जनिष्यमाणाय नम इति यज्ञायैव दक्षिणायै च नमस्करोति। भूताय नमो भविष्यते नम इत्यृक्सामभ्यामेव नमस्करोति। चक्षुषे नमः श्रोत्राय नम इति यथायजुरेकविंशतिकृत्वो नमस्कुरुते[7]। पञ्चर्तवो द्वादशमासास्त्रय इमे लोका असा[8] आदित्यं एकविंश एष स्वर्गो लोकः[9] स्वर्गस्य लोकस्य समष्ट्यै सर्वा[10] एतर्ह्येतस्मिन् देवता आशंसन्ती सामभिव्याहरिष्यन्तीत्यग्निः[11] सर्वा[12] देवता असा[13] आदित्योऽग्निर्यदेतैर्नमस्कारैरादित्यमुपतिष्ठति[14] सर्वाभिरेवैनं देवताभिः समर्धयत्यश्छंवट्कारं[15]

ये ते पन्थानः सविता[16] पूर्व्यास इति वितता अन्तरिक्षे।
तभिर्नो[17] अद्य पथिभिः सुगेभिः[18] रक्षा च नो अधि च ब्रूहि देव॥

इति, स्वर्गस्य लोकस्य समष्ट्यै नमो ऽग्नये पृथिवीक्षिते इत्यग्नीनायतनेषु[19] निदधातीमानेवैनांल्लोकान् गमयति[20]॥ इति द्रष्टे नमब्राह्मणम्[21]॥

संयत्ता etc.

1 So GB. U, VMK and Lp. द्रष्ट्रा ब्राह्मण.

2 So Gb. U, VMK and Lp उपद्रष्ट्रा

3 So Gb. U, VMK and Lp ०नुद्रष्ट्रा

4 So Gb. VMK and Lp. U उपाख्यात्रे

5 So Gb. U, VMK and Lp दित्या उपाख्याता

6 So U, VMK and Lp. Gb सते नमाः सते नम

7 VMK नमस्करोति

8 So Gb. and U. VMK असावादित्य. Lp असावादित्या

9 Omitted in Lp. VMK एष स्वर्गलोकः

10 VMK सर्वा वा

11 VMK ०रिष्यति०

12 So Gb and VMK. U and Lp सर्वा वा

13 VMK असावादित्यो

14 So Gb. U, VMK and Lp ०तिष्ठते

15 So Gb, VMK and Lp. U ०कर

16 So Gb, VMK and Lp. U सवितः

17 So Gb, VMK and Lp. U नोऽद्य

18 VMK सुगेभि रक्षा

19 So Lp. U, VMK. and Gb. ०यतनीषु. VMK ०त्यग्निनायतनेषु

20 So Gb. VMK and Lp. U जयति.

21 So Gb and Lp. U and VMK द्रष्टृब्रा०

ओमित्येकमजस्वरूपमपरं तत्सप्तधा भाजितं
तारं तन्त्रसमन्वितं परतरं पादत्रयीगर्भितम् ।
आपो ज्योतिरसोमृतं जनमहः सत्यं तपो भूर्भुवः
स्वश्चेत्येषु नमामि भूर्भुवः स्वरोमित्येकमन्त्रं परम् ॥

यो विश्वचक्षुरुत इति ॥ ओं यो विश्वचक्षुरुत इति विश्वचक्षुर्वै देवानां भवति विश्वतोमुख इति विश्वमुखान् दर्शयति विश्वतोहस्त इति विश्वहस्त उत्तमा भवति उत विश्वतस्पादिति विश्वतस्पाद्धाधार सं बाहुभ्यामिति सर्वबाहुर्वै नमते नमस्कुर्याः कुर्वते सं यजत्रैरिति सर्वस्य जित्यै द्यावापृथिवी इति द्यावापृथिव्योर्धारयते जनयन् देव एक इति जनमिति जनानां जनपतेर्जन्तूनात्मा वै सर्वं व्यायन्त देव एको भवति स देवदेवेभ्यो रक्षांसि भवति य एवं वेद ॥

ब्राह्मी हंसरथस्थिता मुखसरोज्योतिश्चतुर्वाङ्मयी
मुद्रापुस्तककुण्डलाक्षवलयाधारा चतुर्भिर्भुजैः ।

द्रष्टृ ब्रा०. After this VMK runs :—

॥ अथ सर्वदेवब्राह्मणम् ॥

भूमेर्वैश्वकर्मणस्य जगती विश्वकर्मा विश्वरूपपरं ब्रह्म ऋषिः पृथिवी छन्दः आकाशो देवता श्रीमहागायत्रीप्रीत्यर्थं होमे विनियोगः ।

मध्याह्ने वृषवाहना त्रिनयना
शुक्लाम्बरालेपना
खट्वाङ्गं त्रिशिखं कपालडमरू
दोर्भिर्वहन्ती सदा ।
शुक्लाशुक्लविभूषणा नरशिरो-
मालाभिरावेष्टिता
भूयाद्यौवनवत्यसौ त्रिजगतां
सर्वार्तिविद्राविणी ॥
यो विश्वचक्षुरुत विश्वतोमुखो
विश्वतोहस्त उत विश्वतस्पात् ।
सं बाहुभ्यां नमते सं यजत्रै-
र्द्यावापृथिवी जनयन् देव एकः ॥

यो विश्वचक्षुरुत etc.

After संवर्गः VMK runs :—

॥ अथ द्रष्टृब्राह्मणम् ॥

घोराणामार्षं ब्राह्मणानि प्रजापतेः यजुर्नमस्कारः । घोराणां यजुः दधीच ऋषिः गायत्रीछन्दः श्रीविष्णुर्देवता श्रीमहागायत्रीप्रीत्यर्थं होमे विनियोगः ।

विविधमणिमयूखस्फीतकेयूरहार
प्रवरकनककाञ्चीकिङ्किणीकङ्कणाढ्याम् ।
सकलभुवनरक्षासृष्टिसंहारसक्ताम्
निगमपरमविद्यामाश्रये वेदधात्रीम् ॥

अश्वमेधे घोराणामार्षम् । द्रष्ट्रे नम उपद्रष्ट्रे नमोऽनुद्रष्ट्रे नमः ख्यात्रे नम उपख्यात्रे नमोनुख्यात्रे नमः शृण्वते नमं उपशृण्वते नमः सते नमोऽसते नमो जाताय नमो जनिष्यमाणाय नमो भूताय नमो भविष्यते नमश्चक्षुषे नमः श्रोत्राय नमो मनसे नमो वाचे नमो ब्रह्मणे नमः श्रान्ताय नमस्तपसे नमः ॥ ओं द्रष्ट्रे नम etc.

रक्तारक्तविभूषणा प्रहसिता रक्ताम्बरालेपना
कौमारी मम जीवितावधि सदा भूयादघध्वंसिनी ॥

ओं आ ब्रह्मन् ब्राह्मणो इति ॥ ओं आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामित्याह ब्राह्मण एव ब्रह्मवर्चसं दधाति तस्मात् पुरा ब्राह्मणो ब्रह्मवर्चसी जायताम् अस्मिन् राष्ट्रे राजन्यः शूर इषव्योतिव्यते महारथो जायतामिति राजन्य एव शौर्यं महिमानं दधाति तस्मात् पुरा राजन्यः शूर इषव्योतिव्यते महारथो जज्ञे दुग्ध्री धेनुरिति धेन्वामेव पयो दधाति तस्मात् पुरा धेनुर्दुग्ध्री जज्ञे वोढानड्वानित्यनड्वा एव बलं दधाति तस्मात् पुरानड्वा वोढा जज्ञे आश्वसप्तिरिति अश्व एव जवं दधाति तस्मात् पुराश्वो अश्वोऽजायत पुरन्धिर्योषेति ज्योतिरेव रूपं दधाति तस्माद् रूपाणि ज्योतिः प्रियो भावुको जिष्णूरथेष्ठा इति राजन्य एव जैत्रं महिमानं दधाति तस्मात् पुरा राजन्यो जिष्णुर्जज्ञे सभेयो युवेत्येष वै सभेयो युवा यः प्रथमवयसि तस्मात् प्रथमवयसि स्त्रीणां प्रियो युवा पुमान् भावुकः आस्य यजमानस्य वीरो जायतामिति यजमानस्यैव प्रजायां वीर्यं दधाति तस्मात् पुरा जनस्य वीरो जज्ञे निकामे निकामे नः पर्जन्यो वर्षत्विति निकामे निकामे वै तत्र पर्जन्यो वर्षति यत्रैतेन यज्ञेन यजन्ते फलवतीर्न ओषधयः पच्यन्तामिति फलवत्यो वै तत्रौषधयः पच्यन्ते यत्रैतेन यज्ञेन यजन्ते योगक्षेमो वै तत्र कल्पते यत्रैतेन यज्ञेन यजन्ते योगक्षेमो नः कल्पतामिति योगक्षेमो वै तत्र कल्पते यत्रैतेन यज्ञेन यजन्ते क्लृप्तः प्रजातनी नमो भवति य एवं वेद[1] । इति द्रष्टृब्राह्मणम् ॥

॥ समाप्तं गायत्रीब्राह्मणम् ॥

---

1 For विश्वचक्षुर्ब्राह्मण (=सर्वदेवब्राह्मण of VMK) and आब्रह्मन् ब्राह्मण cp. KBS pp. 73—75. These two Brāhmaṇas are alike both in the गायत्रीब्राह्मण (MS. No 6564, Lalchand Library, Lahore) and VMK and hence they are given here without any change. Both include them in the गायत्रीब्राह्मण.

॥ मार्तण्डमन्त्राः ॥

ओं अस्य श्रीकूष्माण्डपाठस्य ब्रह्मा ऋषिः । गायत्री छन्दः । श्री कूष्माण्डो देवता । समस्तदिनरात्रिकृतपापनिवारणार्थे पाठे विनियोगः । ओं कूष्माण्डानि कूष्माणां शकुनीनामण्डस्थानाम् ।

ओं यद्देवा[1] देवहेळनं यद्वाचानृतमूदिम ।
आदित्यास्तस्मान्मुञ्चतर्तस्यर्तेन मामुत ॥ १ ॥
देवा[2] जीवनकाम्या यद्वाचानृतमूदिम ।
तस्मान्न इह मुञ्चत विश्वे देवाः सजोषसः[2] ॥ २ ॥
ऋतेन[3] द्यावापृथिवी ऋतेन त्वं सरस्वति ।
कृतान्नः पाह्येनसो यत् किंचानृतमूदिम[3] ॥ ३ ॥
इन्द्राग्नी[4] मित्रावरुणौ सोमो धाता बृहस्पतिः ।
ते नो मुञ्चन्त्वेनसो यत्किञ्चानृतमूदिम[4] ॥ ४ ॥
स[5] जातशंसादुत जामिशंसाज्ज्यायसः शंसादुत वा कनीयसः ।
अनाधृष्टं देवकृतं यदेनस्तस्मात्त्वमस्माज्जातवेदो मुमुग्धि[5] ॥ ५ ॥
यदन्तरिक्षं[6] पृथिवीमुत द्यां यत् पितरं मातरं वा जिहिंसिम ।

1 TA. 2. 3. 1 reads:—
यद्देवा देवहेळनं देवासश्चकृमा वयम् ।
आदित्यास्तस्मान्मा मुञ्चतर्तस्यर्तेन मामितः ॥
Cp. also AV. 6. 114. 1; VS. 20.14.

2 The same as TA. 2. 3. 2.

3 Cp. TA. 2. 3. 3.

4 TA. 2. 3. 4 reads. यदन्यकृतमारिम.

5 Cp. TA. 2. 3. 5

6 For variants cp. TA. 2. 6. 8. Cp. also KS. 9. 6; AV. 6. 120 1.

अग्निर्नस्तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृता ॥ ६ ॥
येन[1] त्रितो अर्णवान्निर्बभूव येन सूर्यस्तमसो निर्मुमोच ।
येनेन्द्रो विश्वा अजहादरातीस्तेनाहं ज्योतिषा ज्योतिरानशान आक्षि[1] ॥७॥
यत्कुसीदमप्रतीतं मयेह[2] येन यमस्य मिथुना चरामि ।
एतत्त अग्ने अनृणो भवामि जीवन्नेव प्रति तत्ते दधामि ॥ ८ ॥
यददीव्यन्नृणमहं[3] बभूवादित् सन्वा सञ्जगरञ्जनेभ्यः ।
अग्निर्मा तस्मादिन्द्रश्च संविदानौ प्रमुञ्चताम्[3] ॥ ९ ॥
यद्धस्ताभ्यांश्चकर[4] किल्बिषाण्यक्षाणां वग्नुमुपजिघ्रमानः[4] ।
उग्रंपश्या च राष्ट्रभृच्च तान्यप्सरस[5] अनुदत्तामृणानि[5] ॥ १० ॥
उग्रंपश्ये राष्ट्रभृत्[6] किल्बिषाणि यदक्षवृत्तमनुदत्तमेतत्[7] ।
नेन्न[8] ऋणादृणवाँ इच्छमानो यमस्य लोके अधिरज्जुरायत्[9] ॥ ११ ॥
अव ते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।
क्षयन्नस्मभ्यमसुर प्रचेतो[10] राजन्नेनांसि शिश्रथः कृतानि ॥ १२ ॥
उदुत्तमं[11] वरुण पाशमस्मदवाधमं वि मध्यमं श्रथय ।
अथा वयमादित्यव्रते तवानागसो अदितये स्याम ॥ १३ ॥
तत्त्वा[12] यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।

1 For variants cp. TA. 2. 3. 7; MS. 4. 14. 17: 245. 4-6.

2 So Km. Lp. मयीह. For variants cp. MS. 4. 14. 17: 245: 9-10; TA. 2. 3. 8.

3 Cp. TA. 2. 4. 2; AV. 6. 119. 1.

4 So Km. with which TA. 2. 4. 2 agrees. Lp. वघ्नुमुपजिघ्रमाणः. MS. 4. 14: 245. 11. वग्नुमवजिघ्रमाणः; AV. 6 118. 1 अक्षाणां गत्नुमुपलिप्समानाः

5 So Km and Lp. Ms. तान्यप्सरसामनुदत्तानृणानि; TA. 2. 4. 2 तान्यप्सरसावनुदत्तामृणानि; AV. तदद्याप्सरसावनुदत्ताम्‌णं न.

6 MS. 4. 14: 245. 13 उग्रं पश्येद्राष्ट्रभृत्.

7 So Km and Lp. with which MS. and TA. agree. AV. 6. 118. 2. दत्तं न एतत् .

8 AV. 6. 118. 2 ऋणान्नो नर्णमेर्त्समानो; MS नेन्म ऋणानृणवानीप्समानो; TA. नेन्न ऋणानृणव इत्समानो.

9 MS. यमस्य लोके निधिरजराय.

10 MS. 4. 14: 246. 8 प्रचेतो.

11 Cp. RV. 1. 24. 15; AV. 7. 83. 3; KS. 3. 8: 27. 3-4; MS. 4. 14: 246. 5-7.

12 RV. 1. 24. 11; VS. 18. 49; KS. 4. 16: 43. 19-20; MS. 4. 14: 246. 3-4.

अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ॥ १४ ॥
त्वन्नो[1] अग्ने वरुणस्य विद्वान् देवस्य हेळोऽव यासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ॥ १५ ॥
स[2] त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो[3] वरुणं रराणो वीहि मृळीकं सुहवो न एधि ॥ १६ ॥
संकसुको विकसुको निर्ऋथो[4] यश्च निस्वनः[5] ।
तेऽस्मद्यक्ष्ममनागसो[6] दूराद् दूरमचीचतम्[7] ॥ १७ ॥
निर्यक्ष्ममचीचतान्[8] कृत्यानि निर्ऋतिश्च[8] ।
तेनान्योऽस्मत् समृच्छतां[9] तमस्मै प्रसुवामसि ॥ १८ ॥
दुःशंसानुशंसाभ्यां घनेनानुघनेन[10] च ।
तेन योन्योऽस्मत्[11] समृच्छतां तमस्मै प्रसुवामसि ॥ १९ ॥
सं वर्चसा पयसा सन्तनूभिरगन्महि[12] मनसा सं शिवेन ।
त्वष्टा सुदत्रो[13] विदधातु रायो[14] नोऽनुमार्ष्टु[14] तन्वो यद्विलिष्टम्[15] ॥ २० ॥
आयुस्ते[16] विश्वतो दधदयमग्निर्वरेण्यः ।

1 Cp. RV. 4. 1. 4; VS. 21. 3; MS. 4. 14. 17; 246. 9-10; KS. 34. 19: 50. 1-2.

2 Cp. RV. 4. 1. 5; VS. 21. 4; MS. 4. 14: 246-11-12; KS. 34. 19; 50. 3-4.

3 So Lp. Km. णो

4 MS. 4. 14: 246. 13 निर्ऋतो.

5 So Lp. with which TA. 2. 4. 10 and MS. agree. Km. निस्वर with which AV. 12. 2. 14 agrees.

6 So Km and Lp with which MS. and TA. agree. AV. reads ते ते यक्ष्मं सवेदसो.

7 So Km with which MS and TA agree. Lp. अचीचतत् AV has दूराद्-दूरमनीनशन्.

8 So Lp. and Km. MS. 4. 14: 246. 15 has निर्यक्ष्ममचीचते कृत्यां निर्ऋतिं चकार while TA. 2. 4. 11 reads निर्यक्ष्म * * * कृत्यां निर्ऋतिं च.

9 MS and TA have तेन योऽस्मत् समृच्छातै.

10 So Km, Lp, MS. 4. 14: 247. 2. But cp. TA. 2. 4. 12 घणेनानुघणेन च.

11 So Km and Lp. We expect as in 19.

12 So Lp. Km. अगन्महे.

13 With this MS. 4. 14: 247. 5 agrees. But cf. TA. नो अत्र.

14 So Lp. Km. रायोन्नरोमार्ष्टु, MS राया-ऽनु नो मार्ष्टु; TA. रायाऽनुमार्ष्टु.

15 So Lp. Km and TA. MS. यद्विरिष्टिम्.

16 TA. 2. 5. 1; TS. 1. 3. 14. 4 आयुष्टे.

पुनस्ते प्राण आयातु[1] परा यक्ष्मं सुवामि[2] ते ॥ २१ ॥
इममग्न[3] आयुषे वर्चसे कृधि तिग्ममोजो वरुण सँ शिशाधि ।
मातेवास्मा अदिते शर्म यच्छ विश्वेदेवा जरदष्टिर्यथासत्[3] ॥ २२ ॥
अग्न[4] आयूँषि पवस आसुवोर्जमिषं च नः ।
आरे बाधस्व दुच्छुनाम्[4] ॥ २३ ॥
अग्निर्ऋषिः[5] पवमानः पाञ्चजन्यः पुरोहितः ।
तमीमहे महागयम्[6] ॥ २४ ॥
अग्ने[7] पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।
दधद्रयिं मयि पोषम्[7] ॥ २५ ॥
अग्ने[8] जातान् प्रणुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व ।
अधि नो ब्रूहि सुमना अहेडञ्शर्मन्ते स्याम त्रिवरूथ उद्भौ[8] ॥ २६ ॥
सहसा[8] जातान् प्रणुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व ।
अधि नो ब्रूहि सुमनस्यमानो वयं स्याम प्रणुदा नः सपत्नान् ॥ २७ ॥
अग्ने[9] यो नोऽभितो वृको जनो वारो जिघांसति ।
तं त्वं वृत्रहञ्जहि वस्वसम्भ्यमा कृधि ॥ २८ ॥
अग्ने[10] यो नोऽभिदासति समानो यश्च नेष्टः ।
तं वयं समिधं कृत्वा तुभ्यमग्ने पिदध्मसि[10] ॥ २९ ॥
यो नः शपादशपतो यश्च न शपतः शपात् ।

1 TS. 1. 3. 14. 4 and TA. 2. 5. 1. आयाति

2 So Lp. Km. स्वामि

3 Cp. KS. 11. 8: 153. 16-17; AV. 2. 28. 5; MS. 2. 3. 4: 31. 11-12; TA. 2. 5. 3.

4 Cp. KS. 4. 11: 36. 6-7; RV. 9. 66. 19; VS. 4. 38. TA. 2. 5. 4.

5 Cp. RV. 9. 66. 20; VS. 26. 9; TA. 2. 5. 6.

6 Cp. RV. 9. 66. 21; VS. 8. 38; KS. 7. 16; TA. 2. 5. 5.

7 The same as KS. 17. 6 : 249. 9-10. For variants cp. TA. 2. 5. 7; AV. 7. 34. 1; MS. 2. 8: 110. 3-4.

8 The same as KS. 17. 6; 249. 11-12; MS. 2. 8: 111. 5-6; TA. 2. 5. 8; for variants cp. AV. 7. 35. 1.

9 So Lp. Km. जय instead of जहि. For variations cp. TB. 2. 4. 1. 1; TA. 2. 5. 9

10 For variants cp. TB. 2. 4. 1. 2; TA. 2. 5. 10.

इध्मस्येव प्रख्यायतस्तस्य मोच्छेषि किं चन ॥ ३० ॥
सँशितं मे ब्रह्म सँशितं वीर्यं बलम् ।
सँशितं क्षत्रं मे जिष्णु यस्याहमस्मि पुरोहितः ॥ ३१ ॥
उदेषां बाहू अतिरमुद्वर्चो अथो बलम् ।
क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वाँ अहम् ॥ ३२ ॥
पुनर्मनः पुनरायुर्म आगात्पुनश्चित्तं पुनराधीतं म आगात् । Mp
पुनश्चक्षुः पुनः श्रोत्रं म आगात् ।
वैश्वानरो अदब्धस्तनूपा अव बाधतां दुरितानि विश्वा ॥ ३३ ॥
सौत्रामन्यानिचाङ्कुणस्य :—
यद्देवा देवहेळनं देवासश्चकृमा वयम् ।
अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वँहसः ॥ ३४ ॥
यदि दिवा यदि नक्तमेनाँसि चकृमा वयम् ।
वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वँहसः ॥ ३५ ॥
यदि जाग्रद्यदि स्वप्नँ एनाँसि चकृमा वयम् ।
सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वँहसः ॥ ३६ ॥
प्रायश्चित्तानि सर्वान्तीयानि शिशुशैशवयोः ॥
भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ ३७ ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ ३८ ॥
पृषदश्वा मरुतः पृश्निमातरश्शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवस्सूरचक्षसो विश्वे मा देवा अवसागमन्निह ॥ ३९ ॥
शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ ४० ॥
शेषः कोकिलस्य राजपुत्रस्य राज्येप्सोः ॥

1 Cf. RV. 1. 89. 1; MS. 4. 14 : 217. 11-12, For 33-41 cp. KS. 35. 1 : 50. 6-14.

पुनन्तु[1] मा पितरः सोम्यासः पुनन्तु मा पितामहाः ।
पुनन्तु प्रपितामहाः पवित्रेण शतायुषा ॥ ४१ ॥
पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः ।
पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥ ४२ ॥
अग्न आयूंषि पवस आसुवोर्जमिषञ्च नः ।
अरे बाधस्व दुच्छुनाम् ॥ ४३ ॥
पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ ४४ ॥
पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् ।
अग्ने क्रत्वा क्रतूँरनु ॥ ४५ ॥
यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ।
ब्रह्म तेन पुनातु मा ॥ ४६ ॥
पवमानः स्वर्जनः पवित्रेण विचर्षणिः ।
यः पोता स पुनातु मा ॥ ४७ ॥
उभाभ्यां देव सवितः पवित्रेण सवेन च ।
मां पुनीहि विश्वतः ॥ ४८ ॥
वैश्वदेवी पुनती देव्यागाद्यस्या इमास्तन्वो वीतपृष्ठाः ।
तया मदन्तः सधमादेषु वयं स्याम पतयो रयीणाम् ॥ ४९ ॥
ब्रह्म यच्चानिरुक्तम् ॥
ओं पुनर्मामैत्विन्द्रियं[2] पुनरायुः पुनर्भगः ।
पुनर्ब्राह्मणमैतु मा पुनर्द्रविणमैतु मा ॥ ५० ॥
यन्मेऽद्य रेतः पृथिवीमस्कान्[3]त्यदोषधीरप्यसरद्यदपः[4] ।
तदहं पुनरादधे[5] ॥ ५१ ॥

1 For 41-50 cp. KS. 38. 2. 102. 1-15. In 50 KS. has सधमाद्येषु, while Km. and Lp. read सधमादेषु
2 Cp. TA. 1. 30. 1; For variants cp. AV. 7. 67. 1.
3 So Km and Lp. TA. 2. 30. 2. has अस्कान्.
4 TA. यदापः
5 TA. °राददे. adding दीर्घायुत्वाय वर्चसे

यन्मे[1] रेतः प्रसिच्यते यन्म आ जायते पुनः ।
यद्वा मे प्रतितिष्ठति तेनमाममृतं कुरु तेन सुप्रजसं कुरु[1] ॥ ५२ ॥
अपां यो द्रवण इति प्रजापतेः ॥
रथे[2] अक्षेषु वृषभस्य वाजे वाते पर्जन्ये वरुणस्य शुष्मे ।
इन्द्रं या देवी सुभगा जजान सेयमागाद्वर्चसा संविदाना ॥ ५३ ॥
या हस्तिनि द्वीपिनि या हिरण्ये गोष्वश्वेषु[3] पुरुषेष्वन्तः ।
इन्द्रं या देवी सुभगा जजान सेयमागाद्वर्चसा संविदाना ॥ ५४ ॥
सिंहे व्याघ्र उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या ।
इन्द्रं या देवी सुभगा जजान सेयमागाद्वर्चसे संविदाना ॥ ५५ ॥
या राजन्ये[4] दुन्दुभा आयतायामश्वस्य क्रन्दे पुरुषस्य मायौ ।
इन्द्रं या देवी सुभगा जजान सेयमागाद्वर्चसा संविदाना ॥ ५६ ॥
हिरण्यवर्णा इति कश्यपस्य ॥
हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो[5] यास्विन्द्रः[5] ।
या अग्निं गर्भं दधिरे विरूपास्ता न आपः शं स्योना भवन्तु ॥ ५७ ॥
यासां देवा[6] दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति ।
या अग्निं गर्भं दधिरे विरूपास्ता न आपः शं स्योना भवन्तु ॥ ५८ ॥
यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् ।
या अग्निं गर्भं दधिरे विरूपास्ता न आपः शं स्योना भवन्तु ॥ ५९ ॥
ओं अग्नये नमः पश्चात् । वातरशनादौ पठेत् ।

ओं अग्नये नमः । वायवे स्वाहा । सूर्याय स्वाहा । ब्रह्मणे स्वाहा । प्रजापतये स्वाहा । कूष्मर्षिभ्यः स्वाहा । ओं अग्ने त्वं पारयेति स्विष्टकृतम् । वैश्वानरीयेन सूक्तेन प्राङ्मुखः प्राञ्जलिरुपतिष्ठते जपेत्सूक्तानि पराक्षि वैश्वानरीयं च । अस्य

1 TA. 1. 30. 3:--
यन्मे रेतः प्रसिच्यते यन्म आजायते पुनः ।
तेन माममृतं कुरु तेन सुप्रजसं कुरु ॥

2 For 54-57 cp. KS. 36. 15: 82. 6-13; AV. 6. 38. 3 has ऋषभस्य.

3 Eor variants cp. AV. 6. 38. 2.

4 Cf. TB. 2. 7. 7. 1.

5 AV. 1. 33. 1 has यासु जातः सविता यास्वग्निः. Cp. also MS. 1. 2. 9: 12-13. Cp. AV. 1. 33. 3.

6 Cp. RV. 7. 49. 3; AV. 1. 33. 2.

सूक्तस्य द्वादशर्चस्य ब्रह्मा ऋषिः वैश्वानराद्या लिङ्गोक्तदेवताः । आद्ये त्रिष्टुभौ तृतीयाचतुर्थ्यौ अनुष्टुभौ । ततस्तिस्रस्त्रिष्टुभः । अष्टमी पंक्तिः । ततो द्वे त्रिष्टुभौ । उपस्थाने विनियोगः ।

ओं वैश्वानराय[1] प्रतिवेदयामो यदीमृणँ सङ्गरो देवतासु ।
स एतान् पाशान् प्रमुञ्चन् प्रवेद स नो मुञ्चतु दुरितादवद्यात् ॥ १ ॥
वैश्वानरः[2] पावया नः पवित्रैर्यत्सङ्गरमभिधावाम्याशयाम् ।
अनाजानन् मनसा याचमानो यदत्रैनो अप तत् सुवामि[2] ॥ २ ॥
अमू[3] ये सुभगे दिवि विम्रृतौ नाम तारके ।
प्रेहामृतस्य यच्छतमेतद्बद्धकमोचनम् ॥ ३ ॥
वि जिहीष्व लोकान्[4] कृधि बन्धान् मुञ्चासि बद्धकम् ।
योनेरेव प्रच्युतो गर्भः सर्वान् पथो अनु ष्यात्[4] ॥ ४ ॥
स प्रजानन्[5] प्रतिगृह्णाति विद्वान् प्रजापतिः प्रथमजा ऋतस्य ।
अस्माभिर्दत्तं जरसः पुरस्तादच्छिन्नं तन्तुमनु सन्तरेम[5] ॥ ५ ॥
ततं[6] तन्तुमन्वेके सन्तरन्ति येषां दत्तं पित्र्यमायतनवत् ।
अबन्ध्वेके ददतः प्रयच्छन्दातुं चेच्छक्नुवान् स स्वर्ग एषाम्[6] ॥ ६ ॥

1 AV. 6. 119. 2 reads :—
वैश्वानराय प्रति वेदयामि यद्यृणं संगरो देवतासु ।
स एतान् पाशान् विचृतं वेद सर्वानथ पक्वेन सह सं भवेम ॥
TA. 2. 6. 1. has प्रमुचन् and मुञ्चातु । the rest as in Km and Lp.

2 So Km. and Lp. AV. 6. 119. 3. reads :—
वैश्वानरः पविता मा पुनातु यत्संगरमभिधावाम्याशाम् ।
अनाजानन्मनसा याचमानो यत्तत्रैनो अप तत् सुवामि ॥
TA.2.6.2 agrees with ours, except in पवयान्नः, आश्याम् and अव.

3 TA. agrees with it except अमी, विचृतौ, and यच्छताम्. AV. 3. 7. 4 reads :—
अमू ये दिवि सुभगे विचृतौ नाम तारके ।
वि क्षेत्रियस्य मुञ्चतामधमं पाशमुत्तमम् ॥

4 TA. 2. 6. 4 the same except विजिहीर्ष्व, and अनु ष्व. AV. 6. 121. 4 reads :—
वि जिहीष्व लोकं कृणु बन्धान् मुञ्चासि बद्धकम् ।
योन्या इव प्रच्युतो गर्भः पथः सर्वाँ अनु क्षिय ॥

5 TA. 2. 8. 5 agrees with it except प्रतिगृभ्णीत, परस्तात्, and अनुसंचरेम.

6 TA. 2. 6. 6 differs in संचरन्ति, आयनवत्, प्रयच्छात् and शक्नवान्.
AV. 6. 122. 2 reads :—

आ रभेथामनु[1] सँरभेथां समानं पन्थामवतो घृतेन ।
यद्वां पूर्तं परिविष्टं यदग्नौ तस्य गुप्त्या इह जायापती सं रभेथाम् ॥ ७ ॥
यदन्तरिक्षं[2] पृथिवीमुत द्यां यत्पितरं मातरं वा जिहिंसिम ।
अग्निर्नस्तस्मादेनसो औपासन उन्नो नेशद् दुरिता यानि चकृम[2] ॥ ८ ॥
भूमिर्मातादितिर्नो जनित्रं त्रातान्तरिक्षमभिशस्त्या[3] नः ।
द्यौर्नः पिता पित्र्याच्छं भवामि जामि मृत्वा माव पत्सि लोकान् ॥ ९ ॥
यत्रा[4] सुहार्दः सुकृतो मदन्ति[5] विहाय रोगं तन्वं[6] स्वाम्[6] ।
अश्रोणा[7] अङ्गैरह्रुताः[8] स्वर्गे लोके तत्र पश्येम पितरं[9] च पुत्रम् ॥ १० ॥
यँदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत वा करिष्यन्[11] ।
यद्देवानां चक्षुष्यागो अस्ति यदेव किं च प्रतिजग्रहाहमग्निर्मा
तस्मादनृणं करोतु ॥ ११ ॥
यदन्नमग्नि बहुधा विरूपं वासो हिरण्यमुत गामजाविम्[12] ।
यद्देवानां चक्षुष्यागो अस्ति यदेव किं च प्रतिजग्रहाहमग्निर्मा
तस्मादनृणं करोतु ॥ १२ ॥

॥ इति कूष्माण्डमन्त्राः ॥

ततं तन्तुमन्वेके तरन्ति येषां दत्तं पित्र्यमायनेन ।
अबन्ध्वेके ददतः प्रयच्छन्तो दातुं चेच्छिक्षान्त्स स्वर्ग एव ॥

1 TA. 2. 6. 7 differs in तस्मै गोत्रायेह. AV. 6. 122. 3 reads :—
आ वारभेथामनुसंरभेथामेतं लोकं श्रद्दधानाः सचन्ते ।
यद्वां पक्वं परिविष्टमग्नौ तस्य गुप्तये दम्पती सं श्रयेथाम् ॥

2 The same in TA. 2. 6. 8 except अग्निर्मा, गार्हपत्य. AV. 6. 120. 1 reads:— अयं तस्माद्गार्हपत्यो नो अग्निरुदिन्नयाति-सुकृतस्य लोकम् ॥

3 So Km. and Lp. AV. 6. 120. 2 has भ्राता, भवाति and लोकात्, while TA. 2. 6. 9 has भ्राता, अभिशस्त एनः, पितुयाच्छं, भवासि, मित्वा (So Poona ed. may be मृत्वा) मा विविरिस लोकात्.

4 TA. 2. 6. 2 यत्र

5 TA. 2. 6. 2 मदन्ते

6 AV. 3. 28. 5 तन्वः स्वायाः

7 AV. 6. 120. 3 अश्लोणाः

8 TA. 2. 6. 2 अश्लोणाङ्गैरह्रुता

9 So. TA. 2. 6. 2; AV. 6. 120. 3 पितरौ च पुत्रान्

10 Cp. AV. 6. 71. 3; TA. 2. 6. 2.

11 AV. 6. 71. 3 संगृणामि

12 TA. 2. 6. 2 अजाम् अविम्

शिवसूक्तम्[1]

ओं[2] येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥ १ ॥
येन[3] कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥ २ ॥
यत्प्रज्ञान[4]मुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३ ॥
यज्जाग्रतो[5] दूरमुदेति[6] दैवं तदु सुप्तस्य तथैवेति ।
दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥ ४ ॥
यस्मिन्नृचः[7] साम यजूंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥ ५ ॥
सुषारथिरश्वानिव[8] यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजरं[9] यविष्ठं[10] तन्मे मनः शिवसङ्कल्पमस्तु ॥ ६ ॥
यदत्र षष्ठं[11] त्रिशतिं शरीरं यज्ञस्य गुह्यन्नव[12] नार्धमाद्यम् ।
दशं[13] पंचत्रिंशतं[13] यत्परं च तन्मे मनः शिवसङ्कल्पमस्तु ॥ ७ ॥

1 Cp. Lp. 117-118.
2 Cp. VS. 34. 4.
3 Cp. VS. 34. 2.
4 Cp. VS. 34. 3.
5 Cp. VS. 34. 1.
6 VS. 34. 1 उदैति
7 VS. 34. 5.
8 VS. 34. 6.
9 VS. 34. 6 अजिरं
10 VS. 34. 6 जविष्ठं
11 So. Lp.
12 So. Lp. अवमार्ध ?
13 So. Lp.

ये पंच पंचादशतं[1] शतं च सहस्रं च नियुतं न्यर्बुदं च ।
ते यज्ञं च तिष्ठ[2] गातुं[2] शरीरं तन्मे मनः शिवसङ्कल्पमस्तु ॥ ८ ॥
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः पुरस्तात् ।
तस्य योनिं परि पश्यन्ति धीरास्तन्मे मनः शिवसङ्कल्पमस्तु ॥ ९ ॥
येन कर्माणि प्रचरन्ति धीरा विप्रा वाचा मनसा कर्मणा वा ।
ये संमिद्[3]मनुसंयन्ति[3] प्राणिनस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ १० ॥
येन मनुहृदयं ये च देवा य्य[4] अन्तरे बहुधा चरन्ति ।
यो अश्रुतं चक्षपी[5] संचरन्ति तन्मे मनः शिवसङ्कल्पमस्तु ॥ ११ ॥
येन द्यौरुग्रा पृथिवी चान्तरिक्षं य्ये पर्वताः प्रदिशो दिशश्च ।
येनेदं जगद्व्याप्तं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥ १२ ॥
येनेदं सर्वं जगतो बभूव ये देवा अपि महतो जातवेदाः ।
तदेवाग्निं तपसो ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १३ ॥

इति शिवसूक्तम् ॥

---

1 So. Lp.
2 So. Lp.
3 So. Lp. ये संविदमनु ?
4 So. Lp. for य
5 So. Lp. चक्षुपी ?

मन्त्राः

ओं जातवेदसे[1] गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्रविष्णोरनु सञ्चरेम ।
नाकस्य पृष्ठमवसे वसानो वैष्णवीं लोक इह मादयन्ताम्[2] ॥
तामग्निवर्णां[12] तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीं शरणमहं प्रपद्ये सुतसे तरसे नमः[2] ॥
पृतनाजितं[3] सहमान उग्रमग्निं हुवेम परमात्सधस्थात् ।
स नः पर्षदति दुर्गानि विश्वा क्षामाद्देवो अति दुरितात्यग्निः[3] ॥
मयोभूर्वातो अभिवातूस्रा ऊर्जस्वतीरोषधीरालिशन्ताम् ।
पीवस्वतीर्जीवधन्याः पिबन्त्यवसाय पद्वते रुद्र नो मृळ[4] ॥
उरूणसावसुतृपा[5] उदुम्बरौ यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रम्[5] ॥
बर्हिषदः[6] पितर ऊत्यर्वागिमा वो हव्यं चकृमा जुषध्वम् ।
त आगतावसा शन्तमेनाथा नः शंयोररपो दधातन[6] ॥

1 Lp. p. 63. For variations Cp. TA. 10. 2. 1.

2 Lp. p. 63. Cp. Rvkh. which reads सुतरसि तरसे; TA. सुतरसिद्ध तरसे. Cp. also Mahān U. 6. 3.

3 Lp. p. 63. Cp. for variations AV. 7. 63. 1; TA. 10. 2. 1; Mahān U. 6. 6.

4 Lp. p. 67. RV. 10. 169. 1 has °रारिशन्ताम्; KSA. 4. 6. reads °राविशन्ताम्.

5 Lp. p. 120. RV. 10. 14. उदुम्बलौ.

6 Lp. p. 127. RV. 10. 15. दधात. KS. 21. 14 : 55. 12.

BRĀHMANA QUOTATIONS IN DEVA-PĀLA

पृथिव्यादि लोकदेवता वीर्यभूताः इति ब्राह्मणात् Vol. I. पृ० १७

तथा च ब्राह्मणम्--आपश्च पृथिवी चान्नम् इति पृ० ३२

एतन्मयानि ह्यन्नानि भवन्ति इति च पृ० ३२

ब्राह्मणमपि--यो ब्रह्माणं[2] विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।

तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

एतस्माज्जायते[3] प्राणः मनः सर्वेन्द्रियाणि च ।

खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी पृ० ४६

तथा च ब्राह्मणम्--वरं वा एतत्सदनं यस्मिन्नेष आसन्नस्तपति इति पृ० ५६

तथा च ब्राह्मणं श्रुतिश्च—बैल्वो[4] वा खादिरो वा पालाशो वा

रौहीतको वा सौम्यस्याध्वरस्य यूपः स्यात् ।

औदुम्बरो यूपो भवति । खादिरे बध्नाति पालाशे

बध्नाति रौहीतके बध्नाति[4] । पृ० ९२

श्रूयते हि परिधिब्राह्मणम्—तस्येन्द्रः परिधीन्यज्ञियेभ्यो वृक्षेभ्य

आ जहार पृ० ९३

तस्येन्द्रो यज्ञियेभ्यो वृक्षेभ्यः परिधीनाजहार पृ० ९३

1 Commentator on Laugākṣi-Gṛhya-sūtra (edited by Madhusūdana Kaul, Jammu in two Volumes) or Kāthaka-Gṛhyasūtra edited by Caland.

2 Cp. Śvetāśva. 6. 18.

3 Cp Muṇḍaka 2. 1. 3.

4 On KGS. 4. 18 Deva-pāla has—बध्नातीति श्रुतेः । यज्ञिया वा सर्वे परिधिवृक्षाः । श्रूयते हि तस्येन्द्रो यज्ञियेभ्यो वृक्षेभ्यः परिधीनाजहारेति ।

5 Cp. DP on KGS. 4. 18.

तथा च ब्राह्मणम्—वसूनां वा एतद्भागधेयम् इति पृ० १४७
तथा च ब्राह्मणम्—अन्तरिक्षं वै मातरिश्वनो घर्म इति पृ० १४९
तथा च ब्राह्मणम्—इयं वै पूषा प्रपथेऽन्तरिक्षं पशुपा
द्यौरधिपतिः इति पृ० २००
तथा च ब्राह्मणम्—को नामासीति प्रजापतिर्वै को नामेति Vol. II पृ० २०

तथा च ब्राह्मणमग्न्यादिपुत्रत्वमृग्वेदादीनां दर्शयतिः—
प्रजापतिर्वा एक आसीत्स तपोऽतप्यत ततस्तपस्तेपानेन त्रयो देवा असृजन्त अग्निर्वायुरादित्यस्ते तपोऽतप्यन्त तेभ्यस्तपस्तेपानेभ्यस्त्रयो वेदा असृजन्ताग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात् सामवेद इति पृ० २४
ब्राह्मणमपि—देवा वै ब्रह्मन्समवदन्त ततस्तद्ब्रह्मपर्ण उपाशृणोत् सुश्रवा वै नाम एष इति पृ० ३२
ते पाश्वहोत्रा वरुणबृहस्पतयो न्यषीदन्निन्द्रं जनयाम इति ह्यस्य ब्राह्मणम् पृ० ४९
ते साप्तहोत्रा अर्यमगृहपतयो न्यषीदन्त्संतरामि इति ह्यस्य ब्राह्मणम् पृ० ५०
तथा च ब्राह्मणम्—यासौ धुरं गायत इति पृ० १९३

Śruti quotations in Deva-pāla :—

तथा च श्रुतिः—स एष वै सविता य एष तपति Vol. I पृ० २७
तथा च श्रुतिः—ततः प्रजनं देवा उपजीवन्ति पृ० ४०
तथा च श्रुतिः—ये वै तमादित्यं पुरुषं वेदयन्ते स इन्द्रः स प्रजापतिः स ब्रह्मा इति पृ० ५४
तथा च श्रुतिः—इन्द्रो वै प्रजापतौ ब्रह्मचर्यमुवास स वा अनुत्सृष्टो वीर्यं हित्वोपावर्तत इति । आचार्यो ब्रह्मचारिणः प्रजापतिः इति च पृ० ७९

तथा च श्रुतिः—तस्माच्छोभनं वासो भर्तव्यम् इति पृ० ८३

तथा च श्रुतिः—ऋत्विजो यजमानाश्च सुरभिमतीमृचमन्वाहुर्वाचमेव पुनते पृ० १३७

यज्ञो वै विष्णुरिति श्रुतिः पृ० १५१

तस्माद्ब्राह्मणः उभे वाचौ वदति दैवीं च मानुषीं च इति श्रुतेः पृ० २३३

तथा च श्रुतिः—तस्माद्ब्राह्मणो द्विनामा इति पृ० ३३२

तथा च श्रुतिः—अग्नेर्यद्रेतः सिच्यते तद्धिरण्यमभवत् पृ० ३३८

सोमो वा ओषधीनां राजा इति श्रुतेः पृ० ३५३, ३५७

यदि राजन्यं वैश्यं वा याजयेन्न्यग्रोधततीराहृत्य ताः संपिष्य दध्न्युत्सृज्य तदस्मै भक्षं प्रयच्छेन्न सोमम् इति श्रुतेः Vol II. पृ० ७

तथा च श्रुतिः—

हिरण्यगर्भः[1] पुरुषो महांस्त्वं प्राणो जगत्सूत्रमनादिरिन्द्रः ।
बोधः शुचिर्धर्मतरान्तरात्मा[2] तथा विधाता जगतोऽस्य देव ॥ पृ० २३

यज्ञो वै प्रजापतिरिति, विष्णुर्यज्ञ इत्यादिरपि श्रुतिः पृ० ४४

प्रस्तरे जुहूं साधयति सर्वाश्च स्रुचः इति श्रुतेः पृ० ४५

तथा च श्रुतिः—ते चातुर्होत्राः सोमं गृहपतये न्यषीदन्निन्द्रं जनयाम इति पृ० ४८

तथा च श्रुतिः—अग्निर्वै देवानां होता इति पृ० ४९

तस्य सूर्याचन्द्रमस्तवेव चक्षुषी इति श्रुतेः पृ० ५९

तथा च श्रुतिः—प्राणो वै मित्रोऽपानो वरुण इति पृ० ९३

सोमो वा ओषधीनां राजा इति श्रुतेः पृ० १२१

तथा च श्रुतिः—तस्य यावन्मुखमासीत्तावतीं मृदमुदहरत् सोऽयमभवत् इति पृ० १४१

याज्या अपि वषट्करोतीति श्रुतेः पृ० १८०

1 Calland on KGS. 41. 16 हरणगर्भः may, accordingly, be corrected. 2 Caland धर्मतदन्तरात्मा

गृहमेधो वै पाकयज्ञो न प्रयाजानुयाजा इज्यन्ते
नानुयाजसामिधेनीरन्वाह इति श्रुतिः पृ० १८२

तावेव वर्षतः इति श्रुतिः। अग्नीषोमाविदं सर्वं यदन्नं
चान्नादश्च सोमोऽन्नमग्निरन्नादः इति पृ० १८६

होता अग्निर्वै देवानाम् इति श्रुतेः पृ० १९३

वत्सः प्रथमजो दक्षिणा इति श्रुतिः पृ० २६३

पशवो वै रेवती इति श्रुतेः पृ० २९२

ते पुनः श्रुत्या प्रतिपादिताः—

एते देवा अदुहुर्हारीतेन पात्रेणामृतं राजतेन पितरोऽदुहुः स्वधां दारुपात्रेण आहूय तं मनुष्या अदुहुरन्नमयस्मयेनासुरा अदुहुर्यवान् अलाबुपात्रेण सर्पा अदुहुर्विषमिति पृ० ३२२

तथा च श्रुतिः—वसवः पितरो रुद्राः पितामहा आदित्याः प्रपितामहाः इति पृ० ३४१

श्रुतिरपि बीजप्राधान्यमाह—

अप्रमत्ता रक्षत तन्तुमेनं मा वा परे क्षेत्रे बीजमवाप्सुः।
जनयितुः पुत्रो भवति संप्रदाये मोघं लभते क्षेत्रे तन्तुमेतम् ॥

अरिक्ते दूर्वालतावनस्पतिप्रभृतौ शीतप्रदेशे समाश्लेषयते केशान्मित्रमिति पृ० ३४७

श्रुत्या प्रतिपादितं श्रुतिमूलमेतत्कर्म पृ० ३६३

Other quotations in Deva-Pala :—

तत एव परमेष्ठी प्राजापत्यो यज्ञमपश्यद्दार्शपौर्णमासौ

Vol. I. पृ० १५

तथा च श्रूयते :—

रुद्रं वै देवा यज्ञान्निरभजन्। स देवानायतमा आयामवत्या सेनयाभिपर्यावर्तत। एते देवा भीता एतच्छतरुद्रियमपश्यंस्तेनैनमशमयन्यच्छ-

तद्रुद्रियं जुहोति तेनैतं रुद्रं विततधन्वानं संहृतेषु मन्युमन्तं महाबाहुं शमयति पृ० ११५

वाग्वा अनुष्टुप् वाक् सरस्वती पृ० २५७

तथा च पठन्ति—अमेध्यमेतच्छिरो यदशिखम् पृ० ३५६

श्रूयते हि—इमे वै लोका भुवनं तेषामेषोऽधिपतिर्यो रुद्र इति

Vol. II. पृ० ५६

यज्ञो वै प्रजापतिः इति पृ० २०४

श्रूयते हि—असावादित्योऽवाग्रश्मिः पर्यावर्ततेऽथ वर्षति इति

पृ० २१९

रोहितरूपाः पशवो भूयिष्ठाः इति श्रुतत्वात् पृ० २९७

तद्यागेन हि पितृतृप्तिः श्रूयते :—

तत्सोमं पितृमन्तं यजन्ति सोमपास्तत् पितॄन्यजन्ति द्वे वा अग्नेस्तन्वा हव्यवाहन्या देवेभ्यो हव्यं वहति कव्यवाहन्या पितृभ्य इति पृ० ३४८

यद्यपि च—दूष्यते वा ऋचोऽक्षरं यदेतदूहितं तस्मादृक्षु नोहेत् ब्राह्मणवदूहेद् विकृती यथार्थं यजूंषि इति पृ० ३७४

उक्तं हि—वसवः पितरो भूम्यधिपतयो रुद्राः पितामहा अन्तरिक्षाधिपतय आदित्याः प्रपितामहास्तृतीयलोकाधिपतयः इति पृ० ३८६

तथा च श्रूयते—यं द्विष्यात्तस्य संचरे पशूनां न्यसेत् इति पृ० ४२४

अथैषां गौरेतेनाभिचरन्यजेत इति पृ० ४२४

Quotations in Āditya-darśana on KGS :—

पूयति वा एतदृचोऽक्षरं यदेनमूहति तस्मादृचं नोहेत् १९.६

स चायमागमः श्रोत्रियायागताय महोक्षं वा महाजं वा पचेदिति

२४.२०

भस्मवारणी संस्पृश्य मन्युरिति वचनात्। भस्मनाशेऽग्निनाशो भवतीति श्रुतेश्च। २५.८

यतो मेखलामधिकृत्य श्रुतिः—त्रिवृद्भवति त्रिवृता वै स्तोमेनेति···
तथा न वाभिमभिचरणीयां कुर्यात् त्रिवृद्वज्र इति ४१.१२
यमेवं विद्वानुपनयते सोऽवश्यं वेदाध्यायी भवतीति श्रुतेः ४१.२४

Brāhmaṇa bala on KGS :—

वरे गां तु विजानीयाच्चतुर्वर्षमिति श्रुतिः २५.४०
तस्माद् ब्राह्मणो द्विनामार्धुक इति श्रुतिः ३६.४

Devapāla on KGS :—

नावभिघृतं हविरस्तीति श्रुतेः[1] ५४.१

---

1. Cp. KS. 36. 14 : 80. 19 न हि हविरनभिघृतम् ।

काठकश्रौतसूत्रसङ्कलनम्

॥ काठकश्रौतसूत्रसङ्कलनम् ॥

[काठकश्रौतसूत्रे चतुर्थः पटलः*]

श्रीगणेशाय नमः । दिवः श्येनीभिरन्वहं । स्वर्गकामो यजेत । दिवः श्येनयो[1] नाम सप्तेष्टयः । ताभिः शुक्लपक्षप्रतिपद्यारभ्य सप्ताहम् यजेत । अन्वहमेकैकया त्रिहविष्कया । अग्नये[2] कामायाष्टाकपालं आशायै चरुम् । अनुमत्यै चरुमिति प्रथमा । सर्वास्वाद्योत्तमे तुल्ये हविषी । मध्ये विशेषः । कामाय[3] ब्रह्मणे[4] यज्ञाय[5] अद्भ्यः[6] अग्नये बलिमते[7] अनुवित्त्यै[8] एता द्वितीयादिष्विष्टिषु यथाक्रमं द्वितीयाः प्रदिष्टाः । प्रतीष्ट्युपहोमा आम्नाताः सोऽत्र जुहोतीति । तस्य कर्म । शुक्लपक्षे प्रथमायामामावास्येनेष्ट्वा दिवः श्येनीभिर्यक्ष्ये

* On the top is given शुक्लपक्षस्य पृथक्कृत्यानुवादोऽयं यं कामयेत पापीयान्त्स्यादिति तमपरपक्षे याजयेत् पापीयानेव भवति । यं कामयेत वसीयान्त्स्यादिति तं पूर्वपक्षे याजयेत् । वसीयानेव भवति इत्यादि श्रुत्या सर्वशुक्लपक्षस्य काम्यकर्मकालत्वेनोपदिष्टत्वाच्छुक्लपक्षः सर्वोऽपि काम्येष्टीनां कालः ।

1 For this term cf. Sāyaṇa on TB. 3. 12. 3. 2–8. "या इष्टयः पूर्वमभिहिताः ता एताः सप्तसंख्याकाः स्वर्गलोकस्य द्वार इव प्राप्तिसाधनभूताः । तासां च दिवः श्येनय इत्येतन्नामधन्याः । लोके श्येन उत्प्लुत्याकाशे स्वेच्छया सञ्चरति एवमेता अपि यजमानस्य द्युलोके स्वेच्छया सञ्चारं प्राप्नुवन्ति । तस्माद् द्युसंपादात् श्येनाख्यपक्षिसदृशत्वाच्च दिवःश्येनयः संपन्नाः ।"

2 For variations cf. TB. 3. 12. 2. 2–8

3 Cf. स एतमग्नये कामाय पुरोडाशमष्टाकपालं निरवपत् etc. TB. 3 12. 2. 4

4 Cf. अग्नये कामाय स्वाहा ब्रह्मणे स्वाहा etc. TB. 3. 12. 2. 5.

5 Cf. अग्नये कामाय स्वाहा यज्ञाय स्वाहा etc. TB. 3. 12. 2. 6

6 Cf. अग्नये स्वाहा अद्भ्यः स्वाहा etc. TB. 3. 12. 2. 7

7 Cf. अग्नये कामाय स्वाहाग्नये बलिमते स्वाहा TB. 3. 12. 2. 8

8 Cf. अग्नये कामाय स्वाहानुवित्त्यै स्वाहा TB. 3. 12. 2. 9.

स्वर्गं लोकमवाप्नवानीति संकल्पः। दैवः श्येन ऽहविः। सर्वं पौर्णमासवत्। अग्नये काय[1] जुष्टं निर्वपामि[1]। आशायै जुष्टमनुमत्यै जुष्टम्। अग्ने[2] काम हव्यं रक्षस्वाशे हव्यं रक्षस्वानुमते हव्य ऽ रक्षस्वा[3] निर्वापवत्। प्रोक्षणम्। प्रोक्षामीति विशेषः। उत्करे त्रिर्निनीय यथाभागं व्यावर्तध्वम्। इदमग्नेः कामस्येति पेषणार्थान् इदमाशाया अनुमत्या इति चर्वर्थान्। अग्नये कामाय जुष्टमधिवपामि। कपालान्युपधाय चरुद्वयम्। अग्नये कामाय जुष्टं संवपामि। पुरोडाशमधिश्रित्य चरुद्वयं घर्मोऽसीति। आज्यलेपादि पुरोडाशेन प्रचर्य। आशाया अनुब्रू३हि। आशां यज। आशाया अहमन्नादः एवमनुमतेः। तुभ्यं ता अश्याम तमिति कामस्य। आशानां[4] त्वा विश्वा आशां[5] इत्याशायाः। अनु नो द्यानुमतिरन्विदनुमते[6] त्वमित्यनुमतेः। नारिष्ठान् हुत्वा। अग्नये कामाय स्वाहा। आशायै स्वाहा। अनुमत्यै स्वाहा। प्रजापतये स्वाहा। स्वर्गाय लोकाय स्वाहा। अग्नये स्विष्टकृते स्वाहेति हुत्वा स्विष्टकृतं यजति। हव्यवाहं स्विष्टमिति स्विष्टकृतः। अत्रेष्टौ दक्षिणाकाले पष्ठौहीवरां[7] कंसपात्रं रूपान्तरणं कांचीनूपुरादि[8] एतान्यन्तर्वेदि स्थापयित्वा नपुंसकबहुवचनेनोहः। ब्रह्माणि ब्रह्माणि स्थ ब्रह्मणे वो मामाहि[9] ऽसिष्टाहुतानि मह्य ऽ शिवानि भवत। सहस्रधाराण्युत्सान्यक्षीयमाणानि। तानि दध्मः पृथिवीमन्तरिक्षं दिवं च तैः पष्ठौहीकंसनूपुरादिभिरतितराणि मृत्युम्[10] ॥१॥

1 So Ms. May be कामाय, निर्वपामि

2 For अग्ने हव्यं रक्षस्व cf. KS. 1. 4: 31. 3; VS. 1. 11; TS. 1. 1. 4, 2: 8. 1; TB. 3. 2. 4. 7.

3 So Ms. May be रक्षस्व

4 Cf. TB. 3. 7. 8. 3, 12. 1. 1; ApŚS. 9. 18. 8. Cf. also TB. 2. 5. 3. 3.

5 अनु—नमति cf. VS. 34. 9; TS. 3. 3. 11. 3; TB. 3. 1. 3. 3; TA. 4. 11. 2; ApŚS. 15. 13. 5.

6 अन्विदनुमते त्वम् cf. AV. 7. 20. 2; VS. 34. 8; TS. 3. 3. 11. 3; MS. 3. 16. 4: 189. 10; KS. 13. 16; 22. 15; TB. 3. 1. 3. 3; TA. 4. 11. 2; AŚS. 4. 12. 2; ŚŚS. 9. 27. 2. ApŚS. 15. 13. 6; MS. 4. 4. 12.

7 For पष्ठौही cf. Sāyaṇa on TB. 3. 12. 2. 10, "चतुःसंवत्सरवयस्का गौः पष्ठौही तासां मध्ये या श्रेष्ठा ताम्"

8 Cf. TB. 3. 12. 2. 10. पष्ठौहीवरां दद्यात्। कंसम्। स्त्रियै चाभारं समृद्ध्यै ॥

9 MS. सिसिष्टा

10 मन्त्र not traced.

ब्राह्मणा इमानि वः पष्ठौहीकंसनूपुरादीनि। ब्राह्मणतर्पणान्तम्। सप्तेष्टयो नानाहवनीयाः कालभेदात्। केचिदेकाहवनीया इति एकं कर्मेष्टयनमिति। नानाहवनीयपक्षे अन्वहं संकल्पादि अन्यपक्षे आदावेव संकल्पः। नानाहवनीयपक्षे इष्टया यक्ष्ये इति प्रथमवर्जानाम्। दैवः श्यैनꣳ हविः। एकाहवनीयपक्षेऽपि तथैव। श्वोभूते संकल्पादि पूर्ववत्। तत्र विशेषः। प्रथमतृतीयौ पूर्ववत्। द्वितीयं कामाय चरुं निर्वापादि द्वितीयवर्जं पूर्ववद्याज्यानुवाक्याश्च। कामो भूतस्य कामस्तदग्र इति कामस्य। नारिष्ठान् हुत्वानुपहोमाः[1] पूर्ववत्। कामाय स्वाहेति द्वितीय इति विशेषः। स्विष्टकृदादि पूर्ववत्। ब्राह्मणतर्पणान्तम्। श्वोभूते सर्वं पूर्ववत्। द्वितीयस्तु ब्रह्मणे चरुमिति विशेषः। ब्रह्म जज्ञानं[2] पिता विराजाम्[3] इति द्वितीयस्य याज्यानुवाक्ये। उपहोमे ब्रह्मणे स्वाहेति द्वितीयाहुतिः। पूर्ववद्दक्षिणा। श्वोभूते संकल्पादि पूर्ववत्। द्वितीयं यज्ञाय चरुम्। एतावान् विशेषः। यज्ञो[4] रायो[4] ऽयं यज्ञः[5] इति यज्ञस्य। यज्ञाय स्वाहेति द्वितीयाहुतिः। श्वोभूते पूर्ववत् सर्वम्। द्वितीयमद्भ्यश्चरुम्। आपो भद्रा[6] आदित्पश्यामि[7] इत्यद्भ्यः। अद्भ्यः स्वाहेति द्वितीयः। श्वोभूते पूर्ववत् संकल्पादि। द्वितीयमग्नये बलिमते चरुम्। तुभ्यं[8] भरंति[8] यो[9] देह्यः[9] इत्यग्नेर्बलिमतः। अग्नये बलिमते स्वाहेति द्वितीयः। श्वोभूते सप्तम्यां पूर्ववत्। अनुवित्त्यै चरुमिति विशेषः। पूर्वे[4] देवा अपरेण प्राणापानावित्यनुवित्त्याः[10]। अनुवित्त्यै स्वाहेति द्वितीयः। पूर्ववद्दक्षिणा। ब्राह्मणतर्पणान्तम्। आप ऐन्द्रा-

1 So Ms. May be हुत्वोपहोमाः

2 Cf. AV. 4. 1. 1. VS. 13. 3, KS. 16. 15, 29. 5. 38. 14, TS. 4. 2. 8. 2, MS. 2. 7. 15 : 96. 11, TB. 2. 8. 8. 8, with Sāyaṇa on it.

3 Cf. TB. 3. 12. 1. 1.

4 यज्ञो रायो यज्ञ ईशे वसूनाम् TB. 2. 5. 5. 1; 3. 12. 1. 1.

5 अयं यज्ञो वर्धतां गोभिरश्वैः KS. 35. 3; TB. 2. 5. 5. 1; ĀpŚS 9. 17. 1. Cp. also KS. 35. 4; TB. 3. 12. 1. 1

6 Cf. AV. 3. 13. 5; TS. 5. 6. 1. 3; TB. 2. 8. 9. 3; 3. 2. 1. 1. ĀpŚS. 14. 18. 1

7 Cf. आदित् पश्याम्युत वा शृणोमि AV. 3. 13. 6; TS. 5. 6. 1 4; MS. 2. 13. 1 : 152. 15; KS. 35. 3; TB. 2. 8. 9. 3.

8 Cf. तुभ्यं भरन्ति क्षितयो यविष्ठ RV. 5. 1 10; MS. 4. 11. 4 : 172. 5; KS. 7. 16; TB. 2. 4. 7. 9.

9 Cf. यो देह्योनमयद् वधस्नैः RV. 7. 6. 5; TB. 2. 4. 7. 9; यो देह्यः TB. 3. 12. 1. 1.

10 Cp Sāyaṇa on TB. 3. 12. 2. 1.

ग्निविकाराः। शिष्टाः सर्वा आग्नेयविकाराः। दिवः श्येनयः समाम्नाः। तत्र श्लोकौ—

इष्ट्वामावास्यया तस्मिन् प्रथमायामुपक्रमः।
दिवः श्येनीभिर्यक्ष्ये च दैवः श्येनं हविस्तथा ॥
आप ऐन्द्राग्नधर्माणः शिष्टा आग्नेयधर्मकाः।
पष्ठौह्यादि यथाश्राद्धं स्त्रियाभरणमेव च ॥

अपाद्याभिश्च[1]। अपाद्यानां सर्वं पूर्ववत्। अपाद्या इति समुदायनाम। पूर्ववदारम्भकालः। पञ्चेष्टयः। अग्न्यनुमती पूर्ववदनुषज्येते पञ्चस्वाद्योत्तमे। तपः श्रद्धा सत्यं मनश्चरणमित्येताः पञ्चस्विष्टिषु देवताः। अपाद्याभिर्यक्ष्ये। स्वर्गं लोकमवाप्नवानीति सङ्कल्पः। आपाद्यं हविः। आग्नेयमष्टाकपालम्। तपसे[2] चरुम्। अनुमत्यै चरुम्। नारिष्ठान् हुत्वा। अग्नये स्वाहा। तपसे स्वाहा अनुमत्यै[2] स्वाहेत्यादि। अग्निर्मूर्धा भुव[3] इत्याग्नेयस्य। तपसा देवा इति द्वे तपसः। अनुमत्यादि पूर्ववत्। सर्वासां पूर्ववद्दक्षिणा। श्वोभूते पूर्ववत्सर्वम्। श्रद्धायै चरुमिति विशेषः। श्रद्धायै स्वाहेति द्वितीयः। श्रद्धया देवो देवत्वमश्नुत इति द्वे श्रद्धायाः। तत्र[4] पंचपदा याज्याः[4]॥ ६ ॥ शेषं सर्वं पूर्ववत्। श्वोभूते सर्वं पूर्ववत्। सत्याय चरुमिति मध्यमः। सत्याय स्वाहेति द्वितीयः। आगात्सत्यमिति द्वे सत्यस्य। श्वोभूते पूर्ववत्। मनसे चरुमिति मध्यमः। मनसे स्वाहेति द्वितीयः। ब्रह्माहुतीरिति द्वे मनसः। श्वोभूते पञ्चम्यां पूर्ववत्सर्वम्। चरणाय चरुमिति मध्यमः। चरणाय स्वाहेति द्वितीयाहुतिः। उपह्वेऽस्येति द्वे चरणस्य। शेषं पूर्ववत्। ब्राह्मणतर्पणान्ताः पञ्चेष्टयः। तत्र श्लोकः —

1 Cp. TB. 3. 12. 3. 1, with Sāyaṇa on it.

2 Cp. 1.

3 Cp. RV. 8. 44. 16; SV. 1. 27; VS. 3. 12; TS. 1. 5. 5. 1; MS. 1. 5. 1: 65. 8; KS. 6. 9; 7. 4; 9. 2; TB. 3. 5. 7. 1; 12. 3. 4.

4 Below on the margin. For याज्यानुवाक्याः cf. कैक on KS. 1. 184.

5 Marked with green unguent. आगात् सत्यं हविरिदं Cf. TB. 3. 12. 3. 2.

अपाद्याभिस्तथा यद्ये आपाद्यं च हविस्तथा ।
सर्वा आग्नेयविध्यन्तास्तपसादे द्वयं[1] द्वयम् ॥

॥ अपाद्याः समाप्ताः ॥[2]

॥ चतुर्थः पटलः ॥

---

1 So MS. May be ०देर्द्वयं or ०दौ

2 Cp. Catalogue of Sanskrit manuscripts, Govt. Collection, Vol. II, Vedic manuscripts. 4 leaves, 8. lines a page. Substance country made paper. 7 × 3½ inches. Folia 4, lines 9 on a page. Extent in ślokas 60. Character Nāgara of the early nineteenth century. Appearance discoloured. Complete. This paṭala of the Kāthaka Śrauta sūtra, which was generally supposed to be lost, contains directions for two different sacrifices, one the दिवः श्येनीयाग and the other अपाद्यायाग.

काठकश्रौतसूत्रसङ्कलनम्*

काठके—ग्रन्थिं कृत्वा पुरस्तात् प्रत्यञ्चमपकर्षतीति । पृ० ५३

काठके—अष्टादशदारुं शुष्कं समानवृक्षस्य सन्नह्यति त्रिंशतिमिष्टौ पशुबन्धे चेति । पृ० ५३

लौगाक्षिः—वेदं करोति दर्भमुष्टिं प्रसव्यमावेष्ट्योपभुज्याग्राणां शुल्वं कृत्वा त्रिः परिहृत्य गुणेपु शुल्वान्तमवकृष्याऽऽयम्य शुल्वात् प्रादेशे छित्त्वाग्राणीध्मे निधायोत्करे मूलानि ततो वेदिकरणमिति । पृ० ५५

अत एव मैत्रकठापस्तम्बसूत्रेषु वैकङ्कती ध्रुवेति पठ्यते । पृ० ५६

लोकाच्छेषस्य प्रतिपत्तिरिति कठसूत्रात् । पृ० ५६

मण्डनः—रौहीतकान् न्यग्रोधोत्थान् पालाशान् वा कठश्रुतेः ।
कुर्वीत चमसांस्तेषामभावेऽन्यद्रुमोद्भवान् ॥
आश्वत्थं वारणं नो चेदिडापात्रमिहान्यजम् ।
अग्निहोत्रहवण्यत्र ग्राह्या वैकङ्कती शुभा ।
पालाशी तु कठश्रुत्या द्वयाभावेऽन्यवृक्षजा ॥ इति । पृ० ६१

काठके—अरत्निमात्री स्रुगग्निहोत्रहवणी पालाशी सामान्यतया निर्वपणमितरासां, बाहुमात्राः स्रुग्दण्डाः प्रहस्तमात्राणि प्रस्रवणान्यर्थपरिमाणानि पात्राणि पालाशी जुहूराश्वत्थ्युपभृद् वैकङ्कती ध्रुवा शमीभूर्जमय्यो वा त्वक्कोबिला हंसमुख्यो भवन्तीति श्रुतिर्नैयग्रोधाश्चमसा रौहीतका वा

* Quotations are taken from the commentaries of Karka and Yājñikadeva on Kātyāyana Śrautasūtra, edited by A. Weber, Berlin. 1859.

सर्वाणि वा पर्णमयानि स्फ्यस्रुवशम्यं खादिरं प्राशित्रहरणं च यद्वा यज्ञियानां पात्रीडाचमसं लोकाच्छेपस्य प्रतिपत्तिरिति। पृ० ६१

तदुक्तं मण्डनमिश्रैः — छिन्नं लूनं च पिष्टं च साम्नाय्यं मृन्मयं तथा।
लोकसिद्धं गृहीतं चेन्मन्त्रा जाप्याः कठाशयात् ॥

पृ० १६५

काठके — पूर्वां पौर्णमासीमुपवसेददर्शनेऽमावास्यामिति। पृ० १६६

काठके — तस्मात्तृणमादायोभयतः प्रतिच्छिद्य दक्षिणा प्रत्यक्तृणं निरस्यतीति। पृ० १७७

साङ्गारेण भस्मनेति काठके। पृ० २०५

काठके — वेदं करोति दर्भमुष्टिं प्रसव्यमावेष्ट्योपभुज्याग्राणां शुल्वं कृत्वा त्रिः परिहृत्य गुणेषु शुल्वान्तमवकृष्यायम्य शुल्वात्प्रादेशे छित्त्वाग्राणीध्मे निधायोत्करे मूलानीति। पृ० २०६

काठके च — पुरस्तात्प्रस्तरादनन्तर्गर्भौ विधृती आदाय वेद्यामुदञ्चौ निधायेति। पृ० २२८

काठके च — लेपाद् द्विरुपस्तारः सकृत्पुरोडाशावदानं लेपाद् द्विरभिघारणमिति। पृ० २६२

काठके — पितापुत्रौ चेदाहिताग्नी स्यातां येभ्यः पिता तेभ्यः पुत्रो दद्यात्। पिता प्रेतः स्यात्पितामहो जीवेत्पित्रे पिण्डं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यादिति। पृ० २६४

कठसूत्रे — पौर्णमास्यामादधानः पूर्वामुपोष्याधायाग्न्याधेयेष्टिभिरिष्ट्वा जुह्वदग्निहोत्रमुपतिष्ठमानो वसति श्वोऽन्वारम्भणीया पौर्णमासं चेति।

पृ० ३५०

काठके च — आधानं चेत्पौर्णमास्यां पूर्वां तनूदेवताभ्य उपवसेदुत्तरामन्वारम्भणीयायै पर्वणे चेति। पृ० ३५५

लौगाक्षिः — पौर्णमास्यामादधानः पूर्वामुपोष्याधायाग्न्याधेयेष्टिभिरिष्ट्वा जुह्वदग्निहोत्रमुपतिष्ठमानो वसति श्वोऽन्वारम्भणीया पौर्णमासं चेति।

पृ० ३५५

पुत्रस्य नाम गृह्णाति पुत्रयोः पुत्राणां वा प्रियतमस्येति लौगाक्षिरिति काठके । पृ० ३६३

तत्र प्रकारद्वयम्—होमाद्यर्थमुद्धृतान् सम्भाव्य प्रवत्स्यदुपस्थानेनैवोपस्थानमिति कठसूत्रे । पृ० ३६७

कठसूत्रे विशेषः—प्रवसत उपस्थानं याजमानं चेत्येके नेति लौगाक्षिः । प्रवसन् यदा हुतं मन्येताथ भुञ्जीत । पर्वण्युपोष्य यदा संस्थितं मन्येताथ भुञ्जीतेति । तथा—अनुपस्थाय प्रवसन् प्रवत्स्यदुपस्थानेन प्रतिदिशमुपतिष्ठेतेति । तथा—यदाऽग्निहोत्रे संस्थिते वा तन्त्र आगच्छेदागतोपस्थानमेवास्य तदहः स्यान्न नित्यमग्न्युपस्थानं न याजमानमित्येके । त्रिसंस्थिते वा तन्त्र आगच्छेदागतोपस्थानेनोपस्थाय यदतीतं याजमानं तज्जपेन्नातीतं जपेदिति लौगाक्षिरिति । पृ० ३६६

कठसूत्रेऽप्येवमेवोक्तमास्ते—श्वो भूते तुल्यमा निर्वपणादिति । पृ० ४२६

तथा काठके—अग्नये वैश्वानराय द्वादशकपालमिति । पृ० ४२६

तथा काठके (मानवे) च—मग्नः पौर्णमासीं संस्थाप्य केशान् वपति श्मश्रूणीति । [तथा] त्रिःश्वेतया शलल्या लोहायसेन क्षुरेण निवर्तयतीति ।

पृ० ४३५

काठके च—ब्रह्मचारिव्रतो भवत्यासमापनादधःशायी मांसं स्त्रियश्च वर्जयेत् । काममृतौ जायामुपेयादिति लामकायनिनां ब्राह्मणमिति ।

पृ० ४३८

अत्र कठसूत्रम्—आमयवपिष्टानां करम्भपात्राणि यावन्तो यजमानस्य पुत्रपौत्रा यजमानः पत्नी च प्रतिषिद्धे एकमाधिकं शृङ्गिणं मेषमशृङ्गीं मेषीं शुक्लोर्णाभिरावेष्ट्येति । पृ० ४४२

एतेषां कठादीनां वारुणप्रघासिकहविर्ग्रहणकाल एवैन्द्राग्ननिर्वापानन्तरं करम्भपात्रादीनां निर्वपणं विहितमस्ति । पृ० ४४३

काठके च—उत्तरतश्चात्वालं बहिर्वेदि सम्प्रत्युत्तरवेदेस्त्रिप्रक्रमेऽपरिमितं वेति जानुदघ्नं खात्वेति च । पृ० ४४८

काठके—परिमण्डलां वेति । पृ० ४५१

काठके च — श्वो भूतेऽग्नी प्रणयते यथा पशुबन्ध इति । पृ० ४५६

तथा च काठके — त्रीन्परिधीन्पैतुदारवान् प्रादेशमात्रांस्तैरुत्तरवेदिनाभिं परिदध्यादिति । पृ० ४६०

तथा च काठके — अध्वर्युरेव सम्प्रैषान्मारुतीवर्जमिति । पृ० ४६२

काठके — यावन्तो वेष्टयेति । पृ० ४६८

काठके च — प्रतिप्रस्थाता पत्नीमाह कति ते कान्ता इति । सत्यं वदेन्निर्दिष्टांस्तान्वरुणो गृह्णात्विति [ब्रूयाद् इति] । पृ० ४७३

काठके च — तानि शूर्पेण । शूर्पहस्ता पत्न्यादित्यमुपतिष्ठते नमस्त आतानेत्यन्तर्वेदि गच्छति । अपरेण विहारं परिक्रम्य दक्षिणेन वेद्यन्तेन गत्वा पूर्वेण दक्षिणमग्निं प्रत्यञ्चौ तिष्ठन्तौ पत्नीयजमानौ शूर्पमन्वारभ्य जपं प्रघास्यान् इति द्वे यद् ग्राम इति हुत्वाक्रन्निति जपित्वा यथार्थं प्रव्रजति इति । पृ० ४७४

तथापस्तम्बः — एधोऽसीति समिध आधायाहवनीयमुपतिष्ठन्त इति । एवमेव मानवकठसूत्रयोरपि । अनपेक्षमाणा आयन्ति समिधः समिन्द्ध एधोऽसीत्यग्नौ समिधमादधातीति काठके । पृ० ४७६

काठके च — वारुण्या निष्कापेणावभृथं यन्त्युदश्चं प्राञ्चमुरुं हि राजेति द्वाभ्यां स्थावरमुदकं गत्वा तस्य पश्चादुपविश्याग्नेरनीकमित्यप्स्वाघारमाघारयति तृणे दारुणि वा शेषेण चतुरोऽपबर्हिषः प्रयाजान् यजत्याज्यभागाविष्ट्वा निष्काषस्यावदाय वरुणं यत्रत्यग्नीवरुणौ स्विष्टकृद्धर्मेणोत्तरावनुयाजाविष्ट्वा देवौ यजेति प्रथमस्य सम्प्रैष आयन्ति यथा पशुबन्ध इति । पृ० ४७६

बर्हिरनुप्रहरणवर्जं वा आपस्तम्बमाकठमानवसूत्रेषु चायमेव पक्ष उक्तोऽस्ति । पृ० ४८६

सायमिति काठके । पृ० ४६१

एवमपि च मैत्रकठतैत्तिरीयसूत्रेष्वप्युक्तमस्ति । पृ० ५०२

काठके — सपवित्रे निवान्याया गोर्दुग्धं सक्तूंश्चेषीकया प्रसव्यमन्वारभ्योपमन्थतीति । पृ० ५१०

काठके च—उपमूललूनं बर्हिरिति पूर्वेण दक्षिणमग्निमेकैकं पात्रं प्रयुनक्त्यपरेण ब्रह्मयजमानाविति । पृ० ५११

काठके च—अनूच्यमानायां सामिधेन्यां त्रिरिध्ममादधातीति । पृ० ५१३

यावन्तो यजमानस्य पुत्रपौत्रा इति काठके । पृ० ५३०

काठके—अथ सद्योऽग्निष्टोमाय दीक्षते पशुना वेति । पृ० ५४०

काठके—तदहः शुनासीर्यं चतुर्थ्यां मासि चतुर्षु वा मासेषु शुनासीर्येण यजेतेति । पृ० ५४४

कठानां पञ्चाहिकानि पठ्यन्ते । तत्र फाल्गुनशुक्लैकादश्यां वैश्वदेवं पर्व । तस्मिन्नेवाहनि वरुणप्रघासार्थमुद्धृत्य करम्भपात्रकरणाद्युत्तरवेदिछादनान्तम् । द्वादश्यां वरुणप्रघासाः । त्रयोदश्यामानीकवत्यादिगृहमेधीयान्तम् । चतुर्दश्यां दर्विहोमादिसाकमेधसमाप्तिः । पौर्णमास्यां शुनासीरीयमिति । एवं पाशुकान्यपि पञ्चाहिकानि भवन्ति । कठानाञ्च प्रतिपद आरभ्य क्रियन्त इति पठ्यते । पृ० ५५४

काठके—देवस्त्वेत्युक्त्वेति । पृ० ५६८

काठके—प्रागग्रे रथमात्रीं वेदिं प्राक्परिग्रहात्कृत्वा तस्याः पूर्वार्धाद् द्वात्रिंशदङ्गुलामुत्तरवेदिं चतुःस्रक्तिं प्रत्यग्यूपदेशात् पदमात्रे भूयसि वा अपरिमिता वेदिर्यदा स्याद्दशपदोत्तरवेदिः सम्भवेत्तां वेदिं कुर्यादिति लौगाक्षिरिति । पृ० ५७३

सम्भारानुत्तरनाभौ न्युप्यापि वैतदन्तं पूर्वेद्युः स्यादिति काठके ।
पृ० ५७३

तथा च काठके—त्रिरनूक्त उत्तरेण वेद्यन्तेन गत्वा पूर्वेणोत्तरवेदिं प्रत्यङ् तिष्ठन्नित्यादि । पृ० ५७४

काठके—आहरन्त्याज्यं पात्राण्यरणी प्रथमपरापतितं स्वर्वधिमन्थनौ च शल्कौ कार्ष्मर्यमय्यौ वपाश्रपण्यौ रशने त्रिगुणां त्रिव्यामां द्विगुणां द्विव्यामां स्राक्तीमध्यवदानीं स्वधितिं कुम्भीं दण्डं शूलं यूपं प्रक्षालितं पशुं स्नातं पन्नदमभ्यङ्गं येन चार्थो विहारं परिस्तीर्य पात्राणि प्रयुनक्तीति । पृ० ५७५

अत्र काठके विशेषः — दधि च निर्वपति यथाज्यं द्वे उपभृन्मन्त्रे चतुर्गृहीतान्याज्यानि द्वितीयस्यामुपभृति तेज इत्युपस्तीर्य ज्योतिरसीति दध्यासिच्योत्तमाभ्यामभिघार्य शेषे घृतमासिच्य तस्य पश्वभिघारणं वनस्पतिं च यजतीति । पृ० ५७६

कठसूत्रे — प्रादेशमात्रं सम्प्रवेष्ट्याणीयस्यां स्थवीयसीमतिषज्येति ।
पृ० ५८०

काठके — उप देवानिति पशुमुपाकरोति प्रत्यङ्मुखमिति । पृ० ५८१

द्विशृङ्गैकशृङ्गाभ्यामिति काठके । पृ० ५८७

अथ कठसूत्रे विशेषः — प्रमुच्य यूपात्पशुं यन्त्युल्मुकहस्तोऽग्रत आग्नीध्र उत्तरस्मिन्वेद्यन्ते पशुमवस्थितं द्विशृङ्गैकशृङ्गाभ्यां वपाश्रपणीभ्यां मुखमभिनिधायाश्राव्याहोपप्रेष्य होतर्हव्या देवेभ्य इति सञ्चरेण निष्क्रम्य रेवति प्रेत्यनुमन्त्रयत इति । पृ० ५८८

काठके च — चरमेऽङ्गारे वपां निगृह्यान्तरा यूपाग्नी हृत्वाभिघार्य श्रपयतीति । पृ० ५९३

काठके च — प्रस्तुतासु स्तोकेभ्योऽनुब्रूहीति श्येनीं सुशृतां वेद्यां दर्भेषूदगग्रेषु निधायेति । पृ० ५९३

आपस्तम्बेन तु आहवनीयस्य दक्षिणत एव नीत्वा दक्षिणस्यां वेदिश्रोण्यां बर्हिषि प्लक्षशाखायां वपाया आसादनमुक्तम् । कठसूत्रे चोदगग्रेषु दर्भेषु । पृ० ५९४

काठके च — स्वाहाकृतीरिष्ट्वा प्रत्याक्रम्याभिघारयति ध्रुवां पृषदाज्यं वपां नोपभृतं तमाज्यभागाविष्ट्वेति । पृ० ५९४

काठके च — असिना वपां सकृदवदाय द्विरभिघार्येति । पृ० ५९५

काठके च — स्थाल्यामवदानानि श्रपयति शूले हृदयमसम्भिन्ने वृक्कावनिर्ब्रेडिते गुदवनिष्ठु गर्तं खात्वा तस्मिन्नूवध्यं कुर्यात्पशुपुरोडाशाय पात्रशेषं प्रयुनक्ति । यद्देवत्यः पशुस्तद्देवत्यं व्रीहिमयमेकादशकपालं वा । प्रणयनादि तुल्यमाप्त्येभ्यो व्युह्य बर्हिराप्त्येभ्यो निनयति । शृते पशौ पशुपुरोडाशेन प्रचरति यदि बहवः पशवः पशुपुरोडाशा वा स्युर्जुहूपभृतोरुपस्तीर्य जुह्वामवदाया-

भिघार्योपभृत्यवदायानभिघार्योत्तमस्याभिघारणमनु सौविष्टकृतमभिघारये-
द्यत्र क्व च सहोपभृत्तदेवमेव कुर्यात् । इन्द्राग्निभ्यां पुरोडाशस्यानुब्रूहीत्याश्रा-
व्याहेन्द्राग्निभ्यां पुरोडाशस्य प्रेष्येति । इष्टे स्विष्टकृता प्रचरत्यग्नये पुरोडा-
शस्येति सम्प्रैषः पुरोडाशयोः पुरोडाशानामिति चेडामुपहूय पृषदाज्यस्य
स्रुवेण वेदोपयामेनादायाह शृतं हविः शमिता३रिति शृतमिति शमिता
प्रत्याहैवं मध्य एवं गत्वेति । पृ० ६०५

काठके च — प्रवृह्य शूलाद्धृदयमभिघारयति पशुं चेति । पृ० ६०८

काठके — अग्रे हृदयस्यावद्यन्नाह मनोताया इति । पृ० ६१०

कठसूत्रे — सौविष्टकृतानामेव सर्वेषां द्विरिति । पृ० ६१०

प्राशित्रं तु कात्यायनापस्तम्बमानवकठसूत्रेषु शतपथे च पठितं नास्ति ।
पृ० ६११

काठके च — सकृच्चतुर्वावदाय वनस्पतिना चरतीति । पृ० ६१२

काठके — आहरत्याग्नीध्रः पशुश्रपणादङ्गारान्पूर्वेणाध्वर्युं कृत्वोत्तरस्यां
वेदिश्रोण्यां व्युह्य बर्हिर्निवपति तत्रोपयज इति । पृ० ६१५

काठके — तत्रोपयजः पृषदाज्येनैकादशानुयाजान्प्रत्याहुति गुदकाण्ड-
स्यासम्भिन्दन्नक्ष्णयावदाय समुद्रं गच्छ स्वाहेति प्रतिमन्त्रमिति । पृ० ६१५

काठके च — संस्थितयजुर्हुत्वा जुह्वा स्वरुं जुहोत्यनुपस्तीर्णमनभिघारितं
द्यां ते धूम इति । पृ० ६१६

काठके च — अथाग्निष्टोमस्य पुण्याहे दीक्षा पर्वणि सुत्यामावास्ये वा
संस्थितो दीक्षा पुण्याहे सुत्येति । पृ० ६३२

काठके च — पत्नी यजमानश्चाश्नीत इति । पृ० ६३५

काठके च — तीर्थेनावसृप्य शं नय इति स्नात्वोदिदाभ्य इत्युत्क्रम्येति ।
पृ० ६३६

काठके — उच्चैः प्रवर्ग्येण चरतीति । पृ० ६३९

काठके — अपरेणाग्निं कृष्णाजिने आस्तीर्यान्तर्मांसे बहिर्लोम्नी यद्येकं
स्याद्दक्षिणं पूर्वपादं प्रतिषीव्येदिति । पृ० ६४४

कठसूत्रे — विष्णोः शर्मेति क्षौमान्तेन शिरः प्रच्छादयति जालं पत्न्याः

शिरसीति । पृ० ६४५

तथा च काठके — चौमान्तेन शिरः प्रच्छादयति जालं पत्न्याः शिरसीति । पृ० ६४६

काठके च — दैवीं धियमिति मार्जयते इति । पृ० ६५०

काठके च — यदि प्राक्कालादङ्गुलीर्वाचं वोत्सृजेदिदं विष्णुर्विचक्रमे बृहस्पते जुषस्व नस्त्वमग्ने व्रतपा असीत्याग्निमुत्तमयेति । पृ० ६५२

मानवे च लोमतः कृष्णाजिनस्य शय्यासनमाच्छादनं च प्रतिषिद्धं निष्ठीवनं हसनमववर्षणं दन्ताविष्करणममेध्यदर्शनमपाङ्गाहनं होमोऽनृतं च प्राग्वंशादुदयास्तमयावभ्याश्रावणं च न स्यान्नक्तं मूत्रपुरीषे कुर्याद्यदि दिवा छायायां यदि हसेदपिधाय मुखमिति उदन्तीरित्यवसृष्टो जपेदद्ब्धं चक्षुरित्यमेध्यं दृष्ट्वा अदीक्षितवादं चेद् ब्रूयात्त्वमग्ने व्रतपा असीति जपेदकाले वाचं विसृज्य वैष्णवीमाग्नावैष्णवीं सारस्वतीं बार्हस्पत्यामित्येता निगद्य वाचं यजतीति । एवमेव कठसूत्रेऽपि । पृ० ६५३

आपस्तम्बः — चतुर आज्ययागान्प्रतिदिशं यजति पथ्यां स्वस्तिं पुरस्तादग्निं दक्षिणतः सोमं पश्चात्सवितारमुत्तरतो मध्येऽदितिमिति । एवं मानवकठसूत्रयोरपि । पृ० ६५४

काठके — सोमक्रयणीं बभ्रुमेकहायनीं ज्यायसीं वेति । पृ० ६५८

कठसूत्रे — तस्य दक्षिणेषु सप्तसु पूर्वपदेषु लक्षणं कुरुते । पृ० ६५६

काठके च — न विचीयमानं प्रेक्षेरन्निति । पृ० ६६१

अपरेण ब्रह्मयजमानौ दक्षिणतः शकटमन्वारभ्याह सोमायेत्यादि काठके । पृ० ६६८

मानवलौगाक्ष्यापस्तम्बसूत्रेषु अत्र सुब्रह्मण्य सुब्रह्मण्यामाह्वयेत्येवं प्रैष उक्तोऽस्ति । पृ० ६६६

अग्रेण प्राग्वंशं कर्णगृहीतमजमग्नीषोमीयं कालालं पीवानमवस्थापयतीति मानवादिषु । पृ० ६७०

काठके च — वरुणस्य स्कम्भसर्जन्यसीति शम्यां प्रवृहयति प्रउक्त इति योक्त्रपाशं प्रमुच्य प्रविश्य पत्नीमन्वारम्भयित्वा निर्वपति वैष्णवं नवकपाल-

मग्नेस्तनूरिति पञ्चकृत्वः सावित्रादिभिस्तुल्येनोत्तरं विमुञ्चति वरुणोऽसीति सोममादत्त इत्यादि। प्रोक्षणादि तुल्येडान्ता सन्तिष्ठत इति च । पृ० ६७३

अत्र कठसूत्रे विशेषः — गार्हपत्ये तप्तानां दीक्षितस्योदकार्थो दक्षिणाग्नौ पत्न्या इति। पृ० ६७४

काठके — सौमिकीं वेदिं विधित्सन् पञ्चदशसु प्रक्रमेषु लक्षणं कुरुते त्रिपदः प्रक्रमोऽर्धचतुर्थपदो वा पदं पञ्चदशाङ्गुलं द्वादशाङ्गुलं वा तत एकविंशतौ ततस्त्रिषु ततस्त्रिषु ततो द्वादशसु पाशः पूर्वेण प्राग्वंशं त्रिषु प्रक्रमेषु शङ्कुं निहन्ति तस्मिन्पाशं प्रतिमुच्य प्राचीमायम्य यदेकविंशतौ तत्र शङ्कुं निहन्ति तस्मिन्पाशं प्रतिमुच्य पञ्चदशसु गृहीत्वा दक्षिणायम्य शङ्कुं निहन्त्येतेनोत्तरोऽन्तो व्याख्यात एवं पूर्वार्धं विदधाति त्रिषु गृहीत्वा द्वादशसु तत्र शङ्कुं निहन्तीति। पृ० ६८७

काठके — सच्छदिष्कयोर्हविर्धानयोर्ग्रन्थीन् विचृत्य प्रक्षाल्याभ्यज्याभितः पृष्ठ्यामवस्थाप्येति। पृ० ६९१

काठके च — त्रिरनूकेऽनुद्वृहन्तो वर्तयन्तीति। पृ० ६९३

कठसूत्रे — द्विपुरुषया पञ्चाङ्ग्या हविर्धानं विदध्यादनःसंमितं वैव स्याद् द्विप्रादेशया पञ्चाङ्ग्योपरवान् विदध्याद् द्विप्रादेशोपरवेषु पृष्ठ्या प्रादेशं द्वैधं सम्भुज्यार्धप्रादेशेन परिलिखेद्दशपदया पञ्चाङ्ग्योत्तरवेदिं विदध्याच्चतुः शय्या पञ्चाङ्ग्याग्नीध्रीयं विदध्यात्त्रिपदया पञ्चाङ्ग्या धिष्ण्यान् विदध्यादष्टादशशय्या पञ्चाङ्ग्या सदो विदध्यादिति। पृ० ६९६

काठके — दक्षिणस्य प्रत्यगुपस्तम्भनादिति। पृ० ६९७

काठके — बाहुमात्रान् खनन्त्यसम्भिन्दन्तोऽधस्तात् सम्भिन्दन्ति ।
पृ० ६९८

काठके — अध्वर्युयजमानौ संविमृशतो द्वा अन्यो द्वा अन्यः किमत्रेत्यध्वर्युर्यजमानो भद्रमिति प्रत्याह तन्नौ सहेत्युभावुपस्पृश्येति। पृ० ६९९

काठके — अधिषवणे फलके पुरस्तादंहीयसी पश्चाद्वरीयसी द्व्यङ्गुले वा संहिते पश्चाद्रक्षोहणा इति प्रोक्षत्युत्तरेणोपरवेषूपदधाति । उत्तरेण पुरीषेण पर्युह्य शङ्कुभिः परिणिहत्येति। पृ० ७००

काठके—पूर्वेणोपस्तम्भनं पात्रेभ्यः खरं करोतीति। पृ० ७०१

काठके—अर्धपञ्चमेषु पृष्ठ्याया दक्षिणा मध्य औदुम्बर्यै गर्तं परिलिखतीति। पृ० ७०१

काठके च—न प्रत्यक्सदोऽतीयादध्वर्युः समया यद्यतीयात्क्षेत्रस्य पत इति प्रतिसञ्चरेदिति। पृ० ७०५

काठके—प्रत्यगुदग्घविर्धानादाग्नीध्रयां शालामर्धमन्तर्वेद्यर्धं बहिर्वेदि प्रागपरस्माद्वेद्यन्तात्सदो नवशयं प्राक्सप्तविंशतिस्तिर्यगिति। पृ० ७०६

काठके च—रौद्रेणेत्यनुषङ्गः सर्वत्रेति। पृ० ७०७

अत्र काठके विशेषः—वेदिशेषं स्तृणाति ससदोहविर्धानं धिष्ण्यखरवर्जमिति। पृ० ७०९

काठके च वत्सापाकरणस्य कालान्तरमुक्तम्—वत्सानपाकृत्य प्रवर्ग्यवति पात्राण्युद्वास्याग्निकर्मणाग्निं प्रणीयेति। पृ० ७१०

कठसूत्र एतेषां सर्वेषामग्नीषोमीयपात्रैः सहासादनं प्रोक्षणं नयनं च विहितमस्ति। पृ० ७१२

काठके—आग्नीध्रीये धिष्ण्ये प्रत्यङ् तिष्ठन्निधायाग्ने नयेति जुहोत्यत्र ग्राववायव्यानि सादयन्त्यासन्दीं चेति। पृ० ७१३

काठके—प्रत्यङ् धिष्ण्यानतिसर्पेदध्वर्युरिति। पृ० ७१४

तथा च काठके—यदि बहवः पशवः पुरोडाशा वा स्युर्जुहूपभृतोरुपस्तीर्य जुह्वामवदायाभिघार्योपभृत्यवदायाभिघार्योत्तमस्याभिघारणमनु सौविष्टकृतमभिघारयेद्यत्र क्वचन सहोपभृदेवमेव कुर्यादिति। पृ० ७२३

कठसूत्रे—मार्जयित्वा वसतीवरीर्गृह्णाति वहन्तीनां कुम्भेन प्रतीपस्तिष्ठंश्छायायां दर्भैरन्तर्धाय हविष्मतीरिति पूरयित्वान्यैरपिधाय सञ्चरेण प्रविश्यापरेण गार्हपत्यमग्नेर्व इति निधायेति। पृ० ७२७

नाग्नीषोमीये हृदयशूलं करोति न सवनीये न स्वरुमनुप्रहरति नान्तरापो देवयजनं च पथा व्यवेयात् प्रागस्तमयान्निष्क्रम्य वसतीवरीर्गृह्णाति वहन्तीनां प्रतीपस्तिष्ठन् प्रतीपं कलशमुपमारयतीति कठसूत्रेऽप्येवमेव क्रम उक्तोऽस्ति। पृ० ७२८

काठके — संस्थिते वसतीवरीः परिहरति व्युत्क्रामतेत्युक्त्वापरेण विहारं परिक्रम्य दक्षिणेन वेद्यन्तेन गत्वा दक्षिणस्यामुत्तरवेदिश्रोण्यां सादयतीन्द्राग्न्योरिति यथेतं परेत्यापरेणाग्नीध्रीयमग्निं विश्वेषां देवानामिति सादयतीति । पृ० ७२६

काठके च — ऐन्द्रं दोहयति वत्सानपाकृत्याग्नीध्रीये यजमानो वसतीति ।
पृ० ७३१

काठके — देवेभ्यः प्रातर्यावभ्योऽनुब्रूहि ब्रह्मन् वाचं यच्छ सुब्रह्मण्य सुब्रह्मण्यां पैतापुत्रीयामाह्वयेति प्रेष्यतीति । पृ० ७३४

काठके — दधि सक्तवः करम्भः सक्तवः परीवाप इति । पृ० ७३४

मानवकठसूत्रयोः प्रतिप्रस्थातः सवनीयान्निर्वपस्वेति प्रेषणपूर्वकं प्रतिप्रस्थातृकर्तृकत्वमुक्तमस्ति । पृ० ७३४

कठसूत्रे — दक्षिणश्रोण्यामुक्थ्यस्थालीं पूर्वमुक्थ्यपात्रमुत्तरस्यां श्रोण्यामादित्यस्थालीं पूर्वमादित्यपात्रमिति । पृ० ७३६

काठके — वायव्यानि हस्तपाणिप्रादेशमात्राणि तृतीयमात्रखातानि नानालक्षणानि वैकङ्कतं मन्थिपात्रमाश्वत्थे उभयतोमुखे ऋतुपात्रे स्रुक्पात्ररूपे तयोरश्वस्येव शफोऽधस्तादिति । पृ० ७३६

स्रुक्पात्रमात्रं पारिप्लवं चतस्रो ग्रहस्थालीरिति काठके । तस्य च विनियोग उक्तः या वां कशेति द्रोणकलशात्पारिप्लवेन गृह्णातीति ।
पृ० ७३७

काठके — शुक्लोर्णानां विचितकेशानामूते पवित्रे प्रादेशमात्रारत्निमात्रे इति । पृ० ७३७

कठसूत्रे — आधवनीयपूतभृतौ च कुम्भौ सोदञ्चनौ सापिधानावपरमाधवनीयमिति । पृ० ७३८

काठके — नैयग्रोधाश्वमसा रौहीतका वा सर्वाणि वा पर्णमयानीति ।
पृ० ७३८

कठमैत्रसूत्रयोस्तु प्रतिग्रहणं द्वयोर्द्वयोरेवान्तर्धानमुक्तम् । पृ० ७४५

काठके — श्वात्रा स्थेति होतृचमसात्सोमं स्नेहयित्वा तस्य षडंशून् प्रति-

प्रस्थाता सव्ये पाणावभिषजति द्वौ द्वावसंश्लिष्टौ तस्मिन्नुपांशुपात्रमादायेति ।
तथा—अभिषुणुयादष्टकृत्व उपांशुसवनपाणिरञ्जलिनोपांशुपात्रे सोममासिञ्चति वाचस्पतये पवस्वेति प्रवृह्यांशून् प्रतिप्रस्थातान्तर्दधाति देवौ देवानामिति प्रत्यभिषजति भूयसीरासिच्यैकादशकृत्वोऽभिषुत्यैवमासिञ्चति । एवमन्यौ प्रतिप्रस्थाता भूयसीरासिच्य द्वादशकृत्वोऽभिषुत्यैवमासिञ्चतीति ।

पृ० ७४५

काठके—ग्रहमादाय स्वांकृत इत्युत्थायोर्वन्तरिक्षमिति दक्षिणा परिक्रम्य दक्षिणार्धेऽग्नेर्ऋजुस्तिष्ठन् सर्वहुतामित्यादि । पृ० ७४६

काठके—ऋजीषेण ग्राव्णः प्रच्छाद्याधोऽक्षं द्रोणकलशमुद्गातारः प्रोह्यान्तराक्षविष्कम्भौ दशापवित्रं न्यस्यत्याहिते द्रोणकलशे वितते पवित्र आधवनीयाद्धोतृचमसं पूरयित्वासिञ्चति सन्ततं स्रवन्त्या ग्रहान् गृह्णातीति । पृ० ७५१

अत्र कठसूत्रे—तुल्यमुपांशुनासादनादुत्तरार्धे होम इति । पृ० ७५३

तथा च काठके—ये देवा इत्याग्रयणं द्वयोर्धारयोराग्रयणाद् द्वितीयामिति । पृ० ७५५

काठके—प्रत्यङ्मुखोऽध्वर्युः प्रस्तोत्रे दर्भान्प्रयच्छन्नाह सोमः पवत इति प्रातःसवने । तुल्यमासर्पणात्सदसि प्रस्तोत्रे दर्भान् प्रयच्छन्नाह सोमः पवत इति माध्यन्दिने । एवंविधमेव तृतीयसवनेऽपि सूत्रमस्ति ।

पृ० ७५८

काठके—आश्विनं गृह्णाति या वां कशेति द्रोणकलशात्पारिप्लवेनैतस्मादत ऊर्ध्वं प्रातःसवने गृह्णीयान्मरुत्वतीयमाहेन्द्रौ च माध्यन्दिन इति । पृ० ७६०

काठके—मूर्धानं दिव इति ध्रुवं ध्रुवोऽसीति सादयति तं प्रत्यङ्मुखो राजपुत्रो रक्षेदिति । पृ० ७६१

काठके—आग्नेयमजं सवनीयमुपाकरोति तुल्यमाश्रावणादाश्राव्य होतारं वृणीत एवमितरानिन्द्रं होतारं होत्रादिति होतुरग्निरामीध्रादित्यग्नीधो वरणमश्विनाध्वर्यू आध्वर्यवादित्यध्वर्योर्मित्रावरुणौ प्रशास्तारौ प्राशास्त्रा-

दिति प्रशास्तुरिन्द्रो ब्रह्मा ब्राह्मणादिति ब्राह्मणाच्छंसिनो मरुतः पोत्रादिति पोतुर्ग्रावो नेष्टारो नेष्ट्रादिति नेष्टुर्ग्ना नेष्ट्रादिति वा । अग्निर्हि दैवीनां विशां पुरु एतायं सुन्वन्यजमानो मनुष्याणामिति गृहपतेः । सकृदाश्राव्य होतारं वृणीते नामधेयैरितरान्मन्त्रेण गृहपतिमित्येक इति । पृ० ७६२

कठमैत्रसूत्रयोरनेन द्विवचनान्तेनैव प्रशास्तुर्वरणविधानात् । मित्रावरुणौ प्रशास्तारौ प्राशास्त्रादिति प्रशास्तुरिति काठके । पृ० ७६३

कठमैत्रसूत्रयोरित्थमेव पाठदर्शनादनेकयजमानके सुन्वन्तो यजमाना इति । पृ० ७६३

वपामार्जनान्ते कठसूत्रे सर्वेषां भोजनमुक्तम्—मार्जयित्वा भुक्त्वा प्रक्षालितपादा ग्रहानवेक्षन्त इति । पृ० ७६५

काठके च सहानुवाचनम्—पुरोडाशादीनां पयस्यान्तानामवद्यन् प्रातः प्रातःसवस्येन्द्राय पुरोडाशानामनुब्रूहीत्यवदायमानानामिति लौगाक्षिरिति । पृ० ७६६

काठके—इष्टे स्विष्टकृता प्रचरत्यग्रे पुरोडाशानामिति सम्प्रैष इति । पृ० ७६७

कठमैत्रसूत्रयोस्तु उभयत्रानुहोमो विहितः । तथा च काठके—द्विदेवत्यैश्चरतोऽर्धमैन्द्रवायवस्य प्रतिप्रस्थातादित्यपात्रे गृह्णात्युपयामगृहीतोऽसि वायव इन्द्रवायुभ्यां त्वेति वायव इन्द्रवायुभ्यामिति सम्प्रैषस्ताभ्यां चरत उत्तरः प्रतिप्रस्थातैवं सर्वत्र युगपत्प्रचरणेषूत्तर एव प्रतिप्रस्थाता द्विरिष्ट्वाध्वर्युपात्रे शेषमासिच्य तस्यार्धमादित्यपात्रेणादित्यस्थाल्यामासिञ्चतीति । पृ० ७६८

काठके— होतृचमसमुख्यानुन्नयति नाच्छावाकचमसमिति तस्योपरिष्टादुन्नयनविधानात् । पृ० ७७०

तथा च काठके—अनूद्यच्छन्ते चमसानाश्राव्याहेति । तथा—ब्रह्मोद्गातृहोतृयजमानचमसानां द्विर्यजति सकृदितरेषां द्विर्हुतान् सदो हरन्ति सकृद्धुतान् द्विर्द्विर्यजत्याश्रावं प्रशास्तर्यजेति प्रशास्तुः सम्प्रैषो ब्रह्मन्यजेति ब्राह्मणाच्छंसिनः पोतर्यजेति पोतुः नेष्टर्यजेति नेष्टुरग्नीद्यजेत्यग्नीभस्तान् सदो

हरत्ययाऽग्नीदित्युक्त्वा द्विदेवत्यान् सम्भक्षयत इति । पृ० ७७१

काठके — आग्नीध्रे पुरोडाशान्भक्षयति घृताक्तान्यजमानो हविष्यं पत्नी भुङ्क्त इति । पृ० ७८१

काठके — प्रपद्यमानः प्रतिप्रस्थाता दक्षिणेनाध्वर्योः पात्रं हरेदुत्तर एव सञ्चरेदिति । पृ० ७८२

काठके विशेषः — द्वारे हविर्धानस्योपविश्याध्वर्यू यजतमित्युक्तेऽश्विनावध्वर्यू यजत आध्वर्यवादृतुना सोमं पिबतामिति होतारं वा प्रेष्येद्धोतरेतद्यजेति यद्यध्वर्युर्यजेतोन्नेता ग्रहेण चरेदिति । पृ० ७८३

कठसूत्रे — शेषं सम्भक्षयतो होत्रा पोत्रा नेष्ट्राग्नीधा ब्राह्मणाच्छंसिना मैत्रावरुणेनेतीतरथा पात्रं पर्यस्य होत्रा पोत्रा नेष्ट्राच्छावाकेनेति यथापूर्वं पात्रं कृत्वाध्वर्युणा यथालोकं यजमानेन चेति । पृ० ७८४

काठके — आह्वयते होता प्राङ्मुखमध्वर्युं सदोबिल आसीनं शोंसावो दैवेति प्रदक्षिणमावृत्य प्रत्यङ् तिष्ठन् प्रह्वः प्रतिगृणातीति । पृ० ७८५

एवमेव काठकेऽपि — स्तुते प्रउगे वैश्वदेवेन प्रचरति शेषं सम्भक्षयतो यथाचमसं भक्षयन्ति प्रक्षाल्य मैत्रावरुणचमसमुख्यानुन्नयन्त्युक्थ्यपात्रेणोक्थ्यस्थाल्या गृह्णात्युपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वेति पुनर्हविरिति स्थालीमालभ्य स्तोत्रमुपाकरोति शस्त्रेण ग्रहेण चमसैश्चरन्ति देवेभ्यस्त्वेति मुख्ये शेषमवनीय शेषं सम्भक्षयतो यथाचमसं भक्षयन्ति प्रक्षाल्य ब्राह्मणाच्छंसिचमसमुख्यानुन्नयन्त्युक्थ्यपात्रेणोक्थ्यस्थाल्या गृह्णातीत्यादि ।
पृ० ७९०

काठके — सोमातिरेकं रक्षेत्प्रशास्तः प्रसुवेत्युक्ते यथाप्रसृप्तं निःसर्पन्ति सन्तिष्ठते प्रातःसवनमिति । पृ० ७९१

काठके — ग्रावसु राजानं न्युप्योष्णीषं ग्रावस्तुतेऽध्वर्यवे वसनमिति ।
पृ० ७९२

काठके — आग्रयणं तिसृणां धाराणामाग्रयणादन्तर्यामाच्चेति ।
पृ० ७९४

काठके—सदसि प्रस्तोत्रे दर्भान्प्रयच्छन्नाह सोमः पवत इति ।

पृ० ७९५

कठसूत्रे—स्तीर्णे दधिघर्मेण चरति यदि प्रवर्ग्यवान् पशुपुरोडाशेनेडान्तेन चरित्वा माध्यन्दिनीयैस्तुल्येन चरति माध्यन्दिनस्य सवनस्येति सम्प्रैष इति । पृ० ७९६

आग्नीध्रे हविर्यजर्त्विज इडां प्राश्नीयुर्यजमानश्च सवनीयशेषं भक्षयति पत्नी च पत्नीशालायां हविष्यं भुङ्क्ते कठसूत्रेऽत्र हविष्यं पत्नी भुङ्क्त इति ।

पृ० ७९८

प्रैषानुवाचनयोरन्यतरस्मिन्नाह प्रियेभ्यः प्रियधामभ्यः प्रियव्रतेभ्यो मह स्वसरस्य पतिभ्य उरोरन्तरिक्षस्याध्यक्षेभ्य इति । अत्र प्रेष्यानुब्रूहीत्येतयोः क्रियापदयोः प्रागेव प्रियेभ्य इत्यादीनामुच्चारणं कार्यमिति कर्कः । कठमैत्रसूत्रयोरेवमेव पठितमस्ति । पृ० ८०८

पत्न्या हविष्यस्याशनं पत्नीशालायाम् । पत्नी हविष्यं भुङ्क्त इति कठसूत्रेऽत्रापि सूत्रकरणात् । पृ० ८१३

काठके च—शलाकामुष्टींन्निहितानादीप्य विहरति यथापूर्वं जुह्वामष्टगृहीतं धिष्ण्येषु जुहोति प्रत्यङ्ङासीनो विभवे प्रवाहणाय स्वाहेत्यादीति ।

पृ० ८१५

काठके—होतृचमसमुख्यान्त्सर्वं सोममुन्नयत्याग्रयणध्रुववर्जमल्पं होतृचमसे स्तोत्रमुपाकरोतीति । होतृचमसे ध्रुवस्यावकाशं कृत्वेति

पृ० ८१७

पत्नी सदः प्रवेश्यापरेणोत्तरत उपविष्टामुद्गात्रा समीक्षयति प्रजापतिर्वृषासीति । एवमेव काठकेऽपि । पृ० ८१८

प्रभुज्य जानुनी प्रत्युह्य वसनान्तान् कमण्डलुनेति काठके । पृ० ८१८

काठके—एवा न इति सकृदुक्तायां होतृचमसे ध्रुवमवनयति प्रत्यङ्ङासीन इति ।

पृ० ८१८

काठके तु—द्विरिष्ट्वा होतर्युन्नेतर्युपहवमिच्छन्ते सर्वे धाना असम्भिन्दन्तो निर्धीय प्रक्षाल्याचम्योत्तरवेद्यां निवपेयुरिति । पृ० ८२१

अग्नौ शकलान्यादधातीति काठके। पृ० ८२२

कठमैत्रापस्तम्बसूत्रोक्ता अवभृथेष्टिगता विशेषा वरुणप्रघास उक्ताः।
पृ० ८२६

काठके—पत्नीशाले प्रायणीयस्य निष्काषमुदयनीयमभिनिर्वपतीति।
पृ० ८२७

काठके—आमिक्षा वा स्यात्तूष्णीमुपचरिताज्यभागप्रभृतीडान्ता सन्तिष्ठत इति। पृ० ८२८

काठके—शालामुखीयोत्तरवेदिकौ पृथक्समारोप्य यो वा पत्नीशाले विहारः सञ्चरेण निष्क्रम्याष्टाकपालमुदवसानीयं निर्वपतीति। पृ० ८२६

लौगाक्षिः—शुचिर्वाग्यतः शीली स्यान्नायज्ञियां वाचं ब्रूयाद्यदि ब्रूयाद्वैष्णवीमृचं यजुर्वा जपेदपि वा नमो विष्णव इत्येव ब्रूयादिति।
पृ० ८३४

लौगाक्षिः—अग्नीषोमयोः सन्नयोः सञ्चरेण प्रविश्यापरेण हविर्धानं दक्षिणा परिक्रम्य दक्षिणतोऽग्नेरनन्तर उपविशत्यत्रासीता मार्जनाद्धुतायां वपायां यथेतं प्रत्येत्य चात्वाले मार्जयित्वापरेणोत्तरवेदिं दक्षिणा परिक्रम्य यथास्थानमुपविशत्येषोऽत ऊर्ध्वं सञ्चर इति। पृ० ८३६

लौगाक्षिसूत्रे विशेषः—सवनीयासु प्रपद्यमानास्वनुप्रपद्येतापरेण दक्षिणं हविर्धानं दक्षिणा परिक्रम्य दक्षिणतः सोमस्यानन्तर उदङ्मुख उपविशत्यासीता सर्पणात्सर्पणकाले मैत्रावरुणमन्वारभ्य निःसृत्येति।
पृ० ८३६

कठसूत्रे—ब्रह्मन् स्तोष्याम इत्युक्ते रश्मिरसीत्यनुवाकस्तोमभागाः प्रतिमन्त्रं देव सवितरित्यनुषङ्गस्तेषामेकैकं स्तोत्रेषु द्वादशाग्निष्टोमे पञ्चदशोक्थ्ये षोडश षोडशिन्युत्तरे द्वादश रात्रिपर्य्यायेषु उत्तरे त्रयो राथन्तरे सन्धौ नाप्तोर्याम्एयूर्ध्वमाश्विनान्न वाजपेयस्यातिरिक्तस्तोत्रे यथाब्राह्मणोक्तमेवात्रानुज्ञानमिति। पृ० ८३७

सर्वस्मिन्नपि राजसूये भार्गव एव होतेति कठमैत्रसूत्रयोरस्ति।
पृ० ८७५

तेषामहीनानां मध्ये आम्नानादतिरात्रान्नवसप्तदशादीन् वक्ष्यमाणांस्त्रयोदशसंख्यानहीनधर्मकानेके इच्छन्ति । अन्य एकाहधर्मकानतः कठमैत्रादिसूत्रेषु एकाहमध्य एव त्रयोदशातिरात्राः सूत्रिताः । पृ० १०१७

KĀTYĀYANA SRAUTASŪTRA VYĀKHYĀ*

CHAPTER 19.

तथा च काठके—सौमिक्या वेदितृतीये सौत्रामण्या यजेत इति श्रुतेः। परस्याच्चू या रज्जुः पार्श्वः पादमात्री तिर्यक् तस्याद्दणाया रज्जुः प्रक्रम-स्थानीया भवति तुल्यं सौमिक्या विधानमिति सामान्येनैवंविधस्यैव प्रक्रम-स्योपदेशात्। पृ० ७

पाणिना कार्यं श्रीतं पाणिनोपमृज्य सादयतीति कठसूत्रम्।

पृ० १०

तदुक्तं कठसूत्रे—श्रीतं श्येनपर्णेनोपसृज्य सादयतीति। पयोग्रहणं तु पाणिना इत्युक्तम्। पृ० १२

काठके विशेषः—सह पशूनुपाकरोत्याश्विनमजं सारस्वतीं मेषीमैन्द्रमृषभं वा वृष्णिं वेति। पृ० १३

---

* This portion of the Vyākhyā of Devayājñika is not yet published. For this I have depended on the Ms. No. 6520, Punjab University Library, Lahore.

KATYAYANA ŚRAUTASUTRA VYAKHYA*

CHAPTERS 20-21.

तथा च काठके — त्रयाणां च वपा आस्तीर्णाभिघारिताः कृत्वा प्रजापतयेऽश्वस्य तूपरस्य गोमृगस्य वपानां मेदस इति संप्रैषौ हुतासु राजते न द्रोणकलशादुत्तरं महिमानं गृह्णाति यः प्राणतत्प्रस्तस्य[1] ते पृथिवी महिमेति हुत्वा प्रतिप्रस्थाता इतरेषां वपा उपस्तीर्णाभिघारिताः कृत्वा जुह्वां पर्यस्यन्ति[2] विश्वेभ्यो देवेभ्यश्छागानां छागानां मेषाणां मेषीणामुस्तीणा[3]-मुस्रियाणां वपानां वपानां मेदस इति संप्रैषाविति । २०. ३३.

तथा च काठके — राजा सर्वस्वं दत्त्वा अरणी आदाय वानप्रस्थं गच्छेदिति हि विज्ञायत इति । २१. ३.

---

* Cf. Mss. No. 6521. and 6522., Punjab University Library, Lahore.

1 So Ms. This may be read यः प्राण-तस्तस्य ते पृथिवी. Cf. यः प्राणतो निमिषतो etc. KSA. 5. 13; VS. 23. 3; AV. 4. 2. 2; and तस्य ते पृथिवी महिमौषधयो KSA. 5. 13.

2 So Ms.

3 So Ms. May be उस्त्रियाणा॰

KĀTYĀYANA ŚRAUTASŪTRA VYĀKHYĀ*

CHAPTER 22.

अन्यत्र वचनादिति । अतः छन्दोगसूत्रमानवसूत्रयो[1]र्विशेषवचनादहीनानां पौर्णमास्यामारम्भो भवति। अत एव कठमैत्रादिसूत्रेषु एकाहमध्ये एव त्रयोदशातिरात्राः सूत्रिताः । पृ० २

काठके — तिस्रः पराचीरुपसद उपयन्त्युपसदन्तरालेषु संमीलयन्ति प्रथमायां संस्थितायां यूपकर्मेति । पृ० २०

कठसूत्रे — महारात्रे वाग्यतस्याग्निहोत्रं हुत्वा योजनमात्रेभ्य ऋत्विजः समावहन्ति पुरस्तादध्वर्युं दक्षिणतो ब्रह्माणं पश्चाद्धोतारमुत्तरत उद्गातारमश्वरथैः सक्षीरद्रुतिभिस्ततो यन्नवनीतमुदियान्मदाज्ये कुर्यादूढेषूद्यन्तमादित्यमुपतिष्ठते आदित्येभ्यः सद्यः सुत्यां प्रब्रवीमि मित्रावरुणाभ्यां वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यः सौम्येभ्यः सोमपेभ्यो ब्राह्मणाय दीक्षयनमिति षट्स्थूणायां दीक्षितशालायामग्नीन् विहृत्य रुक्मं निधाय सप्तहोत्रान् हुत्वा तुल्यमावाचो यमनाद्वाथ तस्य सनिं प्रहिणोमि प्रायणीयं वहन् निर्वपति तुल्यमोपसदस्तस्य हविष्कृता चावविसृजते धेन्वा राजानं क्रीणात्यजं हिरण्यं वाधिकं ददाति त्रिहायनेन साण्डेनेत्येके तिस्रः पराचीरुपसद उपयन्त्युपसदन्तरालेषु संमीलयन्ति प्रथमायां संस्थितायां यूपकर्म मध्यमाय संस्थितायां-तुल्येन सोऽन्नस्वेदिकायां गवोर्वरायां वेदिं मिमाय मध्य उखे द्यां

* Cf. Ms. 6523. Punjab University Library, Lahore.

1 Ms. छन्दोगसूत्रमानवसूत्रं मानवसूत्रमानवसूत्रयोः

यूप्यं निहत्य तस्मिंस्तन्त्रीं बद्ध्वा ताननडुहो बद्ध्वा प्रदक्षिणं पर्याणयन्ति मृक्षितेषु प्रवृह्य यूप्यं यवैलायां तमुत्तरवेद्यां कृत्वा खलेवाल्या कृतं कलापि-चषालं यूपं कुर्वतीत्येक उत्तमायां संस्थितायामग्निप्रणयनादितुल्यामास्थरूपो-हणात् स्तरणकाले प्राचो यवान् प्रश्रयति यवा बर्हिर्भवति[1] दर्भैः पृष्ठ्यां स्तृणाति स्वर्वन्तं कृत्वा कुम्भाद्वसतीवरीर्गृहीत्वा सादयित्वा श्यावश्यास्व-श्या[2] तुल्यायं वसतीवरीः परिहरतीध्माबर्हिः संनह्य तुल्यमाश्विनस्य ग्रहणा-दाश्विनं गृहीत्वा सह पशूनुपाकरोत्यग्नीषोमीयं सवनीयं सवनीयं मैत्रावरुणीं वशामनूबन्ध्यामग्नीषोमीयस्य स्थानेऽग्नीषोमीयं पुरोडाशं निर्वपेदनूबन्ध्यायाः स्थाने मैत्रावरुण्यामिक्षया यजेत दक्षिणावेलायामश्वं शावं रुक्मावद्धं ब्रह्मणे ददात्याङ्गिरसो ब्रह्मा नीयमानायाः सयीः सामभिरुपतिष्ठते द्वादशं तु सर्वेभ्य-स्तुल्यमनूबन्ध्यायाः शूलकर्मानस्तमितेऽवभृथं यन्तीति ॥ पृ० २७

कठसूत्रे — व्रात्यं चरित्वा चरिष्यन्तो व्रात्यस्तोमैरग्नीन् समोप्य शुद्ध्यर्थाः सह यजेरन्निति ॥ पृ० २७

कठसूत्रे विशेषः — चातुर्मास्यानां सोमानां ब्राह्मणोक्ताः कामा वैश्वदेव-स्थाने वैश्वदेवोऽग्निष्टोमः फाल्गुन्यां पौर्णमास्यां दीक्षेत तस्यापरपक्षो दीक्षा वैश्वदेवः पशुर्न वैश्वदेवे यूपोत्तरवेदीपरिधौ पशुं नियुञ्जन्ति बार्हस्पत्यानूब-न्ध्या सर्वत्राहतं वसानोऽवभृथादुदेत्य ब्रह्मचारिव्रतो भवत्यासमापनाद्वरुणप्र-घासस्थाने द्विदिव आषाढ्यां पौर्णमास्यां दीक्षते तस्य द्वादशामीक्षास्तिस्र उपसदस्तस्याग्निष्टोमः प्रथममहर्मारुतः पशुः पशुरुत्थ्यो[3] द्वितीयं वारुणः पशु-र्मैत्रावरुण्यनूबन्ध्या साकमेधस्थाने साकमेधस्त्र्यहो यथा द्विदिवस्यैवं दीक्षोप-सदः कार्त्तिक्यां पौर्णमास्यां दीक्षते तस्याग्निष्टोमः प्रथममहराग्नेयः पशुरुत्थ्यो[4] द्वितीय ऐन्द्राग्नः पशुरतिरात्रस्तृतीयः प्राजापत्यः पशुरैकादशिना वा सौर्यनू-बन्ध्या शुनासीरीयस्थाने शुनासीर्योऽग्निष्टोमो यथा वैश्वदेवस्यैवं दीक्षोपसदो वायव्यः पशुराश्विन्यनूबन्ध्या । चातुर्मास्यानां सोमानामाग्नावैष्णव्या वश्वानरपार्जन्येष्ट्या वैश्वदेवोऽग्निष्टोमः प्रातःसवनीयान् वैश्वदेवहवींष्यनुप्रव-

1 So Ms.
2 So Ms.
3 So Ms. ०रुक्थ्यो ?
4 So Ms.

र्तेरन् पुरस्ताद्धार्योतनस्य वाजिनमुन्नीय सदसि वाति न भक्षेण भक्षयित्वा हार्योजनमुन्नयन्ति वरुणप्रघासेषु मारुतीसप्तमानि पूर्वस्याह्नः प्रातःसवनीयाननुप्रवर्तेरन् पुरस्तात् सम्मार्गाणां करम्भपात्राणि वारुण्यैलकपालश्चोत्तरस्याह्नः प्रातःसवनीयाननुप्रवर्तेयातामवभृथे निष्काषस्यैककपालेन सहावद्यति स्विष्टकृतं वा ततः कुर्वति साकमेधेष्वनीकवती पूर्वस्याह्नः स्यान्न प्रातःसवनीयाननुप्रवर्तेत सान्तपनिर्माध्यन्दिनीयान् परिहृतासु वसतीवरीषु गृहमेधीयेन चरन्ति पुरस्तात्प्रातरनुवाकस्य दर्विहोमेनाक्रीडिनीं प्रातःसवनीयाननुप्रवर्तेत महाहविर्माध्यन्दिनीयांस्तृतीयस्याह्नः पुरस्तात् सौम्य[1] परीज्याया आग्नीध्रीयं मार्जालीय आपाद्य तस्मिन् पितृयज्ञेन चरन्ति केवलवेदिः पितृयज्ञो भवति पुरस्तादवभृथस्य त्रैयंबकैर्व्रजन्ति उदवसानीयेन सह आदित्यया शुनासीर्येऽग्निष्टोमे प्रातःसवनीयाच्छुनासीर्यहवींष्यनुप्रवर्तेरंश्चातुर्मास्यानां सोमानामन्वहं पञ्चाशतं पञ्चाशतं दक्षिणा ददाति द्वादशशतं शुनासीर्ये ॥ पृ० ५८

काठके — ऋतपेयेन स्वर्गकामः फाल्गुनिकस्य घृतस्य चतसृभिरङ्गुलिभिरुपादत्ते तावद्दीक्षासु व्रतमुपसत्स्वङ्गुल्यपचयस्तनस्थाने भक्षयति प्रचार्य भक्षांस्त्रिः सत्यमुक्त्वा सदः प्रसर्पन्ति माध्यन्दिनीयानन्वौदुम्बरं चमसमुन्नीय तस्मिन् स्वल्पं दक्षिणाकर्म कृत्वा सञ्चरेण हुत्वा तं सगोत्राय ब्रह्मणे ददाति । अंशूनां वा वाससं पूरयित्वा तेन ब्रह्मा यजेत यदि ब्रह्मा यजेत यजमानोऽस्मै द्वितीयां दक्षिणां दद्यादिति ॥ पृ० ६७

कठसूत्रेऽपि — गर्भिणीनां धेनुशतस्य वत्सानपाकरोति प्रातःसवने संपूतं सोमं त्रयस्त्रिंशता दुग्धेनेत्येवमादि मानववत् । [मानवसूत्रम् — धेनूनां[2] गर्भिणीनां गर्भिणीनां शतमाशिरे दुहन्ति ता एव दक्षिणास्तासामुपवसथे चतुस्त्रिंशतां दधि करोति प्रातःसवने उपधाय कपालानि षड्टष्टिं[3] दोहयत्यर्द्धं श्रपयति संपूतं राजानं ग्रहांश्च प्रतिदुहा परिषिञ्चति शृतेन माध्यन्दिने दध्ना तृतीयसवन इति]

1 So Ms.
2 Not found in the printed Mss.
3 So Ms. षच्छष्टिं ?

छन्दोगसूत्रम् — पूर्वे वयस्युच्चावचान् याजयित्वोपनीय वा तेभ्यः समावर्त्स्यन् पुनस्तोमेन यजेत[1] । उच्चा उत्कृष्टाः । अवचा अपकृष्टाः । पूर्वे वयस्युच्चावचान् याजयित्वोपनीय[2] वा तेभ्यः समावर्त्स्यन्[3] अधमाः[3] तानेवंविधान् यागोपनयनयोग्यतारहितान् याजयित्वा तेभ्यः समावर्त्स्यन्निवर्तयिष्यमाणः । काठके पुनस्तोमेनाप्रतिग्राह्यं प्रतिगृह्येति ॥ पृ० ७४

काठके च — पूर्वश्चतुष्टोमोऽन्तरुक्थ्यस्तस्मिन्नग्निष्टोमचमसानुन्नीय त्रिषु पात्रेषूक्थ्यं विगृह्य तैः सह प्रचरेदिति । पृ० ७५

काठके — इन्द्राग्न्योः कुलायेमाग्नीन्त्समारोप्य राजन्यपुरोहितौ सायुज्यकामौ पूर्वः पुरोहितो नाना यजमानचमसो अन्योन्यस्मिन्नुपहवमिच्छमानौ भक्षयित्वा ऋत्विग्घुत्वैन्द्र ऋषभ उपालभ्य ऋषभाणां द्वादशशतं दक्षिणा नानोदवसानीये इति ॥ पृ० ८०

---

1 Lāṭyāyana Śrautasūtra 9. 4. 5.

2 पूर्वे वयसि उच्चावचान् याजयित्वा उपनीय वा तेभ्यः समावर्त्स्यन् निवर्तयिष्यमाणः पुनः स्तोमेन यजेत ॥ इति अग्निस्वामी.

3 So Ms. May be अवचा अधमाः

4 So Ms.

KATYAYANA ŚRAUTASUTRA VYAKHYA*

CHAPTER 25.

तदुक्तं कठसूत्रे — प्राक्कालावकृतं कर्म नावर्तयेदन्तरितं प्राक् समापनात् कुर्यादिति । पृ० ४

काठके च — मन्त्रान्तरे कर्मविपर्यासे त्वं नो अग्न इति द्वाभ्यां जुहुयादिति । पृ० ५

काठके — उन्नीतमवघृष्टं मित्रो जनानिति समिधमाधाय तद्धुत्वाथान्यां दुग्ध्वा पुनर्जुहुयात् । अग्निहोत्रमुन्नीतं कीटावपन्नं हिरण्यगर्भ इति वपायामवनीयान्या दुग्ध्वा पुनर्जुहुयात् । तथा यदि सकृदुन्नीतं स्कन्देत द्विस्त्रिर्वा न तदाद्रियेत । यद्यु वै चतुर्थमुन्नीतं स्कन्देत् स्थाल्यां शेषमवनीय चतुरभ्युन्नीय होतव्यमन्यथा वाभिदोह्यमिति ॥ पृ० १०

काठके — अग्नये पथिकृतेऽष्टाकपालं पुरोडाशं यस्य पौर्णमासी वामावास्या वातिपद्यते न्यूनोदयनेन पौर्णमास्यतिपत्तौ यश्चादर्शनेनामावास्या प्रक्रान्तावेदतिपत्ति[1] विद्यादाग्नेयमेवाग्नये पथिकृते कुर्यात्तस्या याज्यानुवाक्ये वेच्छाहीति द्वे तुल्या सन्तिष्ठत उभयातिपत्तौ चतुर्होत्रा हुत्वान्वारम्भणीयाभिरिष्ट्वा पुनर्दर्शपूर्णमासा आवृतेति ॥ पृ० ६६

अत एव द्विरात्राय त्रिरात्रायाधिकाय वा ।
समस्य जुहुयाद्धोमानित्येवं पठ्यते कठैः ॥

* Cf. Ms. 5621, Punjab University Library, Lahore

1 So Ms. प्रक्रान्तौ चेदतिपत्तिं ?

कठैः पत्नद्वयं त्वेव पत्नहोमे नियम्यते ॥ पृ० ७४

तथा च काठके — व्रतोपेतोऽव्रतं चरन् व्रातपतीं कुर्यादिति पृ० ७८

काठके विशेषः — यस्याग्निमपहरेयुरग्नौ वान्यया जपेदन्यस्य वाग्निषु यजेताग्नये संवर्गायाष्टाकपालमिति । पृ० ८६

लौगाक्षिसूत्रे — अग्न्यगारेषु दग्धेष्वन्येषु चाग्नये क्षामायाष्टाकपालन्निर्वपेदिति ॥ पृ० ९२

काठके — सान्नाय्येऽपाकृतासु धीतासु वायव्यां यत्रागूं श्व आमावास्येन यजेतोभयीषु धीतासु शुद्धेष्वामावास्येन यजेतार्त्तिगते[1] सायं दोह इन्द्राय व्रीहीन्निरुप्योपवसेच्छ्व ऐन्द्रः पुरोडाशस्तस्य पयसा समवदाय प्रवरेच्छ्व आमावास्येन यजेतार्तिं गते प्रातर्दोह ऐन्द्रं पुरोडाशं तस्य दध्ना समवदाय प्रवरे आमावास्येन यजेतोभयोरार्तिं गतयोरोदनं पञ्चशरावं निवपदाग्न[2] देवतानां प्रथमं यजेदथैन्द्रं श्व आमावास्येन यजेत सान्नाय्यं कीटावपन्नं मही द्यौरिति मध्यमपर्णेनान्तः परिनिनयेदाज्येन वा संस्थापयेदसंस्कृते च सान्नाय्येनेत्येव इति ॥ एवमेवापस्तम्बसूत्रेऽपि विद्यते ॥ पृ० ११३

शवाग्नयो वा एते ये पत्न्यां मृतायां धार्यतें[3] इति कठश्रुतेः ॥ पृ० १४२

तत्कठसूत्रादिष्वप्यस्य वैश्वानरस्यैतेष्वेव निमित्तेषु
द्वादशकपालस्य दर्शनान्निर्मूलमिति नादरणीयम् ॥ १७२

कर्कमते शाखान्तरसूत्रेषु च मेषमेष्योरपि पयस्यावद्यागासाधनः[4] ॥ १८०

काठके — यूपविरूढाः सत्त्रिणस्त्वाष्ट्रमालभेरन् प्राक् स्विष्टकृतो श्वग्न इति द्वाभ्यां जुहुयादुत्तरया यूपमूलं परितापयेदुत्तरया यूपविरूढानि जुहुयादिति ॥ पृ० २०७

तथा च लौगाक्षिः — सदस्यभ्युपाकृते चमसेऽतिरिक्ते हिरण्यगर्भ इति द्वाभ्यां जुहुयादिति ॥ पृ० २०८

काठके — हुताहुतौ सोमौ पीतापीतौ वा संगच्छेयातां यज्ञस्य हि स्थ इति द्वाभ्यां बहिष्परिध्यङ्गारान् दक्षिणापो ह्यहुतस्य चेति जुहुयादिति ॥ पृ० २०९

1 So Ms. आर्त्तिं गते ?
2 So Ms. अग्निं ?
3 So Ms. धार्यन्त ?
4 So Ms. यागसाधनत्वात् ?

कठसूत्रे—हविर्दुष्टमपोऽवनयेत् सोमं दुष्टं मनसा प्रजापतये स्वाहेत्यभक्ष-णीयानुपरवेष्ववनयेदिति दुष्टस्य च पुनरुन्नयनं कार्यम्। अत्र होमोऽधिषवण-फलके उह्य कर्तव्यः। काठके दर्शनात्। पृ० २१०

काठके च—नाराशंसे सर्वस्कन्ने यमनुभक्षयन्ति तं महति पात्रे गृहीत्वा प्रचर्य[1] भक्षयित्वाप्याययेदुच्छिष्टाच्चेज्जुगुप्सीतोपामासेकमासिच्य[2] भक्षयित्वा-प्याययेद्यदि बहवो नाराशंसाः सर्वत्र स्कन्नाः स्युरेवमेव कुर्यादिति॥ पृ० २११

अत्र काठके विशेषः—द्रोणकलश उपदस्त आग्रयणाल्लेपमाहृत्य हिरण्यमन्तर्द्धायासिच्य पूतभृतो हिरण्यमन्तर्द्धाय ग्रहानुन्नयेदिति॥ पृ० २१२

तथा काठके—ग्रहानुपदस्तानाग्रयणाद् गृह्णीयाद् ग्रहेभ्यो वाग्रयणं सर्वस्कन्ने नष्टे दुष्टे वा पुनः संस्करणमनादेश इति॥ पृ० २१२

तथा च—सर्वस्कन्ने नष्टे दुष्टे वा[3] यथापूर्वं पुनः संस्करणम[4]नादेश इति सर्वग्रहचमसादिसाधारण्येनोक्तं कठसूत्रे। पृ० २१३

काठके—ग्रावणि[5] शीर्णेऽन्यं प्रयुज्योद्गातॄन्[6] ब्रूयाद्युतानस्य मारुतस्य[7] साम्ना स्तुध्वमिति॥ पृ० २१५

अत्र काठके विशेषः—सोमे दग्धे सोमाङ्गे वा यथापूर्वं पुनः संस्करणं सौम्येऽहनि[8] सोमे दग्धे कृतान्तान् ज्ञात्वा ग्रहानध्वर्युः स्याशये[9] स्तोत्राण्युद्गाता शस्त्राणि होता यथापूर्वं यज्ञेन चरेयुः[10] पञ्च वरान् दद्यात्तेषु दक्षिणाकर्म क्रियेता-वभृथं गत्वा पुनरुदेत्य पुरा द्वादश्याः पुनर्दीक्षेत यदि द्वादशीमतिनयेदन्तर्द्धी-[11]येत प्रायश्चित्तकर्मेत्याचार्या उत्तरस्मिन् पक्षे यजेतेति लौगाक्षिस्तत्र ता दक्षि-

1 MS. प्रवर्य, but cp. Mantra Bhāṣya of Somānanda Sūnu (a manuscript work mentioned in Catalogue of Jammu Sanskrit MSS. p. 253; MS. No. 326. 2675 Kha) which reads प्रचर्य. (p. 108).

2 So MS.; but cp. Mantra Bhāṣya which reads जुगुप्सितायामा– (p. 108).

3 So MS; but cp. Mantra Bhāṣya (p. 109) सर्वस्कन्नेन पुष्टे दुष्टे वा

4 So MS., but cp. op. cit. (p. 109) पुनः संस्कारमनादेश.

5 So MS; but cp. op. cit. (p. 160) ग्राव्णि.

6 So MS; cp. Mantra Bhāṣya (p. 160) –गातॄ ब्रूयाद्युता–

7 So MS; Mantra-Bhāṣya (160) मारुतस्य ब्रह्म साम्ना

8 Mantra Bhāṣya (p. 122) सौत्ये

9 So MS. and Mantra-Bhāṣya

10 Mantra-Bhāṣya च देयुः

11 Mantra-Bhāṣya दशीमति न देयं तद्धीयेद–

णा दद्याद्याः पूर्वस्मिन् दास्यन् भवति नीतासु[1] चेद्वरानेव दद्यात् । प्राक्-सौत्यां[2] सोमे पञ्च वरान्दद्यात्तत्र पुनर्यज्ञेऽहर्गणो सोमे दग्धे पञ्च वरान् दद्यादे-कस्माद् द्वे संपश्येदन्तरेणाहवनीयं[3]सोमे दग्धे पञ्च वरान् दद्यान्नात्रैकस्माद् द्वे संपश्येदिति[4] ॥ पृ० २४२

---

1 Mantra-Bhāṣya नीतसु चरानेव

2 Mantra-Bhāṣya सोत्या

3 Mantra-Bhāṣya –ये सोमे

4 Mantra-Bhāṣya स पश्यति

P. 32, l. 11 (note): correct निवपदग्नदेव– into निर्वपेदग्निं देवतानां प्र– according to Mantra-Bhāṣya p. 63

P. 32, l. 11 : correct प्रवरे आमा into प्रवरेच्छ्र आमा according to Mantra-Bhāṣya p. 63

P. 32, l. 12 : यजेदथैन्द्रं श्र is read in Mantra-Bhāṣy as यजेदप्ययेन्द्रं श्व

P. 32, l 13 : MS. पर्णेनान्तः परिनि–; Mantra-Bhāṣya has पर्णेनान्तः परिधिनिन–

P 32, l. 13 : नेत्यव: Mantra-Bhāṣya –नेत्येक–

P. 32, l. 24 MS. हि स्व; Mantra Bhāṣya हि ह p. 107.

P. 32, l. 25 : MS. बहिष्परिध्यङ्कारान्……इति Mantra Bhāṣya बहिष्परिध्यङ्कारे शेषं निनये-दिति p. 107.

KATYAYANA-ŚRAUTA-SŪTRA-VYAKHYA[1]

CHAPTER 26.

॥ अग्निहोत्रावृता हुत्वा वाजिनवद् भक्षयन्ति मधु हुतमिति ॥

तदुपयन्यामानीतं घर्ममग्निहोत्रावृता अग्निहोत्रहोमवत् मंत्रसहितया तदितिकर्तव्यतया हुत्वा वाजिनवत् सोपहवं भक्षयन्ति मधु हुतमिति मंत्रेण। अत्र च होममात्रमग्निहोत्रवत् कार्यम्। न तु संचराचमनादिका सर्वेतिकर्तव्यता। यदि तदभिमतमभविष्यत्तदाग्निहोत्रं हुत्वेत्येवमेवावक्ष्यत् आधानकौण्डपायिनामयनवत्। अत्र त्वग्निहोत्रावृतोपयमनीस्थं द्रव्यं हुत्वेत्येतावदेवोक्तम्। अतस्तस्य द्रव्यस्य समिदाधानपूर्वक आहुतिद्वयहोमः कर्तव्यः। न प्राचीनोदीचीना अन्यान्यङ्गानि। तथा चाहापस्तम्बः। अपीपरो माह्नोरात्र्यै मा पाह्यजीरिति सायं समिधमादधाति। अपीपरो मा रात्र्या अह्नो मा पाहीति प्रातरग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायमग्निहोत्रं जुहोति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः संसृष्टहोमं वा इति। एवमेव कठसूत्रेपि ॥

पृ० २०

एवं प्रतिप्रस्थाताजां मयूषे तूष्णीमेवमेव प्रतिप्रस्थाता तूष्णीमजां दोग्धि। इयांस्तु विशेषः। मयूषे कीलके अजां बध्नाति। तत्र तूष्णीं पाशप्रतिमोकः। मयूखे बन्धनं वर्करोत्सर्गः। संदानं वर्करोन्नयनम्। पिन्वने दोहनम्। विप्रुषां विलोकनं स्तनालंभनमिति। केचिदनुपयोगाद्वर्करं संदानं च नेच्छन्ति तद-

1 Cp. MS. No 6525, Panjab University Library, Lahore.

2 Cp. TA. 4. 10. 4; 5. 8. 10; ApŚ. 15. 12. 7; MSS. 4. 3. 33; 46.

युक्तम् । आपस्तम्बकठसूत्रादिषु वर्करस्य साक्षात्पाठात् ।। एवंशब्देन कात्यायनेनापि संगृहीतत्वात् ।। पृ० २१

कठसूत्रे विशेषः—

श्वश्चरिष्यन्प्रवर्ग्येण पूर्वेद्युर्वत्सवर्करौ ।
अपाकुर्यात्तथा प्रातः सायं वोत्सृज्य धेनुके ।।
नाशे घर्मदुहो धेन्वा व्रतधेनुं दुहेत्ततः ।
घर्मायार्द्धव्रता दुह्याद् द्वौ द्वौ स्तनाविह ? ।।
घर्मव्रतदुहोर्नाशे आज्येन प्रचरेद् द्विजः ।
अजानाशे तु गव्येनान्यां वा धेनुमानयेत् ।।
सर्वनाशे घृतादुग्धं पयो वा दधि वानयेत् ।। पृ० २१

अश्विना घर्ममिति ब्रह्मानुमन्त्रयते। ततो ब्रह्मा अश्विना घर्ममिति मन्त्रेण घर्ममभिमन्त्रयते । अथ ब्रह्मानुमन्त्रयते ब्रह्मा वा ऋत्विजां वा भिषक्तम इति श्रवणात् । ऋतं द्रव्यमिति कर्कः । पात्रस्थमित्यन्ये । उभयमथैतत्समूलम् । शाखान्तरात् । विश्वा आशा इति ब्रह्मा ऋतमनुमन्त्रयत इति काठके ।
पृ० २३

तथाहापस्तंबः—उपर्याहवनीयेध्मर्यमाणं (?) प्रतिप्रस्थाता शृतदध्ना पूरयतीषे पिपीह्यूर्जे पिपीहीति विक्षरन्तमभिमन्त्रयत इति । काठकेऽपि इषे पिन्वस्वेत्यौष्ठीभ्यां महावीरमथाप्येति ।। पृ० २४

APPENDIX

REFERENCES TO KĀṬHAKA-GṚHYA.

I. REFERENCES TO KAṬHA IN MANTRA-BHĀṢYA[1]

(a) तत्र या सहैव कृताधाना पत्नी सा ज्येष्ठायां जीवत्यामपि सर्वाग्निभिर्दाह्या शवाग्नयो वा एते ये मृतायां पत्न्यां धार्यन्त इति कठश्रुतेः ॥

पृ० ८५

(b) ध्रुवावनयविस्मरणे कठसूत्रे प्रायश्चित्तम् । ध्रुवं ते प्राप्तकाले नावनयेत् पुनर्यज्ञायज्ञीयमुपाकुर्यादिति उद्गाता चेन्निकामयेत होतारं ब्रूयाच्छंसैव स्तोत्रीयां परिधानीयां चेति तत्र तत्रैवमवनयेत बहूनि चेत्स्तुतशस्त्राणि समतीतानि स्युरेवमेव कुर्यादिति ॥ पृ० १०९

W. Caland, Altindischer Ahnencult pp. 212-214.

अमावास्यायां पिण्डपितृयज्ञः प्राग् अग्न्यन्वाधानाद् उत्पूयापोऽन्वाहार्यपचनेऽधिश्रयति प्रक्षाल्य तण्डुलान्पवित्रान्तर्हितान् आवपति प्रक्षाल्य मूलतो मेक्षणमवदधाति । शृतमभिघार्य दक्षिणत उद्वास्य दक्षिणतः कर्षूं खात्वा तस्य दक्षिणतः खरम् । तस्मिन्दक्षिणाग्नेरग्निं प्रणीय कर्ष्वामुदकं निनीय सकृदाच्छिन्नान् दक्षिणाग्रान्दर्भानास्तीर्य मेक्षणेन स्थालीपाकस्य जुहोति । सोमाय पितृमते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नम इत्युद्धृत्य पिण्डान् निदधाति । पित्रे पितामहाय प्रपितामहायैतत्तेऽसौ च ये च त्वान्विति पितृनामानि गृह्णन्न नाम गृह्णीयादिति पौत्रो बन्धुज्ञाने यथा ब्रह्मणोक्तमत्र पितरो मादयध्वमित्युक्त्वानुप्रहृत्य मेक्षणमुदङ्ङासीतोदूष्मस्वावृत्य निह्नुते नमो

1 MS. No. 326, 2675 Kha mentioned in Catalogue of Jummu Sanskrit MSS. p: 253.

वः पितरो जीवन्तो भूयास्मेति पिण्डशेषमुद्धृत्यावजिघ्रया ते अग्न इति दक्षिणाग्निं गत्वा तस्मिन्तसमिधमाधायावृत्य जपति मनो न्वाहुवामह इति तिस्रो यदन्तरिक्षमिति गार्हपत्यमवघ्रातं मध्यमं च पिण्डं पत्नीं पुत्रकामं च प्राशयेद् अरूरुचदुषस इति ।

अरूरुचदुषसः पृश्निरग्रिय,
उक्षा बिभर्ति भुवनानि वाजयुः ।
मायाविनो ममिरे अस्य मायया
नृचक्षसः पितरो गर्भमादधुः ॥
आ दत्त गर्भं कुमारं पुष्करस्रजम् ।
यथायं पुरुषोऽसद् ॥

इति मावैत्र शेषमवेक्षेतैवमनाहिताग्नेर्गृहाग्नौ पितापुत्रौ चेदाहिताग्नी स्यातां येभ्यः पिता तेभ्यः पुत्रो दद्यात् । पिता प्रेतः स्यात् पितामहो जीवेत् पित्रे पिण्डं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यात् द्वाभ्यां दद्यात् ॥

II. In Trikāṇḍa-Maṇḍana[1]

OR

I. Apastamba-Sūtra-Dhvanitārtha-kārikā

(a) तपोऽग्निहोत्रं यज्ञं वा सर्वं कुर्यात्कठाशयात ॥ I पृ० ७२

(b) कुशाभावे कठाः प्राहुः पर्वपल्लवदोषधीः ।
वरूकरत्तारकठक् परिध्यायकवर्जिताः ॥ II पृ० ८०

(c) पालाशः खादिरो बैल्वो यूपो रौहितकोऽपि वा ।
औदुम्बरो वा यूपः स्यादित्याहुः कठशाखिनः ॥ पृ० ८५

(d) अग्निहोत्रहवन्यत्र कार्या वैकङ्कती शुभा ।
पालाशी तु कठश्रुत्या तदभावेऽन्यवृक्षजा ॥ पृ० ८७

(e) आपस्तम्बोक्तवृक्षोक्ता भवेयुः क्रतुषु स्रुचः ।
शमीमय्योऽथवा भूर्जवृक्षमय्यः कठश्रुतेः ॥ पृ० ८८

1 Cp. Calcutta edition 1903 by Candra Kānta Tarkālaṅkāra.

(f) यद्वोभौ वारणौ कार्यौ तदभावेऽन्यवृत्तजौ ।
रौहीतकान् न्यग्रोधोत्थान् पालाशान् वा कठश्रुतेः ॥ पृ० ९०

(g) सर्वप्रतिनिधौ कार्यमनाज्ञातजपादिकम् ।
यद्वा प्रतिनिधानेनैवार्थसिद्धिः कठाशयात् ॥ पृ० १०८

(h) छिन्नं लूनं च पिष्टं च सान्वाय्यं मृन्मयं तथा ।
लोकसिद्धं गृहीतं चेन्मन्त्रा जप्याः कठाशयात् ॥

(i) अत एव द्विरात्राय त्रिरात्रायाधिकाय वा ।
समस्य जुहुयाद्धोमानित्येवं पठ्यते कठैः ॥ पृ० १७८

(j) प्रवासिनोऽग्निहोत्रस्य पञ्चाहं सप्त वा पुनः ।
सायं प्रातः पृथग्घोमा एकस्मिन्नहनीति च ॥
कठैः पक्षद्वयं त्वेव पक्षहोमो नियम्यते ।
आपच्चेदनुवर्तेत दीर्घकालं कदाचन ॥ पृ० १८६

(k) सर्वद्विरात्रहोमादावभ्यूह्यमिदमीदृशम् ।
कठा अप्येवमेवार्थमङ्गीकुर्वन्ति केचन ॥ पृ० २०२

(l) काले काले पुनर्होमान् जुहुयात्प्राग्घुतानपि ।
कठेष्वेवं विदुः केचिन्नेच्छन्त्यन्ये पुनर्हुतिम् ॥ पृ० २०४

(m) अग्निहोत्रं हुतं स्वामी प्रेषितो मन्यते यदा ।
अपोऽश्नीयादिति कठैर्होमः स्पष्टमनूदितः ॥

Prakīrṇa-Kāṇḍa. पृ० २२

III. In Trikāṇḍamaṇḍanaṭīkā

काठके च—वृद्ध्यै पुनराधेयमिति III. 12 पृ० १५९

IV. In Catur-varga-cintāmaṇi :—

कठसूत्रे तृप्तानाचमयित्वा यन्मे राम इति प्रदक्षिणं कृत्वा प्रत्येत्याभिरमन्तु भवन्त इत्युक्त्वा देवाश्च पितरश्चेत्यनुवाकशेषेणोपतिष्ठते ॥ पृ० १५०

V. In Saṃskāra-ratnamālā :—

अकाले चेत्कृतं कर्म भवेद्यत्तस्य नैव तु ।
क्रमार्थं पुनरावृत्तिरित्युक्तं कठसूत्रके ॥ Vol I. पृ० १००

VI. In Devapāla :—

एवं संमार्जनानन्तरं भूतमृतं च सत्यं चेत्येतद् ध्यानयुक्त आवर्तयेद् ध्यानयुक्त इति काठकश्रुतेः अघमर्षणसूक्तजपः कर्तव्यः। Vol I. पृ० ४८

तथा च तत्रत्यं सूत्रम्—पाणी प्रक्षाल्य दक्षिणतोऽग्नेस्तिष्ठन् ब्रूयादग्ने व्रतपते वायो व्रतपते सूर्य व्रतपते इति ॥ Vol II. पृ० ३९

VII. In Lp-Ṛcaka[1]

ओं अथ पर्वतन्त्रप्रधाननिर्णयः।

तथा च काठके। परिशिष्टे लौगाक्षिः—

स्थालीपाकमथैन्द्राग्नी संनिकर्षे यजेद् बुधः।
ततश्चतुर्गृहीतेन विष्णुश्चैव बुभूषितः॥

इत्यमावस्याम्।

अग्निषोमावुभौ स्थालीं पौर्णमास्यां तथव च।
तेजोऽसीति तथान्यं च युवा स्थालीं यजेत्।

इति पौर्णमास्याम्। ऋग्वेदवादिनः चैषां वैश्वदेवी विशिष्यते। न हि सर्वत्र यज्ञेषु।

तथा च काठकेयिनाम्—तथा च पर्वतन्त्रदेवताः।

त्रिभिस्त्रिभिर्देवताः स्युः प्रोक्तास्तु पर्वतन्त्रके।
एकैकमाज्यभोक्तारं द्वौ द्वौ स्थाली प्रकीर्तिताः॥

अथ साग्निकमृताहविषवाक्यानि :—

भर्तुः पश्चान्मृता नारी दग्धव्या लौकिकाग्निना।
यमाय चाग्निष्वात्तेभ्यो न निर्वापश्च जातुचित्॥
शुक्ले मृतेन या गोत्रं प्राप्तुं चेत्पर्व चोत्तमम्।
यागं समाप्य विद्वांश्च प्रातर्होमं पुनर्यजेत्॥
कृष्णपक्षे विपत्तौ तु दार्शं संपादयेत्पुनः।
पार्वणे चाग्निहोत्रे च समाप्यान्त्यं समापयेत्॥

इत्यग्निहोत्रविवेकः।

1 Lp. p. 150.

VIII In Ācāra-Ratna:—

तथा चाचारचन्द्रोदये काठकगृह्ये :—

अथ चेत्प्रमादान्न शिखा स्यात्तदा कौशीं शिखां ब्रह्मग्रन्थियुतां दक्षिण-कर्णे निदध्यादिति । पृ० ३

तत्रैव लौगाक्षिः—सायमेवाग्निमिन्धीतेत्येके इति । पृ० ५३

IX In Nirṇaya-sindhu :

तदुक्तं काठकगृह्ये—

यस्मिन्मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदशः ॥ पृ० ५१

काठकगृह्येपि :—

मलेऽनन्यगतिं कुर्यान्नित्यां नैमित्तिकीं क्रियाम् इति । पृ० ६०
सोमयागादिकर्माणि नित्यान्यपि मलिम्लुचे ।
षष्टीष्ट्याग्रयणाधानचातुर्मास्यादिकान्यपि ॥
महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत् ।
स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले ॥

इति काठकगृह्यात् ॥

षष्टीष्टिः काठकप्रसिद्धा पुत्रेष्टिः ।

कृष्णंभट्टव्याख्या पृ० ६१, ७५२

रविसंक्रमहीनो यो वर्ज्यावर्ज्यविधिः स्मृतः ।
स एव तु द्विसंक्रान्ते मलमासेऽप्युदीरितः ॥

इति काठकगृह्योक्तेः पृ० ७६

मघात्रयोदशीश्राद्धं प्रत्युपस्थितिहेतुकम् ।
अनन्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लुचे ॥

इति काठकगृह्योक्तेः पृ० ५६६

पूर्वाह्णे वाथ मध्याह्णे यदि पर्व समाप्यते ।
उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते ॥

इति लौगाक्षिवचनात् पृ० २४६

अपराह्णेऽथवा रात्रौ यदि पर्व समाप्यते ।
उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते ॥

इति लौगाक्षिणोक्तेः पृ० २४७

अत्र लौगाक्षिः—

तिथेः परस्ताद् घटिकास्तु याः स्युः
न्यूनास्तथैवाभ्यधिकास्तु तासाम् ।
अर्धं वियोज्यं च तथा प्रयोज्यं
ह्रासे च वृद्धौ प्रथमे दिने तत् ॥

पृ० २५५

सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि ।
स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैः ॥

इति लौगाक्षिवचनाच्च पृ० २६९

संपूर्णे दर्शे च विशेषमाह लौगाक्षिः—

पत्न्यान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः ।
पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥

पृ० २७७, १५६०

मदनरत्ने लौगाक्षिः—षष्ठेऽन्नप्राशनं जातेषु दन्तेषु वा इति ।

पृ० ९१३

अपरार्के, मदनरत्ने च लौगाक्षिः—दक्षिणतः कमुजा (कपूजा cp. LGS. P. 355) वसिष्ठानामुभयतोऽत्रिकश्यपानां मुण्डा भृगवः पञ्चचूडा आङ्गिरसो वाजिमेके मङ्गलार्थं शिखिनोऽन्ये यथाकुलधर्मं वा इति ॥

पृ० ९२२

सायमेवाग्निमिन्धीतेत्येके इति लौगाक्षिणोक्तेः　　　　पृ० ९६०

तत्रैव लौगाक्षिः—

हस्तद्वयमितं कार्यं वैश्वदेविकमण्डलम् ।
दक्षिणे च चतुर्हस्तं पितॄणामङ्घ्रिशोधने ॥　　　　पृ० १५२७

हेमाद्रौ लौगाक्षिः—

महालये गयायां च प्रेतश्राद्धे दशाह्निके ।
पिण्डशब्दप्रयोगः स्यादन्नमन्यत्र कीर्तयेत् ॥　　पृ० १६०८

काठकगृह्ये—यत्र प्राणोत्क्रमस्तत्रान्वहं बलिं कुर्यात् इति ।
पृ० २००३

X In Raṇavīra-vrata-ratnākara :—

कुर्यान्नित्यां नैमित्तिकीं क्रियाम् इति काठकगृह्ये पौषविधानात् ।
पृ० १३

काठकगृह्येपि—मघात्रयोदशीश्राद्धं प्रत्युपस्थितिहेतुकम् ।
अनन्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लुचः ॥ इति
पृ० २०

स एव तु द्विसंक्रान्तौ मलमासेऽप्युदीरितः ॥ इति काठकगृह्यवचनात् ।
पृ० २२

XI In Harihara on Pāraskara-Gṛhyasūtra 1. 2. (P. 22)

कठश्रुतिपक्षे तु न पक्षद्वयमेव पक्षहोमनियमः अपि तु आपदनुवृत्तौ यावदापन्निवृत्तिस्तावत्प्रतिपक्षमुक्तप्रकारेण निरन्तरं पक्षहोमान् समस्येदित्येकः प्रकारः, प्रकारान्तरं तु सायंकाले समिदाधानपर्युक्षणानन्तरमाहुतिपरिमाणं होमद्रव्यम् अग्नये स्वाहेति हुत्वा पुनस्तथैव सूर्याय स्वाहेति हुत्वा आहुतिद्वय-पर्याप्तं होमद्रव्यमादाय प्रजापतये स्वाहेति सकृज्जुहुयादिति सायंप्रातस्तनयोर्होमयोः समासं यावदापदमाचरेत् । यदा तु आपदो गुरुत्वं भवति तदा सायंहोमैरेव अनेन विधानेन प्रातर्होमानां समासं कुर्यात् । एवं पक्षहोम-

समासे कृते यद्यन्तराले आपन्निवृत्तिस्तदा प्रत्यहं सायंप्रातर्होमान् हुतानपि जुहुयान्नवेति कठा आमनन्ति ।

XII In Smārtollāsa (Part I टीका P. 41) काठके :—

अरत्निमात्री स्रुगग्निहोत्रहवणी पालाशी सामान्येन निर्वपणमितरासां बाहुमात्राः स्रुग्दण्डाः प्रहस्तमात्राणि प्रस्रवणान्यर्थपरिमाणानि पात्राणि पालाशी जुहूराश्वत्थ्युपभृद्वैकङ्कती ध्रुवा शमीभूर्जमय्यो वा त्वक्तो विला हंसमुख्यो भवन्तीति श्रुतिर्नैयग्रोधाश्चमसा रौहीतका वा सर्वाणि वा पर्णमयानि स्फ्यस्रुवशम्यं खादिरं प्राशित्रहरणं च यद्वा यज्ञियानां पात्रीडाचमसं लोकाच्छेषस्य प्रतिपत्तिरिति ।

Part II P. 139

भृगुः—मन्त्रपूतं स्थितं काये यस्य यज्ञोपवीतकम् ।
नोद्धरेच्च ततः प्राज्ञो य इच्छेच्छ्रेय आत्मनः ॥
सकृदुत्तारणात्तस्य प्रायश्चित्ती भवेद् द्विजः ।
तैत्तिरीयाः कठाः काण्वाश्चरका वाजसनेयिनः ॥

XIII In Saṃskāra-Gaṇapati. (P. 668)

तैत्तिरीयाः कठा काण्वाश्चरका वाजसनेयिनः ।
कण्ठादुत्तार्य सूत्रं तु कुर्युर्वै चालनं द्विजाः ॥

XIV In Parama-Saṃhitā-introduction[1] :—

यजुषि कठशाखायाम्—
धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा ।
स्वरेण मन्त्रेण सदा हृदि स्थितं परात्परं यन्महतो महान्तम् ॥

पृ० ३३

यजुषि काठके—चरणं पवित्रमित्यारभ्य सुधितां दधात्वित्यन्तम् ॥

पृ० ३३

1. Introduction (p. 33) by S. K. Eiyangar, Baroda, Oriental Institute.

THE END